नं० ४६०-घ

कादम्बरी

पत्राणि २०८

आख्यायिका (काव्यम्)

पत्राणि २०८

कर्ता बाणभट्टः पुलिनभट्टश्च

नं० ४६० - घ

कादम्बरी
आख्यायिका (काव्यम्)

पत्राणि २०८

कर्त्ता बाणभट्टः - पुलिनभट्टश्च

नं० ४५०४

संख्या तं ६०००

१॥

पत्रे
२०४

६००

का० ट० १

ॐ स्वस्ति श्रीविघ्नहर्त्रे नमः ॥ ॐ रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे अजाय सर्गस्थि-
तिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः । जयन्ति बाणासुरमौलिलालिता दशास्यचूडामणिचक्रचुम्बिनः
सुरासुराधीशशिखान्तशायिनो भवच्छिदस्त्र्यम्बकपादपांसवः । जयत्युपेन्द्रः स चकार दूरतो बिभित्सया यः
क्षणलब्धलक्ष्यया दृशैव कोपारुणया रिपोरुरः स्वयं भयाद्भिन्नमिवास्रपाटलम् । नमामि भर्व्वोश्चरणाम्बुजद्व-
यं सशेखरैर्मौखरिभिः कृतार्चनं समस्तसामन्तकिरीटवेदिकाविटंकपीठोल्लुलितारुणाङ्गुलिः । अकारणा-
विष्कृतकोपदारुणात्खलाद्भयं कस्य न नाम जायते विषं महाहेरिव यस्य दुर्वचः सुदुःसहं सन्निहितं सदा
मुखे । कटुक्वणन्तो मलदायकाः खलास्तुदन्त्यलं बन्धनशृङ्खला इव मनस्तु साधुध्वनिभिः पदे पदे हरन्ति
सन्तो मणिनूपुरा इव । सुभाषितं हारि विशत्यधो गलान्न दुर्जनस्यार्करिपोरिवामृतं तदेव धत्ते हृदयेन स-
ज्जनो हरिर्महारत्नमिवातिनिर्मलं । स्फुरत्कलालापविलासकोमला करोति रागं हृदि कौतुकाधिकं र-
सेन शय्यां स्वयमभ्युपागता कथा जनस्याभिनवा वधूरिव । हरन्ति कं नोज्ज्वलदीपकोपमैर्नवैः पदार्थैरु-
पपादिताः कथाः निरन्तरश्लेषघनाः सुजातयो महास्रजश्चम्पककुड्मलैरिव । बभूव वात्स्यायनवंश-
संभवो द्विजो जगद्गीतगुणोऽग्रणीः सतां अनेकगुप्तार्चितपादपङ्कजः कुबेरनामांश इव स्वयंभुवः ।
उवास यस्य श्रुतिशान्तकल्मषे सदा पुरोडाशपवित्रिताधरे सरस्वती सोमकषायितोदरे समस्तशास्त्रस्मृ-
तिबन्धुरे मुखे । जगुर्गृहेऽभ्यस्तसमस्तवाङ्मयैः ससारिकैः पञ्जरवर्तिभिः शुकैः निगृह्यमाणा बटवः प-

ॐ १

दे पदे यजूंषि सामानि च यस्य शंकिताः । हिरण्यगर्भो भुवनाण्डकादिव क्षपाकरः क्षीरमहार्णवादिव अ-
भूत्सुपर्णो विनतोदरादिव द्विजन्मनामर्थपतिः पतिस्ततः । विवृण्वतो यस्य विसारि वाङ्मयं दिने दिने शि-
ष्यगणा नवा नवाः उषःसु लग्नाः श्रवणेऽधिकां श्रियं प्रचक्रिरे चंदनपल्लवा इव । विधानसंपादितदानशो-
भितैः स्फुरन्महावीरसनाथमूर्तिभिः मखैरसंख्यैरजयत्सुरालयं सुखेन यो यूपकरैर्गजैरिव । स चित्रभा-
नुं तनयं महात्मनां सुतोत्तमानां श्रुतशास्त्रशालिनां अवाप मध्ये स्फटिकोपलामले क्रमेण कैलासमिवे-
क्ष्माभृतां । कृतात्मनो यस्य सुहृद्विनिर्गताः कलंकमुक्तेन्दुकलामलत्विषः द्विषन्मनः प्राविविशुः कृता-
न्तरा गुणा नृसिंहरूपनखांकुरा इव । दिशामलीकालकभंगितां गतस्त्रयीवधूकर्णतमालपल्लवः चकार
यस्याध्वरधूमसंचयो मलीमसः शुक्लतरं निजं यशः । सरस्वतीपाणिसरोजसंपुटप्रसुप्तहंसांसमसीक-
रांभसः यशोंशुशुक्लीकृतसप्तविष्टपस्ततः सुतो बाण इति विज्ञायत । द्विजेन तेनाक्षतकंठकुंठया म-
हामनोमोहमलीमसांधया अलब्धवैदग्ध्यविलासमुग्धया धिया निबद्धेयमतिद्वयी कथा ॥ आसीद-
शेषनरपतिशिरःसमभ्यर्चितशासनः पाकशासन इवापरः चतुरुदधिमालामेखलायाः क्षितेर्भर्ता प्र-
तापानुरागोपनतसामंतचक्रवर्तिलक्षणोपेतः चक्रधर इव करकमलोपलक्ष्यमाणशंखचक्रलांछनो
हर इव जितमन्मथः गुह इवाप्रतिहतशक्तिः कमलयोनिरिव विमानीकृतराजहंसमंडलो जलनिधि-
रिव लक्ष्मीप्रसूतिः गंगाप्रवाह इव भगीरथपथप्रवृत्तः रविरिव प्रतिदिवसोपजायमानोदयः मेरुरिव

का॰ टी॰ २

सकलभुवनोपजीव्यमानपादच्छायः दिग्गज इव अनवरतप्रवृत्तदानार्द्रीकृतकरः कर्ता महाश्चर्याणां आह-
र्ता क्रतूनां आदर्शः सर्वशास्त्राणां उत्पत्तिः कलानां कुलभवनं गुणानां आगमः काव्यामृतरसानां उदयशैलो
मित्रमण्डलस्य उत्पातकेतुरहितजनस्य प्रवर्तयिता गोष्ठीबन्धानां आश्रयो रसिकानां प्रत्यादेशो धनुष्मतां
धौरेयः साहसिकानां अग्रणीर्विदग्धानां वैनतेय इव विनतानन्दजननो वैन्य इव चापकोटिसमुत्सारितसकला-
रातिकुलाचलो राजा शूद्रको नाम । नाम्नैव यो निर्भिन्नारातिकुलहृदयो विरचितनरसिंहरूपाडम्बरमे-
कविक्रमाक्रान्तभुवनतलो विक्रमत्रयायासितात्मानं जहासेव वासुदेवं । अतिचिरकाललग्नमतिक्रान्तकु-
नृपतिसहस्रसंपर्ककलङ्कमिव क्षालयन्ती यस्य विमले कृपाणधाराजले चिरमुवास राजलक्ष्मीः । यस्य
मनसि धर्मेण कोपे यमेन प्रसादे धनदेन प्रतापे वह्निना भुजे वसुधया दृशि श्रिया वाचा सरस्वत्या मु-
खे शशिना बले मरुता प्रज्ञायां सुरगुरुणा रूपे मनसिजेन तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटित-
विश्वाकृतेरनुचकार भगवतो नारायणस्य । यस्य च मदकलकरिकुम्भपीठपाटनमाचरता लग्नस्थूलमुक्ता-
फलेन दृढमुष्टिनिपीडननिष्ठ्यूतधाराजलबिन्दुदन्तुरेणेव कृपाणेनाकृष्यमाणा सुभटोरःकवाटतटघटि-
तकवचसहस्रान्धकारमध्यवर्तिनी करिकटगलितमदजलसारदुर्दिनाभिसारिका समरनिशासु समी-
पमसकृदाजगाम राजलक्ष्मीः । यस्य च हृदयस्थितानपि पतीन्दिधक्षुरिव ज्वलत्प्रतापानलो विधवाना-
मपि रिपुसुन्दरीणामनवरतमहो दिवानिशं जज्वाल । यस्मिंश्च राजनि जितजगति परिपालयति महीं

गे॰ ४

चित्रकर्मसु वर्णसंकराः रतेषु केशग्रहाः काव्येषु दृढबंधाः शास्त्रेषु चिंता स्वप्नेषु विप्रलंभाः छत्रेषु कनकदं
डाः ध्वजेषु प्रकंपाः गीतेषु रागविलसितानि करिषु मदविकाराः चापेषु गुणछेदाः गवाक्षेषु जालमार्गाः
शशिकृपाणकवचेषु कलंकाः रतिकलहेषु दूतसंप्रेषणानि प्रजानामासन् । यस्य च परलोकाद्भयं अं
तःपुरिकाःलकेषु भंगाः नूपुरेषु मुखरता विवाहेषु करग्रहणं अनवरतमखाग्निधूमेनाश्रुपातः तुरगे
षु कशाभिघातः मकरध्वजे चापध्वनिरभूत् । यस्य च राज्ञः कलिकालभयपुंजीकृतकृतयुगानुकारिणी
त्रिभुवनप्रसवभूमिरिव विस्तीर्णा मज्जन्मालवविलासिनीकुचतटास्फालनजर्जरितोर्मिमालया जलाव
गाहनागतजयकुंजरकुंभसिंदूरधूलिसंध्यायमानसलिलया उन्मदकलहंससंकुलकलकलमुखरित
कूलया सरिता वेत्रवत्या परिगता विदिशानामनगरी राजधान्यासीत् । स तस्यामवजिताशेषभुव
नमंडलतया विगतराज्यचिंताभारनिर्वृतो द्वीपांतरागतानेकभूमिपालमौलिमालालालितचरणयु
गलो वलयमिव लीलया भुजेन भुवनभारमुद्वहन्नमरगुरुमपि प्रज्ञया प्रहसद्भिरनेककुलक्रमागतैरस
कृदालोचितनीतिशास्त्रनिर्मलवचोभिरलुब्धैः स्निग्धैः प्रबुद्धैश्चामात्यैः परिवृतः समानवयोभिर्विद्या
लंकारैः अनेकमूर्धाभिषिक्तपार्थिवकुलोद्गतैः अखिलकलाकलापालोचनकठोरमतिभिः अतिप्रग
ल्भैः कालविद्भिः प्रेमानुरक्तैः ग्राम्यपरिहासकथाकुशलैरिंगिताकारवेदिभिर्वेटकाख्यायिका
ख्यानकालेख्यनाटकव्याख्यानादिकक्रियानिपुणैः अतिकठिनपीवरस्कंधोरुबाहुभिः असकृदवद

लितसमदगजगमनाबंधैः केसरिकिशोरकैरिव विक्रमैकरसैरपि विनयव्यवहारिभिरात्मनः प्रतिबिंबैरिव
राजपुत्रैः सह रममाणः । प्रथमेवयसि सुखमुवास । तस्य च अतिविजिगीषुतया महासत्वतया च तृण
मिव लघुस्त्रैणमाकलयतः प्रथमेवयसि वर्तमानस्यापि रतसुखस्योपरि द्वेषइवासीत् । सत्यपि रू
पविलासावहसितरतिविभ्रमे लावण्यवति विनयवति अन्वयवति हृदयहारिणि च अवरोधजने कदा
चिदनवरतदोलायमानमणिवलयः चर्चरिकास्फालनप्रकंपरणरणायमानमणिकर्णपूरः स्व
यमारब्धमृदंगवाद्यसंगीतकसंगेन कदाचिदविरलविमुक्तशरासारशून्यीकृतकाननो मृगयाव्या
पारेण कदाचिदाबद्धविदग्धमंडलः काव्यप्रबंधरचनेन कदाचिच्छास्त्रालापेन कदाचिदाख्यानका
यिकेतिहासपुराणाकर्णनेन कदाचिदालेख्यविनोदेन कदाचिद्वीणया कदाचिद्दर्शनागतमुनिगण
चरणशुश्रूषया कदाचिदक्षरच्युतकमात्राच्युतकबिंदुमती गूढचतुर्थप्रहेलिकाप्रदानादिभिः
वनितासंभोगसुखपराङ्मुखः सुहृत्परिवृतो दिवसमनयत् । यथैव च दिवसमेवं अवाप्तविविधक्री
डापरिहासचतुरैः सुहृद्भिरुपेतः निशामप्यनैषीत् । एकदा तु नातिदूरोदिते नवनलिनदलसं
पुटभिदि किंचिदामुक्तपाटलिम्नि भगवति मरीचिमालिनि राजानमास्थानमंडपगतं अंगनाजनवि
रुद्धेन वामपार्श्वावलंबिना कौक्षेयकेण सन्निहितविषधरेव चंदनलता भीषणरमणीयाकृतिः अविरल
चंदनानुलेपधवलितस्तनतटा उन्मज्जदैरावतकुंभमंडलेव मंदाकिनी चूडामणिप्रतिबिंबछलेन

राजाज्ञेवमूर्तिमती राजभिः शिरोभिरुह्यमाना शरदिवकलहंसधवलांबरा जामदग्न्यपरशुधारेववशी
कृतराजमंडला विंध्यवनभूमिरिववेत्रलतावती राज्याधिदेवतेवविग्रहिणीप्रतीहारीसमुपसृत्यक्षितित
लविनिहितजानुकरकमलासविनयमब्रवीत् । देव द्वारिस्थिता सुरलोकमारोहतस्त्रिशंकोरिव कुपितश
तमखहुंकारनिपातितालक्ष्मीः दक्षिणापथादागताचंडालकन्यका पंजरस्थंशुकमादाय देवंविज्ञाप
यति सकलभुवनतले सकलरत्नानामुदधिरिवैकभाजनंदेवः विहंगमश्चायमाश्चर्यभूतः सकलभुव
नतलरत्नमिति कृत्वादेवपादमूलमुपादायैनमागताहं इच्छामि देवपाददर्शनसुखमनुभवितुमिति
तदेतद्देवःप्रमाणमित्युक्त्वाविरराम । उपजातकुतूहलस्तु राजा समीपवर्तिनां राज्ञामालोक्यमुखानि
कोदोषःप्रवेश्यतामित्यादिदेश । अथप्रतीहारीनरपतिवचनानंतरमुत्थाय तांमातंगकुमारींप्रावेशय
त् प्रविश्यचसा राजानमद्राक्षीदितिसंबंधः नरपतिसहस्रमध्यवर्तिनमशनिभयपुंजीभूतकुलशैल
मध्यगतमिवकनकशिखरिणं अनेकरत्नाभरणकिरणजालकांतर्हितावयवमिंद्रायुधसहस्रसंछा
दितमिवजलधरसमये प्रलंबितस्थूलमुक्ताकलापस्य कनकशृंखलानियमितम
णिदंडिकाचतुष्टयस्य गगनसिंधुफेनपटलपांडुरस्यनातिमहतो दुकूलवितानस्याधस्तादिंदुकांतम
णिपर्यंकिकानिषण्णं उद्धूयमानकनकदंडचामरकलापं उन्मयूखसुवर्णकांतिविजयपराभवमणीतशशि

नीवस्फाटिके पादपीठे न्यस्तवामपादं इंद्रनीलमणिकुट्टिमप्रभासंपर्कश्यामायमानैः प्रणतरिपुनिः
श्वासमलिनीकृतैरिव चरणनखमयूखजालकैरुपशोभमानं आसन्नोल्लसितपद्मरागकिरणपाटली
कृतेन सद्यःदलितमधुकैटभरुधिरारुणेन हरिमिवोरुयुगलेन विराजमानं अमृतफेनधवले गोरोचना
लिखितहंसमिथुनसनाथपर्यंते चामरपवननर्तितदशे दुकूले वसानं अतिसुरभिचंदनानुलेपधव
लितोरःस्थलमुपरिविन्यस्तकुंकुमस्थासकमंतरांतरा निपतितबालातपच्छेदमिव कैलासगिरिं अपर
शशिशंकया नक्षत्रमालयेव हारवलनया कृतमुखपरिवेषं अतिचपलराजलक्ष्मीबंधननिगडकट
कमिवाकाण्डजननयनानन्दकेयूरस्फुरगलककुंडलेन मलयजरसगंधलुब्धेन भुजंगमद्वयेनेव वेष्टितबाहु
शिखरमीषद्दोलायितकर्णोत्पलं उन्नतघोणं उत्फुल्लपुंडरीकलोचनं अमलकलधौतपट्टायितमष्ट
मीचंद्रशकलाकारमशेषभुवनराज्याभिषेकसलिलपूतमूर्णासनाथं ललाटप्रदेशमुद्वहन्तं। आमोदि
मालतीकुसुमशेखरमुषसि शिखरपर्यस्ततारकापुंजमिव पश्चिमाचलं आभरणप्रभापिशांगितांगतया
लग्नहरकोपानलमिव मकरध्वजं आसन्नवर्तिनीभिः सेवासंगताभिर्दिग्वधूभिः वारविलासिनीभिः
परिवृतं अमलमणिकुट्टिमसंक्रान्तदेहप्रतिबिंबतया प्रतिप्रेम्णा वसुंधरा हृदयेनेवोह्यमानं अप्रोषज्ज
नभोग्यतामुपनीतया सर्वैः साधारणया राजलक्ष्म्या समालिंगितं अपरिमितपरिवारं अप्यद्वितीयं अ

नेतनेङ्गेतुरगसाधनमपि व्याप्तभुवनतलं आसनगतमपि धनुर्षि विनिषण्णं उत्सारिताशेषद्विषदिंधन
मपि ज्वलत्प्रतापानलं आयतलोचनमपि सूक्ष्मदर्शनं महादोषमपि सकलगुणाधिष्ठानं कुप-
तिमपि कलत्रवल्लभमविरतप्रवृत्तदानमप्यमदं विशुद्धस्वभावमपि कृष्णमकरमपि हस्तस्थितस
कलभुवनतलं राजानमद्राक्षीत् आलोक्य सा दूरस्थितैव प्रचुररत्नवलयेन रक्तकुवलयदलको
मलेन पाणिना जर्जरितमुखभागां वेणुलतामादाय नरपतिप्रबोधनार्थं सकृत्सभाकुट्टिममाज
घान । येन तत्सकलमेव राजकमेकपदे वनकरियूथमिव तालशब्देन तेन वेणुनाघातपदावलि
नवदनमवनिपालमुखात्कृष्टचक्षुः तदभिमुखमासीत् अवनिपतिस्तु दूरादालोकयसीत्यभिधाय प्र
तीहार्या निर्दिश्यमानां तां वयःपरिणामपांडुरशिरसा रक्तराजीवावलितेक्षणापांगेन नवनरवहृतवा
यमतयापि यौवनापगमेप्यशिथिलशरीरसंधिना सत्त्वापि मातंगत्वेनातिनृशंसाकृतिना शुद्धीनार्यवे
षेण धवलवाससा पुरुषेणाधिष्ठिताम् आकुलाकुलकाकपक्षधारिणा कनकशलाकाविनिर्मितमप्यं
तर्गतशुकप्रभाश्यामायमानं मरकतमयमिव पंजरमुद्वहता चंडालदारकेणानुगम्यमानाम् असुरगृ
हीतामृतापहरणकृतकपटविलासिनीवेषस्य श्यामतया भगवतः श्रीहरेरिवानुकुर्वतीं संचा
रिणीमिवेन्द्रनीलमणिपुत्रिकामागुल्फावलम्बिना रक्तांशुककंचुकेनावच्छन्नशरीराम् उपरि रक्तांशुक

का॰ दं॰ ५

विरचितावगुंठनां नीलोत्पलस्थलीमिव निपतितसंध्यातपां एककर्णावसक्तदंतपत्रप्रभाधवलितकपो
लमंडलां उद्यदिंदुकिरणछुरितमुखीमिव विभावरीं आकपिलरोचनारचिततिलकतृतीयलोचना
मीशानरचितानुरचितकिरातवेषामिव भवानीं उरःस्थलनिवाससततसंघटितनारायणप्रभाश्यामलि
तामिव श्रियं त्रिनयननयनानलदह्यमानमदनधूममलिनीकृतामिव रतिं उन्मदहलिहलाकर्ष
णभयप्रपलायितामिव यमुनां अतिबहलपिंडालक्तकपल्लवितपादपंकजामचिरमृदितमहिषा
सुररुधिररक्तचरणामिव श्रीकात्यायनीं आलोहितांगुलिप्रभापाटलितनखमयूखामनतिकठिन
मणिकुट्टिमस्पर्शमसहमानां क्षितितलपल्लवभंगानिव निधाय चरंतीं आपिंजरेणोत्सर्पिणा नूपुर
मणीनां प्रभाजालेनानुरंजितशरीरतया पावकेनेव भगवता रूपपक्षपातिना प्रजापतिमप्रमाणी
कुर्वता जातिसंशोधनधूमालिंगितशरीरां अनंगवारणशिरोनक्षत्रमालायमानेन रोमराजिलता
लवालकेन मेखलादाम्ना परिगतजघनस्थलां अतिस्थूलमुक्ताफलघटितेन शुचिना हारेण श्रीगं
गास्रोतसेव कालिंदीशंकया कृतकंठग्रहां शरदमिव विकसितपुंडरीकलोचनां प्रावृषमिव घनके
शजालां मलयमेखलामिव चंदनपल्लवावतंसां नक्षत्रमालामिव चित्रश्रवणाभरणभूषितां श्रिय
मिव हस्तस्थितकमलशोभां मनोहरां अरण्यभूमिमिव रूपसंपन्नां दिव्ययोषितमिवाकुलीनां निद्रामिव लोचन

गौं॰ ५

ग्राहिणीं अरण्यकमलिनीमिव मातंगकुलदूषितां अमूर्तामिव स्पर्शवर्जितां आलेख्यगतामिव दर्शनमात्र॰
फलां मधुमासकुसुमसमृद्धिमिव जातिहीनां अनंगकुसुमचापलेखामिव मुष्टिग्राह्यमध्यां यक्षाधिपल॰
क्ष्मीमिवालकोद्भासिनीमचिरोपारूढयौवनामतिशयरूपाकृतिमनिमिषलोचनो ददर्श । समुपजात
विस्मयस्य चाभून्मनसि महीपतेः अहो विधातुरस्थाने रूपनिष्पादनयत्नः । तथा हि । यदि नामेयमात्मरूपो
पहसिताशेषरूपसमुत्पादिता तत्किमर्थमपगतस्पर्शसंभोगसुखे कृतं कुले अस्या जन्म मन्ये च मातंगजा॰
तिस्पर्शदोषभयादस्पृशतेयमुत्पादिता मनसैव प्रजापतिना अन्यथा कथमियमक्लिष्टतालावण्यस्य न
हि करतलस्पर्शक्लेशितानामवयवानामीदृशी कान्तिः सर्वथा धिग्विधातारमसदृशसंयोगकारिणं अति॰
मनोहराकृतिरपि क्रूरजातितयायेनेयमःस्मरस्त्रीरिव भीषणारमणीयाप्सुहीजयन्तीत्येवमादि चिन्तयन्त
मेव राजानमीषदाकालितकर्णपल्लवा साप्रगल्भवनितेव कन्यका प्रणनाम । कृतप्रणामायां तस्यां म
णिकुट्टिमोपविष्टायां स पुरुषस्तं विहंगमादाय पंजरगतमेव किंचिदुपसृत्य राज्ञे न्यवेदयत् अब्रवीच्च
देव विदितसकलशास्त्रार्थो राजनीतिप्रयोगकुशलः पुराणेतिहासकथालापनिपुणो वेत्ता गीतश्रुती
नां काव्यनाटकाख्यायिकाख्यानप्रभृतीनामपरिमितानां सुभाषितानामध्येता स्वयं च कर्ता परिहासा
लापपेशलो वीणावेणुमुरजप्रभृतीनां विद्याविशेषाणामसमः श्रोता नृत्तप्रयोगदर्शननिपुणश्चित्रक

का॰ दं॰ ९

मिणि प्रवीणो द्यूतव्यापारप्रगल्भः प्रणयकलहकुपितकामिनीप्रसादनोपायचतुरो गजतुरगपुरुषस्त्रीलक्ष
णाभिज्ञः सकलभुवनतलरत्नभूतोयं वैशंपायनो नाम शुकः सर्वरत्नानामुदधिरिव एको देवो भाजनमिति कृ
त्वा एनमादायास्मत्स्वामिदुहित्रा देवपादमूलमायाता तदयमात्मीक्रियतामित्युक्त्वा नरपतेः पुरो नि
धाय पंजरमसावपससार । अपसृते च तस्मिन्स विहगराजो राजाभिमुखो भूत्वा समुन्नमय्य दक्षिणं चरणम
तिस्पष्टवर्णस्वरसंस्कारया गिरा कृतजयशब्दो राजानमुद्दिश्यार्यामिमां पपाठ । स्तनयुगमश्रुस्नातं स
मीपतरवर्तिहृदयशोकाग्नेः चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणां । राजा तु तच्छ्रुत्वा संजातवि
स्मयः सहर्षमासन्नवर्तिनमतिमहार्हे हेमासने उपविष्टममरगुरुमिवाशेषनीतिशास्त्रपारगमतिपरिणत
वयसमग्रजन्मानमखिलमंत्रिमंडले प्रधानममात्यं कुमारपालितनामानमब्रवीत् । श्रुता भवद्भिरस्य
विहंगमस्य स्पष्टता वर्णोच्चारणे स्वरे च मधुरता । प्रथमं तावदिदमेव महदाश्चर्यं असंकीर्णवर्णप्रविभागा
मभिव्यक्तमात्रानुस्वारस्वरसंयोगां यदयमिति परिस्फुटां गिरमुदीरयति । तत्र पुनरपरमभिमतविषये म
नुजस्येव संस्कारवतो बुद्धिपूर्वा प्रवृत्तिः तथा ह्यनेन समुत्क्षिप्तदक्षिणचरणेनोच्चार्य जयशब्दमियं आर्या मा
मुद्दिश्यातिपरिस्फुटाक्षरं गीता प्रायेण हि पक्षिणः पशवश्च भयाहारमैथुननिद्रामात्रवेदिनो भवंति
इदं तु महच्चित्रं इत्युक्तवति भूभुजि कुमारपालितः किंचित्स्मितमुखो भूत्वा नृपमवादीत् । देव किमत्र

गं॰ ९

चित्रं यदेते हि शुकशारिकाप्रभृतयो विहंगविशेषा यथाश्रुतं वाचमुच्चारयंति इत्यधिगतमेव देवेन न
त्वन्यजन्मजनितोपात्तेन संस्कारानुबंधेन वा प्रकृष्टप्रयत्नेन वा संस्कारातिशयः उपजायत इति नाति ।
चित्रं अन्यदेतेषामपि पुरा पुरुषाणामिवातिपरिस्फुटालापानां शुकानामुपजाता करिणां जिह्वापरि
वृत्तिरित्येवमुच्चारयत्येव तस्मिन्नंशुशिशिरकिरणमंबरतलमध्यमारूढमावेदयन्नालिकाच्छेदप्रहत
पटुपटहनादानुसारी मध्याह्नशंखध्वनिरुदतिष्ठत् । आकर्ण्य तमासन्नस्नानसमये विसर्जितराज
लोकः क्षितिपतिरास्थानमंडपादुत्तस्थौ । अथ चलिते महीपतावन्योन्यमतिरभससंचलनच
लितांगदपत्रमकरकोटिपाटितांशुकपटानामाक्षेपदोलायमानकंठदाम्नामंसस्थलोल्लसितकुंकु
मवासपिंजरितदिशामालोलकुसुमशेखरोत्पतदलिकदंबकानामर्धावलंबिभिः कर्णोत्पलैः
चुंब्यमानगंडस्थलानां गमनप्रणामलालसानामहमहमिकया वक्षःस्थलप्रेंखोलितहारलतानामु
त्थितानामासीदतिमहान्संभ्रमो महीपतीनां । इतस्ततश्च निष्पतंतीनां स्कंधदेशावसक्तचामराणां चा
मरग्राहिणीनां कमलमधुपानमत्तकलहंसनादजर्जरेण पदेपदे रणितमणीनां रमणीनां नू
पुरनिनादेन वारविलासिनीजनस्य संचरतो जघनतलास्फालनरणितरत्नमालानां मेखलानां
मनोहारिणा रवेण नूपुररवाकृष्टानां च धवलितास्थानमंडपसोपानफलकानां भवनदीर्घिका

का॰
द॰
१

कलहंसानांकोलाहलेन रशनारसितोत्सुकानांचतारतरविराविणाउल्लिख्यमानकांस्यक्रेंकारदीर्घेण
गृहसारसानांकूजितेन सरभसप्रचलितसामंतशतचरणतुलाभिहतस्यचास्थानमंडपस्य नितां
निर्घोषगंभीरेणकंपयतीववसुमतींध्वनिना । प्रतीहाराणांचपुरःसंभ्रमउत्सारितजानपदानां
दंडिनांसमयाबंधहेलप्रवृत्तैस्तन्मारयतामालोकयालोकयेति ताररतरदीर्घेणभवनप्रासादकुंजेषुद्धा
दितप्रतिशब्दनगाढीकृततरेणाप्रयातेनालोकशब्देन । राज्ञांचसंभ्रमावर्जितमौलिलोलचूडामणी
नांप्रणामतामामलमणिशिलाकादंतुराभिः किरीटकोटिभिरुल्लिख्यमानस्यमणिकुट्टिमस्यनिःस्व
नेन प्रणामपर्यस्तानामतिकठिनमणिकुट्टिमस्यनिपतनरणरणायितानां मणिकर्णपूराणांनिना
देन मंगलपाठकानांचपुरोयायिनां जय जीवेति मधुरवचनानुयातेनपठतांदिगंतरव्यापिनाकल
कलेन प्रचलितजनचरणस्थानसंक्षोभभयादपहायकुसुमप्रकरमुत्पततांचमधुलिहांझंकृतेन सं
क्षोभाढलितत्वलितप्रहतैः अवनिपतितभिः केयूरकोटिताडितानांक्वणितमुखरवरत्नदाम्नांमणिस्तंभानां
चरणितेन सर्वतःक्षुभितमिवतदास्थानमभवत् । अथविसर्जितराजलोकोविश्रम्यतामिति स्वय
मेवाभिधायतांचंडालकन्यकांवैशंपायनः प्रवेश्यतामभ्यंतरमिति तांबूलकरंकवाहिनीमादिश्य
कतिपयाप्तराजपुत्रपरिवृतोनरपतिरभ्यंतरंप्राविशत् । अपनीताशेषभूषणश्चदिवसकरचंद्रतारका

रा॰
१

समुत्सृष्टशून्यमिव गगनाभोगः सकलमाहूतसमुचितव्यायामोपकरणं व्यायामभूमिमयासीत्। तत्र च
समानवयोभिः सह राजपुत्रैः कृतमधुरव्यायामः श्रमवशादुन्मिषंतीभिः कपोलयोरीषद्विगलि
तसितसिंदुवारकुसुममंजरीविभ्रमाभिरुरसि निर्दयश्रमच्छिन्नहारविगलितमुक्ताफलनिकरानुका
रिणीभिर्ललाटपट्टकाष्टमीचंद्रशकलतललोलसंदानितबिंदुविडंबिनीभिः स्वेदजलकणिकासंत
तिभिरलंक्रियमाणमूर्तिः उत्तस्थौ ततः स्नानोपकरणसंपादनतत्परेण सत्वरं प्रधावता परिजनेनानुग
म्यमानः तत्कालविरलजनेपि राजकुले समुत्सारणाधिकारसमुचितमाचरद्भिः दंडिभिरुपदिश्य
मानमार्गः विततसितवितानामनेकचारणगणबध्यमानमंडलां गंधोदकपूर्णकनकमयजलद्रोणी
सनाथमध्यामुपस्थापितस्फाटिकस्नानपीठामेकांतविनिहितैरतिसुरभिगंधसलिलपूर्णैः परिम
लावकृष्टमधुकरकुलांधकारितमुखैरातपभयान्नीलकर्पटावगुंठितैरिव स्नानकलशैरुपशोभि
तां स्नानभूमिमगच्छत्। अवतीर्णस्य च जलद्रोणीं वारविलासिनीकरमृदितसुगंधामलकोपलि
प्तशिरसो राज्ञः समंतात्समुपतस्थुरंशुकनिविडनिबद्धस्तनपरिकराः दूरसमुत्सारितवलयबाहु
लताः समुत्क्षिप्तकर्णाभरणाः कर्णोत्संगोत्सारितालकाः गृहीतजलकलशाः स्नानार्थमभिषेक
देवता इव वारयोषितः। ताभिश्च समुन्नतकुचकुंभमंडलाभिर्वारिमध्यप्रविष्टः करिणीभिरिव वन

करीपरिवृतस्तल्लतांश्च राजराजा । जलद्रोणीं सलिलाभ्यन्तरप्रविष्टश्च स्नानपीठममलस्फटिकधवलं वरुण
इव राजहंसमारुरोह । ततस्तं काश्चिन्मरकतकलशप्रभाश्यामायमाना नलिन्य इव मूर्तिमत्यः पत्र
पुटैः काश्चिद्रजतकलशहस्ता रजन्य इव पूर्णचन्द्रमंडलविनिर्गतेन ज्योत्स्नाप्रवाहेन काश्चित्कल
शोत्क्षेपश्रमस्वेदार्द्रशरीरा जलदेवता इव स्फाटिकैः कलशैस्तीर्थजलेन काश्चिन्मलयसरित इव
चंदनरससंमिश्रेण सलिलेन काश्चिदुत्क्षिप्तकलशाः पार्श्वविन्यस्तहस्तपल्लवाः प्रकीर्यमाणनखम
यूखजालकाः प्रत्यंगुलिविवरविनिर्गतजललवाः सलिलयंत्रदेवता इव काश्चिज्जाड्यमपनीतमाति
मवालातपेनेव कनककलशहस्ताः कुंकुमजलेन वरांगनाः क्रमेण राजानमभिषिषिचुः । अनं
तरमुपपादितस्फोटयन्निव श्रुतिपथमनेकमंगलपटहझल्लरीमृदंगवेणुवीणागीतनिनादा
नुगम्यमानो बंदिवृंदकोलाहलाकुलो भुवनविवरव्यापी स्नानशंखानामापूर्यमाणानामतिसुखविबोधा
निः । एवं च क्रमेण निर्वर्तिताभिषेको विषधरनिर्मोकपरिलघुधवले परिधाय धौते वाससी शार
दे बैकदेश इव जलक्षालनविमलतनुरतिधवलेन जलधरच्छेदशुचिना दुकूलपटपल्लवेन तुहि
नगिरिरिव गगनसरित्स्रोतसा कृतशिरोवेष्टनः संपादितपितृजलक्रियो मंत्रपूतेन तोयांजलिना दि
वसकरमभिप्रणम्य देवगृहमगमत् । उपरचितपशुपतिपूजश्च निष्क्रम्य निर्वर्तिताग्निकार्यो भूमौ

मनोहरकर्णकाविभिरलिकदंबकैः प्रबध्यमानपरिमलेन मृगमदकर्पूरकुंकुमवाससुरभिणा चंदने
नानुलिप्तसर्वांगो विरचितमालतीकुसुमशेखरः कृतांबरपरिवर्तो रत्नकर्णपूरमात्राभरणः स
मुचितभोजनैः सह भूमिपतिभिराहारमभिमतरसास्वादजातप्रीतिरवनिपो निर्वर्तयामास । परिपी
तधूमवर्तिरुपस्पृश्य च गृहीततांबूलः तस्मात्प्रमृष्टमणिकुट्टिमात्प्रदेशादुत्थाय नातिदूरवर्तिन्या स
संभ्रमप्रधावितया प्रतीहार्योपसारितमवलंब्यानवरतवेत्रलताग्रहणप्रसंगादनुनितांतकठिनकिसलया
नुकारिणा करतलेनाभ्यंतरसंचारसमुचितेन परिजनेनानुगम्यमानः धवलांशुकजवनिकापरि
गतपर्यंततया स्फाटिकमणिमयभित्तिबंधनमिवोपलक्ष्यमाणमतिसुरभिमृगनाभिपरिमलेनामो
दिना चंदनवारिणा सिक्तशिशिरमणिभूमिमविरतविप्रकीर्णेन विमलमणिकुट्टिमगगनतलतारागा
णेनेव कुसुमोपहारेण निरंतरनिचितमुत्कीर्णसालभंजिकानिवहेन सन्निहितगृहदेवतेनेव गंधस
लिलक्षालितेन कलधौतमयेन स्तंभसंचयेन विराजमानमतिबहलधूपपरिमलाविलामविल
विगलितजलनिवहधवलजलधरमालानुकारिणा कुसुमामोदवासितप्रच्छदपटेन पट्टोपधाना
ध्यासितशिरोभागेन मणिमयप्रतिपादकप्रतिष्ठितपर्यंकेन पार्श्वस्थरत्नपादपीठेन हिमगिरिशिला
तलसदृशेन शयनेन सनाथीकृतवेदिकं भुक्तास्थानमंडपमयासीत् । तत्र च शयनतलनिष

स्मः क्षितितलोपविष्टया शनैः शनैरुत्संगनिहितासिलतया खड्गवाहिन्या नवनलिनदलकोमलेन क
रसंपुटेन संवाह्यमानचरणस्तत्कालोचितदर्शनैश्चावनिपतिभिरमात्यैर्मित्रैश्च सह तास्ताः कथाः कुर्वन्मु
हूर्तमिवासांचक्रे । ततो नातिदूरवर्तिनीमेतः प्रवाहे वैशंपायनमादायाऽऽगच्छेति समुपजातान्तर्हृदान्त
प्रश्नकौतूहलो राजा प्रतीहारीमादिदेश । सा क्षितितलविनिहितजानुकरतला राजाज्ञं यथाज्ञापय
ति यथाज्ञापयति देव इति शिरसि कृत्वा आज्ञां यथादिष्टमकरोत् । अथ मुहूर्तादेव वैशंपायनः प्रती
हार्या गृहीतपंजरः कनकवेत्रदंडावलंबिना किंचिदवनतपूर्वकायेन सितकंचुकावच्छन्नवपुषा जरा
धवलमौलिना किंचिदवनताङ्गदस्वरेण मंदमंदसंचारिणा विहगजातिप्रत्याजरा कलहंसेनैव कंचुकि
नानुगम्यमानो राज्ञोन्तिकमाजगाम । क्षितितलविनिहितकरतलस्तु कंचुकी राजानं व्यज्ञापयत्
देव देव्यो विज्ञापयन्ति देवादेशादेष वैशंपायनः कृतस्नानः कृताहारश्च देवपादमूलं प्रतीहार्या नी
तइत्यभिधाय गते तस्मिन् राजा वैशंपायनमपृच्छत् कच्चिदभिमतमास्वादितमभ्यन्तरे भवता किंचि
दशनमिति स तं प्रत्युवाच । देव किं वा नास्वादितं मत्तकोकिललोचनच्छविनीलपाटलः कषायम
धुरः प्राकाममापीतो जंबूफलरसः हरिभिन्नमत्तमातङ्गकुम्भमुक्तारक्ताद्रमुक्ताफलत्विषि खंडितानि
दाडिमीबीजानि नवनलिनीदलहरिन्ति दलितानि स्वेच्छया प्राचीनामलकानि किं वा देव प्रलपितेन ब

ना सर्वमेव देवीभिः स्वयं करतलोपनीयमानममृतायते इत्येवंवादिनि वचनमाकर्ण्य नरपति
रब्रवीत् । आस्तां तावत्सर्वमेवेदं अपनयतु नः कुतूहलमावेदयतु भवानादितः कथं वेदाना
मागमः कथं शास्त्राणां कुतः कालात्समासादिताः किं जन्मान्तरस्मरणं उत वरप्रदानमथवा विह
गवेषधारी किश्चिच्छन्नो निवससि क्व वा पूर्वमुषितं कियद्वा वयः कथं वा पञ्जरबंधः कथं चंडाल
हस्तगमनमिति वैशंपायनस्तु स्वयमुपजातकुतूहलेन सबहुमानमवनिपतिना पृष्टो मुहूर्त
मिव ध्यात्वा सादरमब्रवीत् । देव यदि कौतूहलं तदाकर्ण्यतां अस्ति पूर्वापरजलधिवेलालग्ना
मध्यदेशालंकारभूता मेखलेव भुवो वनकरिकुलकुंभमदजलसेकसंवर्धितैरतिविकचधवल
कुसुमनिकरमुत्कटतया तारागणामिव शाखरदेशलग्नमुद्वहद्भिः पादपैरुपशोभिता मदकलकुर
रदश्यमानमरिचपल्लवा करिकलभमृदिततमालकिसलयामोदिनी मधुमदोपरक्तकेरली
कपोलकोमलच्छविना संचरद्वनदेवताचरणालक्तकरसरंजितेनेव पल्लवप्रचयेन संछादिता
शुककुलदलितदाडिमीफलद्रवार्द्रीकृततलैरतिचपलकपिकुलकंपितकक्कोलच्युतपल्ल
वफलशबलैरनवरतनिपतितकुसुमरेणुपांसुलैः पथिकजनरचितलवंगपल्लवप्रस्तरैःक
ठोरनारिकेलकेतकीकरीरकेसरपरिगतप्रान्तैस्तांबूलीलतावनद्धपूगखंडमंडितैर्वनलक्ष्मीवा

समभवनैरिव विराजिता मंडपैः उन्मदमातंगकुलकपोलस्थलप्रस्रवणसिक्तेनेव निरंतरमेलालतावने
न मदगंधेनांधकारिता खरनखरलग्नेभकुंभमुक्ताफललवैः शबरसेनापतिभिरभिहन्यमानकेसरि
शाता प्रेतनगरीव सदासन्निहितमृत्युभीषणा महिषाधिष्ठिता च  समरोद्यतेव बाणासनारोपितशिली
मुखा विमुक्तसिंहनादा च  कात्यायनीव प्रचलितखड्गभीषणा रक्तचंदनालंकृता च  कर्णीसुत
कथेव सन्निहितविपुलाचलाशशोपगता च  प्रदोषसंध्येव प्रवृत्तनीलकंठा पल्लवारुणा च  अमृ
तमथनवेलेव श्रीमत्तरुमोपशोभिता वारुणीपरिगता च  प्रावृडिव घनश्यामला शतह्रदोपशो
भिता च  चंद्रमूर्तिरिव सततमृक्षसार्थानुगता हरिणाध्यासिता च  राजस्थितिरिव चमरव्यालव्य
जनोपशोभिता समदगजघटापरिपालिता च  गिरितनयेव स्थाणुसंगता मृगपतिसेविता च  जान
कीव प्रसूतकुशलवा निशाचरपरिगृहीता च  कामिनीव चंदनमृगमदपरिमलवाहिनी रुचिरा
हंसागुरुतिलकभूषिता च सोत्कंठेव विविधपल्लवानिलवीजिता समदना च  बालेव व्याघ्रनख
पंक्तिमंडिता गंडकाभरणा च  पानभूमिरिव प्रकटितमधुकोशशाला प्रकीर्णविविधकुसुमा च
क्वचित्प्रलयवेलेव महावराहदंष्ट्रासमुत्खातधरणिमंडला  क्वचिद्दशमुखनगरीव चटुलवानर
वृंदभज्यमानतुंगशालाकुला  क्वचिदचिरनिवृत्तविवाहवेलेव हरितसमित्कुशकुसुमशमीप

लाशाशोभिता क्वचिद्दृप्तमृगपतिनिनादभीतेव कंटकिता क्वचिन्मत्तेव कोकिलकलप्रलापि
नी क्वचिदुन्मत्तेव वायुवेगकृततालशब्दा क्वचिद्विधवेवोन्मुक्ततालपत्रा क्वचित्समरभूमि
रिव शरशतनिकरनिचिता क्वचिदमरपतितनुरिव नेत्रसहस्रसंकुला क्वचिन्नारायणमूर्तिरि
व तमालनीला क्वचित्पार्थरथपताकेव वानराक्रांता क्वचिदवनिपतिद्वारभूमिरिव वेत्रलतापृ
ष्ठवेष्टा क्वचिद्विराटनगरीव कीचकशताहता क्वचिदंबरश्रीरिव व्याधानुगम्यमानतरलतार
कामृगा क्वचिद्गृहीतव्रतेव दर्भचीरजटावल्कलधारिणी अपरिमितबहलपत्रसंचयाऽ
पि सप्तपर्णोपशोभिता क्रूरसत्त्वापि मुनिजनसेविता पुष्पवत्यपि पवित्रा विंध्याटवी नाम । तस्यां
च दंडकारण्यांतःपाति सकलभुवनख्यातमगस्त्यच्छिद्रेत्रमिव भगवतोऽगस्त्यस्य सुरपतिप्रार्थना
पीतसकलसागरसलिलस्य मेरुमत्सरादंबरतलप्रसारित विकटशिखरसहस्रेण दिवसक
ररथगमनपथमपेतमभ्यर्थनेनागणितसकलसुरसमूहवचसा विंध्यगिरिणाप्यनुल्लंघिताज्ञ
स्य जठरानलेन जीर्णवातापिदानवस्य सुरासुरमुकुटमणिमकरपत्रभंगकोटिचुंबितचरण
रजसः दक्षिणाशामुखविशेषकस्य सुरलोकादेकहुंकारनिपातितनहुषप्रकटप्रभावस्य ।

का॰ पू॰ ९

भगवतो महामुनेरगस्त्यस्य लोपामुद्रया स्वयमारचितालवालकैः करपुटसलिलसेकसंवर्धितैः सुत
निर्विशेषैरुपशोभितं पादपैः तत्पुत्रेण च गृहीतव्रतेनाषाढिना पवित्रभस्मविरचितत्रिपुण्ड्रकाभरणेन
कुशचीरवाससा मौञ्जमेखलया कलितमध्येन गृहीतहरितपर्णपुटेन प्रत्युटजमटता भिक्षां दृढस्यु
नापवित्रीकृततमतिप्रभूतेध्माहरिणास्त्रेध्मवाहनाम्ना । दिशि दिशि शुककहरितैस्तु कदलीवनैः श्या
मलीकृतपरिसरं सरितास्त्र कलशयोनिपरिपीतसागरानुगतयेव बद्धवेणिकया कावेर्या परिगत
माश्रमपदमासीत् । यत्र च दशरथवचनमनुपालयन्नुत्सृष्टराज्यो दशवदनलक्ष्मीविभ्रमविरामो रामो
महामुनिमगस्त्यमनुसरन्सह सीतया लक्ष्मणोपरचितरुचिरपर्णशालः पंचवट्यां कंचित्कालमुवा
स । चिरशून्येष्वपि यत्र शाखानिलीननिभृतपाण्डुकपोतपंक्तयोऽलग्नतापसाग्निहोत्रधूमराजय इव
लक्ष्यन्ते तरवः । बलिकर्मकुसुमान्युद्धरन्त्याः सीतायाः करतलादिव संक्रान्तो यत्र रागः स्फुरति लता
किसलयेषु । यत्र च पीतोज्जीर्णजलनिधिजलमिव मुनिना निखिलमाश्रमोपान्तवर्तिषु विभक्तं महा
ह्रदेषु । यत्र च दशरथसुतनिशातशरनिकरनिपातननिहतरजनीचरबहलरुधिरसंसिक्तमद्यापि नवरागा
ग्रकाण्डनिर्गतपलाशमिवाभाति नवकिसलयमरण्यम् । अधुनापि यत्र जलधरसमये गंभीरमभि
नवजलधरनिवहनिनादमाकर्ण्य भगवतः श्रीराघवस्य त्रिभुवनविवरव्यापिनश्चापघोषस्य स्मरन्तो॰

गो॰ ९

नवपल्लवं निशाकरकपवलमज्जद्धवलवदन्तुरजललवलुलितदीनदृष्टयो वीक्ष्य शून्या दिशो राघवानुजशरविशा
लकोटरयो जानकीसंवर्धिता जीर्णमृगाः। यस्मिन्ननवरतमृगयानिहताशेषवनहरिणप्रोत्साहि
त इव हृतसीताविप्रलंभः कनकमृगो राघवमतिदूरमाजहार। यत्र च मैथिलीवियोगदुःखिनौ
दशवदनविनाशपिशुनौ चंद्रसूर्याविव कबंधग्रस्तौ समं रामलक्ष्मणौ त्रिभुवनभयमतिमहदक्रु।
तः अन्यायतनस्य यस्मिन्दशरथसुतनिपातितो योजनबाहोर्बाहुरगस्त्यप्रसादनागतनहुषाजगर
कायशंकामकरोदृषिजनस्य। जनकतनयया च भर्तुर्विरहविनोदनार्थमुटजाभ्यन्तरलिखिता य
त्र श्रीरामनिवासदर्शनोत्कण्ठा पुनरिव धरणीतलाङ्कलसंतीवनचरैरद्याप्यालोक्यन्ते। तस्य चैवं
विधस्य संप्रत्यपि प्रकटोपलक्ष्यमाणपूर्ववृत्तान्तस्य अगस्त्याश्रमस्य नातिदूरे जलनिधिपानप्रकुपि
तवरुणोत्साहितेनागस्त्यमत्सरादुदाश्रमसमीपवर्तिपर इव वेधसा महाजलनिधिकृत्यादितः
प्रलयकालविघटितादिग्विभागसंधिबंधं गगनतलमिव भुवि निपतितं आदिवराहसमुद्धृतधराम
ण्डलस्थानमिव सलिलपूरितं अनवरतमज्जदुन्मदशबरकामिनीकुचकलशालुलितं उत्फुल्लकुमु
दकुवलयकल्हारं उन्निद्रारविंदमकरंदबिंदुनिष्यंदबद्धचंद्रकं अलिकुलपटलांधकारितसौगं
धिकं आरसितसमदसारसं अंबुरुहमधुपानमत्तकलहंसकामिनीकृतकोलाहलं अनेकजल

चरन्मातंगशतसंचलनचलितवाचालवीचिमालं अनिलोल्लासितकल्लोलशिखरशीकरासारदुर्दिनं
अभिषिक्तावतीर्णाभिरंभःक्रीडारागिणीभिः स्नानसमयेवनदेवताभिः केशपाशकुसुमैः सुरभीकृतं प्रकटे
णावतीर्णऋषिजनापूर्यमाणकमंडलुकलकलध्वनिमनोहरं उन्मिषितोत्पलवनमध्यचारिभिः सुवर्ण
तयावासिताश्रमेघैः कादंबकदंबकैरासेवितं अभिषेकावतीर्णपुलिंदराजसुंदरीकुचचंदनधूलिध
वलिततरंगं उपांतजातकेतकीरजःपटलबद्धकूलपुलिनं आसन्नाश्रमागततापससंक्षालितार्द्र
वल्कलकषायपाटलितजलं अविरलतमालवीथिकांधकारिताभिर्वालिनिवासितेन संचरताप्रति
दिनमृष्यमूकवासिना सुग्रीवेणावलंबफलपरिलघुकलनाभिमतदेवासनापसानांदेवतार्चनोपयुक्तं ।
कुसुमाभिमत्तजलचरपतगकुलपक्षपुटविगलितजलबिंदुसेकसुकुमारकिसलयाभिर्लता
मंडपलतस्थितशिलाविश्रिमंडलारब्धतांडवाभिरनेककुसुमपरिमलवाहिनीभिः वनदेवतानिःश्वास
वासितनाभिर्वनराजिभिरुपरुद्धतीरं । अपरसागरशंकिभिः सलिलमादातुमवतीर्णैर्जलधरैरिव ।
बहलपंकमलिनैर्वनकरिभिरनवरतमापीयमानमगाधमनंतरमप्रतिष्ठमपांनिधानं पंपाभिधानं
सरः । यत्रविकचकुवलयदलप्रभाश्यामायमानपत्रपुटान्यद्यापिमूर्तिमज्जामशापग्लानीवम
ध्यचारिणामालोकयंतेचक्रनाम्नांमिथुनानि । तस्यचैवंविधस्य पंपासरसः पश्चिमेतीरे श्रीरामशर

महारज्जर्जरितस्य जीर्णनालवंशस्य समीपे दिग्गजकरदंडानुकारिणा जरदजगरेण सततमावेष्टित
मूलतयाबद्धमहालवालक इव दिक्चक्रवालपरिणाहमिव ग्रहीतुं भुवनान्तरालविप्रकीर्णेन शा
खासंचयेन प्रलयकालताण्डवप्रसारितभुजसहस्र इव उडुपतिमाकलयन्निव विडंबयितुमभ्युद्य
तः पुराणतया पतनभयादिव पवनस्कंधदेशलग्नः निखिलशरीरव्यापिनीभिरतिदूरोन्नताभिर्जरति
जीर्णतया सिराभिरिव व्रततिभिः जरातिलकबिंदुभिरिव वचनिजकंटकैराचितनिरन्तरः इतस्ततः परि
पीतसागरसलिलैर्गगनागतैः पत्ररथैरिव शाखान्तरेषु निलीयमानैः क्षणमंबुवाहैरार्द्रीकृतप
ल्लवैर्जलधरपटलैरपहृतमिव शिखरदेशः तुंगतया च नंदनवनश्रियमिवावलोकयितुमभ्युद्गतः
समीपवर्तिनामुपरिसंचरतामेव गगनगमनखेदायासितानां रविरथतुरंगमाणां मुखकुहरविसृतैः फे
नपल्लवैः संदेहिततूलराशिभिः शबलीकृतशाखः वनगजकपोलकंडूयनलग्नमदसलिलमलि
नेन निलीनमत्तमधुकरमालेन लोहशृंखलाबंधनिश्चलेनैव कल्पस्थायिना मूलेन समुपे
तः कोटराभ्यन्तरनिविष्टैः स्फुरद्भिः सजीव इव मधुकरपटलैः कर्णायोधनदुर्योधन इवोपलक्षितशकुनिप
क्षपातः नलिननाभ इव वनमालोपगूढः नवजलधरव्यूह इव नभसि दर्शितोन्नतिः अखिलभुवना
वलोकनप्रासाद इव वनदेवतानां अधिपतिरिव दंडकारण्यस्य नायक इव वनस्पतीनां सखेव वि

का॰
टी॰
त्र
13

ग्रस्य शाखाबाहुभिरुपगूह्येव विंध्याटवीमवस्थितो महान्जीर्णशाल्मलिवृक्षः । तत्र शाखाग्रेषु कोट
रोदरेषु पल्लवांतरेषु स्कंधसंधिषु जीर्णवल्कलविवरेषु च महावकाशतया विस्रब्धविरचितकुलायस
हस्राणि दुरारोहतया विगतविनाशातङ्कयानि नानादेशसमागतानि शुककुलानि प्रतिवसंति । यैः परि
णामविरलदलसंहतिरपि स वनस्पतिरविरलदलनिचयश्यामल इवोपलक्ष्यते दिवानिशं निली
नैः । ते च तस्मिन्वनस्पतावतिवाह्यातिवाह्य रजनीमात्मनीडेषु प्रतिदिनमुत्थायाऽऽहारान्वेषणाय
नभसि विरचितपंक्तयः मदकलहलधरहलमुखोल्लेखविप्रकीर्णबहुस्रोतसमंबरे कलिंदकन्या
मिव दर्शयंतः सुरगजेंद्रदलितविगलदाकाशनलिनीशंकामुपजनयंतः दिवसकररथतुरगप्रभा
वलिमिव गगनतलमुपपादयंतः संचारिणीमिव मरकतस्थलीं विडंबयंतः शैवालपल्लवाव
लीमिव प्रसारयंतः गमनवितानैः पक्षपुटैः कदलीदलैरिव दिनकरकरपरिखेदितान्याशामुखा
निर्जीवयंतः वियति विसारिणीं शाद्वलवीथीमिव रचयंतः सेंद्रायुधमिवांतरिक्षं विदधाना विरचंति
शुकशकुनयः कृताहाराश्च पुनः प्रतिनिवृत्य कुलायावस्थितेभ्यः शावकेभ्यो विविधान्फलरसान्क
लमविकाशांस्तु हरिणरुधिराश्रोलनखकोटिपाटलेन चंचुपुटेन दत्वा दत्वा तस्मिन्नेव वत्सपोतपा
यंति । एकस्मिंस्तु तत्र जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्तमानस्य कथमपि पितु

गं॰
त्र

र्हमेवैको विधिवशात्तनूजोऽभवं । अतिप्रबलया चानन्तरभूतयैव प्रसववेदनया जननी मे लोकान्तरम
गमत् । अभिमतजायाविनाशदुःखितोपि च तातः सुतस्नेहादंतर्निरुध्य प्रसरमपि शोकावेग
मेकाकी मत्संवर्धनपर एवाभवत् । अतिपरिणततया च वयसा वीराङ्गकारिणीमल्पावशिष्टशीर्णपिञ्छ
जालजर्जरांसस्रस्तांसदेशशिथिलो अपगतोत्पतनसंस्कारोऽपक्षसंहतिस्तिष्ठन्नहमुपाहृत्य कंपतया
च संतापकारिणीमङ्गलग्नां जरामिव विधुन्वन् अकठोरशेफालिकाकुसुमनालपिंजरेण कलमम
ञ्जरीदलनमसृणितदलीर्णोपान्तलेखेन स्फुटिताग्रकोटिना चञ्चुपुटेन परनीडनिपतिताभ्यः शालि
वल्लरीभ्यस्तण्डुलकणानादायादाय तरुमूलनिपतितानि चञ्चुककुलार्धदलितानि फलशकलानि
समाहृत्य परिभ्रमितुमशक्तो मह्यमदात् । अनुदिनमात्मना च मदुपभुक्तशेषमकरोदशनं । एकदा
तु प्रभातसंध्यारागलोहिते गगनकमलिनीमधुरक्तपक्षसंपुटे वृद्धहंस इव मंदाकिनीपुलिनादपरज
लनिधितटमवतरति चन्द्रमसि । परिणतरङ्कुरोमपाण्डुनि व्रजति विशालतामाशाचक्रवाले गजरु
धिररक्तहरिसटालोमलोहिनीभिरातमलाक्षातन्तुपाटलाभिरायामिनीभिः शिशिरकिरणदीधिति
भिः पद्मरागशलाकासम्मार्जनीभिरिव समुत्सार्यमाणे गगनमणिकुट्टिमकुसुमप्रकरे तारागणे
। संध्योपासनप्रवृत्तवारणावलीविनिमानससरस्तीरमिवावतितीर्षति सप्तर्षिमण्डले तटगतविघटि

का॰ दं॰ ख
14

तशुक्तिसंपुटविप्रकीर्णामलमृणालकारेणेव विगलितनक्षत्रगणमिव मुक्ताफलनिकरमुद्वहति धवलितपुलि
नतलमुद्वहत्यति पूर्वार्णवे । तुषारबिन्दुवर्षिणि विबुद्धशिखिविरुतकुले विजृम्भमाणकेसरिणि करिणीकदम्ब
कप्रबोध्यमानसमदकरिणि तुषारजलजडकेसरं कुसुमनिकरमुदयगिरिशिखरस्थिते सवितारमिवो
द्दिश्य पल्लवाञ्जलिभिरुत्सृजति कानने । रासभरोमधूसरासु वनदेवताप्रसादानां तन्तूणां शिखरेषु पा
दपवनमालायमानासु धर्मपताकास्विव सप्तर्षिसंघीतेषु तपोवनाग्निहोत्रधूमलेखासु । अवश्यायशी
करिणि उल्ललितकमलवने रतिखिन्नशबरसीमन्तिनीस्वेदकणिकापहारिणि वनमहिषरोमन्थफेना
बिन्दुवाहिनि चलितपल्लवलतालास्योपदेशव्यसनिनि विघटमानकमलखण्डमधुशीकराकर्षिणि कु
सुमामोदतर्पितालिजाले निशावसानजातजडिमनि मन्दमन्दसंचारिणि प्रवाति प्राभातिके मातरिश्वनि
कमलवनप्रबोधमङ्गलपाठकानामिभगण्डडिण्डिमानां मधुलिहां कुमुदकोटरेषु संघटमानदलपुटनि
रुद्धलीनानामुच्चरत्सु झंकारेषु । प्राभातिकशिशिरमारुताहननसुन्नमज्जत्तरसाविलग्नं पक्ष्ममालमिव स
शेषनिद्राजिह्मिततारं चक्षुरुन्मीलयत्सु शनैः शनैरूषरप्रायधूसरक्रोडरोमराजिषु वनमृगेषु इत
स्ततः संचरत्सु वनचरेषु । विजृम्भमाने श्रोत्रहारिणि पम्पासरःकलहंसकोलाहले समुल्लसति नर्ति
तशिखण्डिनि मनोहरे वनगजकर्णतालशब्दे । क्रमेण च गगनमार्गमवतरतो दिवसकरगणस्याव

गं॰ ख

तूलचामरकलापद्भवोपलक्ष्यमाणे संध्यारागलोहिनि किरणजाले । शनैः शनैश्च दिने भगवति सवि
तरि पंपासरःपर्यन्ततरुशिखरसंचारिणि प्रकाशितगिरिशिखरे दिवसकरजन्मनि हूततनारे पुनरिव कपि
स्थैरेवनमभिपतति बालातपे । स्फुटेप्रत्युषसि नचिरादिव साष्टभागभाजि स्पष्टभासि भगवति भास्व
ति जाते गतेषु यथाभिमतानि दिगंतराणि शुककुलेषु कुलायनिलीननिभृतशावकसनाथेष्वपि निःश
ब्दतया शून्यकल्पे तस्मिन्वनस्पतौ स्वनीडावस्थितएवताते मयि च शैशवादसंजातबले समुत्पिद्यमानप
क्षपुटे तातसमीपवर्तिनि कोटरगते सहसैव तस्मिन्महावने संत्रासितसकलवनचरः सरभसमुत्थ
तत्रपतत्रिपक्षसंततिः भीतकरिकपोतफूत्कारपीवरः प्रचलितलताकुलितमत्तालिकुलविरुतमांस
लः परिभ्रमद्रुद्धोणवनवराहरवघर्घरो गिरिगुहाप्रसुप्तप्रबोधसिंहनादोपबृंहितः कंपयन्निव तरून्भ
गीरथीवनार्यमाणगंगातरंगकलकलबहुलो भीरुवनदेवताकर्णितो मृगयाकोलाहलध्वनिरुदच
रत् । आकर्ण्यच महमस्त्रस्त सर्वेमुपजातवेपथुरर्भकतया जर्जरितकर्णविवरो भयविक्लवः समीप
वर्तिनः पितुः प्रतीकारवेद्यं जराशिथिलपक्षपुटांतरमविशं । अनंतरं च सरभसमितः कुरभयूथपतिल
लितकमलिनीपरिमलः इतः क्रोडकुलदष्टप्रस्तानभद्रमुस्तरसामोदः इतः करिकलभभज्यमान
मल्लकीकषायगंधः इतो निपतितशुष्कपत्रमर्मरध्वनिः इतो महिषकुलविषाणजालिखाकोद्यभि

का॰
दं॰
१५

15

ध्यमानवाल्मीकमूलैः इतो मृगकदंबकं इतो वनगजकुलं इतो वराहयूथं इतो वनमहिषवृंदं इतः शिखं
डिविरुतं इतः कपिंजलकूजितं इतः क्रौंचकुलक्वणितं इतो मृगपतिनखपंजरविद्यमानकुंभकुंजर
रसितं इयमार्द्रपंकमलिना वराहपदपद्धतिः इयमभिनवशष्पकवलरसश्यामला हरिणरोमन्था
फेनसंहतिः अयमुन्मदगंधगजगंडकंडूयनपरिमलालीनमुखरमधुकरनिकरस्तरुः एषा निप
तितरुधिरबिंदुशबला शुष्कपत्रपटलपाट लारुरुपदवी चरणमृदितविटपिपल्लवप्रस्तरमेतद्वनकुं
जकुलक्रीडितं एष नखकोटिलिखितविकटपत्रलेखो रुधिरपाटलः करिमौक्तिकदलदंतुरो मृगप
तिमार्गः एषा प्रत्यग्रप्रसूतवनमृगीगर्भरुधिरलोहिता भूमिः इयमटवीवेणिकाकारिणी वनद्वि
रदस्य यूथपतेर्मदजलमलिना संचारवीथी चमरपंक्तिरियमनुगम्यतां उद्धुष्कमृगकरीषपांसुला व
विततरमध्यास्यतामियं वनस्थली तरुशिखरमारुह्यतां आलोक्यतां दिगियं आकर्ण्यतामयं शब्दः इ
ह्यतां धनुः अवहितैः स्थीयतां मुच्यंतां श्वानः इत्यन्योन्यमभिवदतो मृगयाप्रसक्तस्य महतो जनसमू
हस्य तरुगहनान्तरितविग्रहस्य क्षोभितकानने कोलाहलमशृणवं । अथ नातिचिरादिवाकुलेपना
ङ्गमृदंगाधानधीरेण गिरिविवरविजृंभितप्रतिनादगंभीरेण निशितशरताडितानां केसरिणां निनादेन
मत्तस्य यूथभ्रष्टानामेकाकिनां च संचरतामनवरतकरास्फोटमिश्रेण जलधररसितानुकारिणा गजयूथ

गें॰
१५

पत्नीनां कंठगर्जितेन सरभससारमेयविलुप्यमानावयवानामालोलकातरतारकाणामेणकानां
चकरुणकूजितेन निहितयूथपतीनां वियोगिनीनामनुगतकलभकानां स्थित्वास्थित्वासमाकर्ण्य
कलकलमुत्कर्णपल्लवानामितस्ततः परिभ्रमंतीनां प्रत्यग्रपतिविनाशशोकदीर्घेण करिणीनां बृंहि
तेन कतिपयदिवसप्रसूतानां विक्लवधेनुकानां त्रासपरिभ्रष्टपोतान्वेषिणीनामितः करुणमारसंती
नामाक्रंदितेन नभोमार्गविरसमुत्पतितानां पतत्रिणां च कोलाहलेन नूपातसारमयाविलानां च मृग
यूथानां खुरपदनिरभसपातरूपानाभिहताया भुवः कंपमिव जनयता जरठवयसाहूतेन कर्णतालाहृष्टग
णजन्मना च मदकलकुंजरकामिनीकंठकूजितकलेन शारवर्षिणां धनुषां च निनादेन पवनाहतिक्ष
णिनर्थितानामसीनां चातिकठिनमहिषस्कंधपीठपातितानां रणितेन अवांच सरभसविसृज्यद्येर
ध्वनीनां वनानां रक्षापिनाधानेन सर्वतः प्रचलितमिव तदरण्यमभवत् । अचिराच्च प्रशांते तस्मिन्
मृगयाकलकले निःशब्दमूकजलधरवृंदानुकारिणि मथनावसानोपशांतवारिणि सागरइव
स्तिमिततामुपगते कानने मंदीकृतभयो ह्युपजातकुतूहलः पितुरुत्संगादीषदिव निष्क्रम्य कोटर
स्थएव शिरोधरां प्रसार्य संत्रासतरलतारकः शैशवात्किमिदमिति समुपजातदिदृक्षस्तां दिशं प्रति
भयेन चक्षुः प्राहिणवं । अभिमुखमापतच्च तस्माद्वनादर्जुनभुजदंडसहस्रविप्रकीर्णमिव नर्मदा

प्रवाहे अनिलचलितमिव तमालकानने एकीभूतमिव कालरात्रीणां यामसंघाते अञ्जनशिलास्तम्भसं
भारमिव क्षितिकम्पविचूर्णितं अंधकारपुरमिव रविकिरणाकुलितं अन्तकपरिवारमिव संचरन्तं अवथा
वितरसातलोद्गतमिव दानवलोकं अशुभकर्मसमूहमिवैकत्र समागतं अशेषदण्डकारण्यनिवासिमु
निजनशापसामर्थ्यमिव संचरन्तं अनवरतनिपातितशरनिकरवर्षितामनिहतवरहरिणबलनिवहं
मिव पिशाचतामुपगतं कलिकालबन्धुवर्गमिव संगतं अवगाढप्रस्थितमिव वनमहिषयूथं अच
लशिखरस्थसिंहकराकृष्टपतनभयशीर्णमिव कालमेघपटलं अखिललोकविनाशाय धूमकेतुजाल
मिव समुद्भूतं अन्धकारितकाननमेकत्र संख्यमतिभयजननमुत्पातवेतालवृन्दमिव शबरजनम
द्राक्षं । मध्ये च तस्यातिमहतः शबरसैन्यस्य प्रथमे वयसि वर्तमानं अतिकर्कशत्वादायसमिव नि
र्मितं एकलव्यमिव जन्मान्तरागतमुद्भिद्यमानश्मश्रुलेखतया प्रथममदलेखामण्ड्यमानगण्डभित्ति
मिव गजयूथपतिं क्रमारमसितकुवलयश्यामेन देहप्रभाप्रवाहेन कालिन्दीजलेनेव स्नपयन्तमरण्य
माकुटिलाग्रेण स्कन्धावलम्बिना कुन्तलभारेण केसरिणमिव गजमदमलिनीकृतेन केसरकलापे
नोपेतं आयतललाटतटमतितुङ्गघोरघोणं उपनीतस्य कर्णाभरणतां भुजगफणामणेर्वा पाट
लैरंशुभिरालोहितीकृतेन प्रणाशयाभ्यासमालग्नपल्लवरागेणेव वामपार्श्वेन विराजमानं अचिराहत

गजकपोलसंक्रान्तेन सप्तच्छदपरिमलवाहिनाङ्कस्थागुरुपंकेनेव सुरभिना मदेन कृताङ्गरागां
उपरिनिलीनपरिमलान्धेन परिभ्रमता मायूरच्छत्त्रानुकारिणा मधुकरजालेन तमालपल्लवेनेव निवा
रितातपां आलोलकर्णपल्लवव्याजेन भुजबलविनिर्जितया भयप्रकम्पमानया विंध्याटव्येव कृत
लेनापमृज्यमानगण्डस्थलस्वेदलवां आपाटलयाह्निरिणजलत्वयवधूपदायमानया शोणा
नाम्नयेव दृष्ट्या रञ्जयेन मांसपाविभागे आज्ञानुविलेपिनावनकुंजरकदम्बमाणमिव गृहीत्वा
निर्मितेन चण्डिकारुधिरदानार्थं समस्तत्रिभुवनस्थितोल्लेखविविधमितशिवरेणुभुजगयरुगालेनो
पशोभितां ग्रन्थान्तरालग्राश्यानस्त्रिरुणरुधिरबिन्दुना स्वेदजलकणनिचितेन गुंजाफलवि
मिश्रैः करिकुंभमुक्ताफलैर्विरचिताभरणेन विंध्यशिखाविशालेन वक्षःस्थलेनोद्भासमान
प्रत्यग्रमविरलश्रमाभ्यासकृष्टशिलितोदरमिभमदमलिनमालानसंलग्नगलशृंखलं सन्तमिवोत्कटदंष्ट्र
येन लाक्षाक्षोलितकौशेयपरिधानं अकारणेपिक्रूरजातितयाबद्धत्रिपताकोग्रभ्रुकुटिकरालल
लाटपट्टे प्रबलभक्त्याराधितया सत्यरिग्रहोयमित्यकात्यायन्या त्रिशूलेनेवाङ्कितं उपजातपरिच
यैरनुगच्छद्भिः श्रमवशात्नूरस्त्विनिर्गताभिः स्वभावपाटलतयाश्रुकाभिरपि हरिणशोणितमिवव
मन्तीभिः जिह्वाभिरावेद्यमानखेटैर्विहितमृगवनतया स्पष्टदंष्ट्राशून्यदन्तान्तरालग्रकेसरिसटानिवह

कृभागानुठहहासैः स्थूलवराटकमालिकापरिकलितकंठैर्महावराहदंष्ट्राप्रायाभरणैः अल्पकायैरपिम
हासाहसिकत्वात् अनुपजातकेसरैरिव केसरिकिशोरैर्मृगयावधूवैरिवथवथानद्धैरनेकवर्णैः अमितप्रमाणै
भिस्त्रकेसरिणाभयप्रधानायाचनार्थमुपागताभिः सिंहीभिरिव कौलीयककुडुंबिनीभिरनुगम्यमानं
आगृहीतचमरवालगजदंतभारैः कैश्चित् अच्छिन्नपर्णपुटबद्धमधुपटलैः कैश्चित् मृगपतिभिरिव
गजकुंभमुक्ताफलनिकरसनाथपाणिभिः कैश्चित् यातुधानैरिव गृहीतपिशितभारैः कैश्चित् प्रम
थैरिव केसरिचर्मधारिभिः कैश्चित् शिशुभिरिव काकपक्षधरैः जलदागमदिवसैरिव जलधरच्छाया
मलिनैरनेकसहस्रसंख्यैः शबरवृन्दैः परिवृतं अरण्यमिव सावष्टणधेनुकं अभिनवजलधरव्यूहमिव गृही
तनैकचक्रं अर्जुनमिवोद्धूतानेकनागदमनं भीष्ममिव शिखंडिशत्रुं निदाघदिवसमिव सततमावि
र्भूतमृगतृष्णं विद्याधरमिव मानसवेगं पराशरमिव योजनगंधानुसारिणं घटोत्कचमिव भीमरूप
धारिणं अचलकन्यकाकेशपाशमिव नीलकंठचंद्रिकाभरणं हिरण्याक्षमिव महावराहदं
ष्ट्राविभिन्नवक्षःस्थलं रावणमिव कृतसीतामदारपरिग्रहं पिशिताशनमिव बहलकलंबुकं गीतमिव
निषादानुगतं अंबिकात्रिशूलमिव महिषरुधिरार्द्रकायं अभिनवयौवनमिव तापितबहुवयसं
फलमूलाशिनमपि सदा सारमेयसंग्रहं कलममध्यमदर्शनं स्वच्छंदप्रसरमपि दुर्गैकशरणं क्षिति

अन्यादृशपात्रवर्तिनमपि राजसेवानभिज्ञं अपत्यमिव विंध्यस्य अंशावतारमिव कृतान्तस्य सहोदरमिव पापस्य
सारमिव कलिकालस्य भीषणमपि महासत्वतया गंभीरमिवोपलक्ष्यमाणमनभिभवनीयाकृतिं मा
तंगकं नाम सर्वशबरसेनापतिमपश्यं । अभिधानं च पश्चादस्याहमश्रौषं आसीच्च मे मनसि अहो मे जी
वितं मोहप्रायमेषां साधुजनविगर्हितं च चरितं तथा हि पुरुषोपहारे धर्मबुद्धिः आहारः साधुजनविग
र्हितो मधुमांसादिः श्रमो मृगया शास्त्रं शिवारुतं उपदेष्टारः सदसतोः कौशिकाः प्रज्ञा शकुनज्ञाने
परिचिताः श्वानः राज्यं शून्यास्वटवीषु आपानकमुत्सवः मित्राणि क्रूरकर्मसाधनानि धनूंषि सहा
या विषदिग्धमुखा भुजंगा इव सायकाः गीतमुन्मादकारि मुग्धमृगाणां कलत्राणि बंदिगृहीताः
परयोषितः क्रूरात्मभिः शार्दूलैः सह संवासः पशुरुधिरेण देवार्चनं मांसेन बलिकर्म चौर्येण जी।
वनं भूषणानि भुजंगमणयः यस्मिन्नेव कानने वसंति तदेवोत्खातमूलमशेषतः कुर्वंति । इति चिं
तयत्येव मयि शबरसेनापतिरटवीपरिभ्रमणसमुद्भवं श्रममपनिनीषुरागत्य तस्यैव शाल्मलितरोर
धश्छायायामवतारितकोदंडः परिजनोपनीते पल्लवासने समुपाविशत् । अन्यतरस्तु शबरयुवा सस
म्भ्रममवतीर्य तस्मात्करयुगलपरिस्रुताम्भसः सरसो वैडूर्यद्रवानुकारि मलयदिवसकरकिरणा।
संतापादंबरैकदेशमिव विलीनं इंदुमंडलादिव प्रस्यंदितं द्रुतमिव मुक्तानिकरमत्यच्छतया स्पर्शानुमे

गृहीतमज्जनाश्चगणमरविंदकोशरजःकषायमंभःकमलिनीपत्रपुटेन प्रत्यग्रोद्धृतांश्चधौतपङ्कनिर्मला मृणा
लिकाः समुपाहरन् । आपीतसलिलश्च सेनापतिस्ता मृणालिकाः शशिकला इव सैंहिकेयः क्रमेण
दशन् । अपगतश्रमश्चोत्थायापरिपीतांभसा सकलेन शबरसैन्येनानुगम्यमानः शनैः शनैरभिमतं
दिगंतरमयासीत् । एकस्तु जरच्छबरस्तस्मात्पुलिंदवृंदादनासादितहरिणपिशितः पिशिताशन
इवातिविकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुतले मुहूर्तमिव व्यलंबत । अंतरिते च तस्मिन् शबर
सेनापतौ स जीर्णशबरः पिबन्निवास्माकमायूंषि क्षतधिरबिंदुपटलपाटलितया कपिलभ्रूलताकाप
रिवेषभूषणया दृष्ट्या गणयन्निव शुककुलकुलायस्थानानि श्येन इव विहगामिषास्वादलालसः
शिखरमारुरुक्षुस्तं वनस्पतिमामूलादपश्यत् । उत्क्रान्तमिव तस्मिन् क्षणेन तदालोकनभीतानामस्मा
कमसुभिः किमिवाहो दुष्करमकरुणानाम् यतः स तमनेकतालतुंगमभ्रंकषशिखरमपि सोपानैरि
वायत्नेनैव पादपमारुह्य अजातपक्षोत्पतनशक्तीन्कांश्चिदल्पदिवसजातानाभच्छविपटलानुशाल्म
लिकुसुमशंकामुपजनयतः कांश्चिदुद्भिद्यमानपक्षतया नलिनीसंवर्तिकानुकारिणः कांश्चिदर्क
फलसदृशान्कांश्चिल्लोहितायमानचंचुकोटीनीषद्विघटितदलपुटपाटलमुखानां कमलमुकुलानां
श्रियमुद्वहतः कांश्चिदनवरतशिरःकम्पव्याजेन निवारयतः इव प्रतीकारासमर्थानेकैकिकयाफलं

तोवनस्यवनस्पतेः शाखांतरेभ्यः शुकशावकानग्रहीत् । अपगतासूंश्चकृत्वाक्षितावपातयत् ।
तातस्तुतंमहांतमकांड एव प्राणहरमप्रतीकारमुपप्लवमुपनतमालोक्यद्विगुणतरोपजातवेपथु
र्मरणभयादुद्भ्रांततरलतारको विषादशून्यामस्त्रजलप्लुतांदृशमितस्ततोदिक्षु विक्षिपन्नुच्छुष्कता
लुरात्मप्रतीकाराक्षमस्त्रासस्रस्तसंधिशिथिलेनपक्षपुटेनाच्छाद्य तत्कालोचितंप्रतीकारमनन्य
मानः स्नेहपरवशोमद्रक्षणाकुलः किंकर्तव्यतामूढः क्रोडभागेनमामवष्टभ्यतस्थौ । असावपि
क्रमेणशाखांतरैः संचरमाणः कोटरद्वारमागत्यजीर्णामिव भुजंगाभीषणंप्रसार्यविविधवनवरा
हवसाविस्रगंधिकरतलमनवरतकोदंडगुणाकर्षणव्रणांकितप्रकोष्ठमंतकदंडाकारिणंवाम
बाहुमतिनृशंसोभुजंगइवदंदशूकश्चंचुमाह्वारप्रल्हूजंतमाकृष्यतातमपगतासुमकरोत् । मांतुस्वल्प
त्वाद्भयसंपिंडितांगत्वात्मावशेषत्वाच्चायुषः कथमपितत्पक्षसंपुटांतर्गतंनालक्षयत् । उपरतं
चतमवनितलेशिथिलशिरोधरमधोमुखममुंचत् । अहमपितच्चरणांतरालप्रवेशितशिरोधरोनि
भृतमंकदेशनिलीनस्तेनैवसहापतं । अवशिष्टपुण्यतयातुपवनवशात्संपुंजितस्य महतः शुष्कपत्ररा
शेरुपरिपतितमात्मानमपश्यं अंगानिमेयेननव्यशीर्यंत । यावच्चासौनतस्मात्तरुशिखरादवतरति
तावदहमवशीर्णपर्णसवर्णत्वादस्फुटोपलक्ष्यमाणमूर्तिः पितरमुपरतमुत्सृज्यनृशंसइवमाण।

पितृत्यागयोग्योपि कालेन बालतया कालांतरभुवः स्नेहस्यानभिज्ञः जन्मसहभुवा भयेनैव केवलमभिद्रू-
यमानः किंचिदुपजाताभ्यां पक्षाभ्यामीषत्कृतागमनावष्टंभो लुठन्नितस्ततः कृतांतमुखकुहरादिव विनि-
र्गतमात्मानं मन्यमानो नातिदूरवर्तिनः शावरसुंदरीकर्णपूररचनोपयुक्तपल्लवस्य सेकघनपटनी-
लतया दलसंपदा बहुमसृणस्य गगनाथरच्छवि श्रहैः कालिंदीजलखंडैरिव विरचितच्छदस्य नवकरि-
मदसलिलैरिवोपसिक्तकिसलयस्य विंध्याटवीकेशपाशश्रियमिवोढुमिति दिवांधकारितशाखा-
न्तरस्याप्रविष्टसूर्यकिरणमतिगहनमपरिस्येव पितृकृतसंगमतिमहतस्तमालविटपस्य मूलदेश-
मविशं । स चैतेन समयेन क्षितितलविप्रकीर्णान्संहृत्य तानन्याञ्शुकशावकानेकलतापाशसंयत-
माहृत्य पर्णपुटमतित्वरितगमनः शावराधिपतिगतेनैव वर्त्मना तामेव दिशमागमत् । मां तु लब्ध-
जीवितांशं प्रत्यग्रपितृमरणशोकशुष्कहृदयमतिदूरप्रपातादायासितशरीरं संत्रासजाता सर्वांगो-
पतापिनी बलवती पिपासा परवशमकरोत् । अनया च कालकलया सुदूरमतिक्रांतः स पापकृ-
दिति परिकलय्य किंचिदुन्नमितकंधरो भयचकिततया दृशा दिशोवलोक्य तृणेपि चलिति पुनः प्रति-
निवृत्तमिव तमेव पदे पदे पापकारिणमुत्प्रेक्षमाणो निष्क्रम्य तस्मात्तमालतलात्सलिलसमीपमुप-
गंतुं प्रयत्नमकरवम् । अजातपक्षतया च नातिस्थिरचरणसंचारस्य मुहुर्मुहुर्मुखेन पततो मुहुः

तिर्यग्विपतंतमात्मानमेकयापक्षपाल्यासंधारयनः क्षितितलसमर्पणश्रमात्तरस्यानाभ्यासव
शाद्देकमपिदातुंपदमशक्नुवानवरतमङ्कावस्य स्थूलस्थूलेस्वमन्तोऽपलिखन्सरसं समर्पितो ।
ममात्मानमसि । अतिकाष्ठास्ववस्थासु जीवितनिरपेक्षा न भवन्ति खलु जगति सर्वप्राणि
नां प्रवृत्तयः नास्तिजीवितादन्यदभिमततरं किंचिज्जगतिजन्तूनां एवमुपरतेपि सुगृहीतना
म्नि ताते यदहमविकलेन्द्रियः अरेव प्राणिमि धिङ्मामकरुणमतिनिष्ठुरं अहोसोढपितृमर
णशोकदारुणं मयाजीव्यते कृतमपिनापेक्षते खलु खलहृदयं अहं हि लोकान्तरगताया ।
नायामंबायां नियम्य शोकावेगमाप्रसवदिवसात्प्रभृति तेन वयसा मातातातेनेन यत्परिपालितस्त
त्सर्वमेकपदे विस्मृतं अतिकृपणाः खल्वमी मम प्राणा यदुपकारिणमपि तातमद्यापि ये
तेनानुगच्छन्ति । सर्वथा न कंचिन्न खलीकरोति जीविततृष्णा यदीदृशामवस्थामपि मामयमा ।
यासयति जलाभिलाषः मन्ये चास्य नापि पितृमरणशोकस्य निर्घृणतैव केवलमियं मम स
लिलपानबुद्धिः अद्यापि दूरत एव सरः तथाहि जलदेवतानूपुररवानुकारि दूरेऽपि कल
हंसविरुतमेतत् अस्फुटान्यमूनि च श्रूयन्ते सारसरसितानि अयं चातिविप्रकर्षादाशास्व
विसर्पी विरलः संचरति नलिनषंडपरिमलः दिवसस्य चैयमतिकष्टादशावर्तते रविरम्बर

का॰
हे॰
१०
90

तलमथवनीस्फुरंतमनवरतमनलस्फुलिंगनिकरमिवविकिरन्निकरैरधिकामुपजनयतितृष्णं आतप
स्पर्शोऽसंतमसपोह्यपटलजुगीमाचभूमिः अतिप्रबलपिपासावसन्नानि गतेनमल्पमपि मे न वहन्त्यं
गानि अप्रभुरस्म्यात्मनः सीदति मे हृदयं अंधकारतामुपैति चक्षुः अपि नाम विधिरनिच्छतोपि
मे मरणमद्यैव संपादयेदित्येवं चिंतयत्येव मयि तस्मात्सरसो नातिदूरवर्तिनि तपोवने जाबालि
र्नाम महामुनिः प्रतिवसति । तस्य तनयस्तु हारीतनामा तापसकुमारकः सनत्कुमार इव सर्वे
विद्यावदातचेताः सवयोभिरपरैः तपोधनकुमारैरनुगम्यमानस्तेन पथा द्वितीय इव भगवान्वि
भावसुरतितेजस्वितया दुर्निरीक्ष्यमूर्तिरुद्यतो दिवसकरमंडलादिवोत्कीर्णस्तडिद्भिरिव विरचि
तावयवस्तप्तकनकद्रवेणेव बहिरुपलिप्तमूर्तिः आपिंगावदातया देहप्रभया स्फुरंत्या सबालात
पमिव सदावानलमिव दावनमुपदर्शयन्नुन्नतमल्लोहलोहिनीनामनेकतीर्थाभिषेकपूतानामंस
स्थलावलंबिनीनां जटानां निकरेणोपेतः स्तंभितशिखाकलापः खांडवदिधक्षया कृतकपटवटु
वेष इव भगवान्पावकः तपोवनदेवतानूपुरानुकारिणा धर्मशासनकटकेनेव स्फाटिकेनाक्षवल
येन दक्षिणश्रवणावलंबिना विराजमानः सकलविषयोपभोगनिवृत्त्यर्थमुपपादितेन ललाट
पट्टे त्रिःसत्येनेव भस्मत्रिपुंड्रकेनालंकृतः गगनगमनोन्मुखबलाकानुकारिणा स्वर्गमार्गमिव

गं॰
१०

दर्शयता सततप्रग्रीवेण स्फटिकमणिकमंडलुनाध्यासितवामकरतलः स्कंददेशावलंबिना कृष्णा
जिनेन नीलपांडुरभासा तपस्तृष्णानिपीतेनान्तर्निष्पतता धूमपटलेनेव परिवृत्तमूर्तिः अभिनव
बिसतन्तुनिर्मितेनेव परिलक्ष्यतया पवनलोलेन निर्मांसविरलपर्शुकापञ्जरमिव गणयता अंसावलं
बिना यज्ञोपवीतेनोपशोभमानः देवतार्चनार्थमागृहीतवनलताकुसुमसंपूर्णपर्णपुटसनाथशिखरे
णाषाढदंडेनालंकृतसव्येतरपाणिः विषाणपल्लवोत्खातानामुद्धृतानां स्नानमृत्कणप्रजातपवित्र
येन नीवारमुष्टिसंवर्धितेन कुशाकुसुममलताजालायमानदृष्टिना तपोवनमृगेणानुयातः वि
टपइव कोमलवल्कलाच्छादितशरीरः गिरिरिव समेखलः राहुरिवासकृदास्वादितसोमः पद्मइव
दिवसकरमरीचिपः नदीतटतरुरिव सततजलक्षालनविरलजटः करिकलभइव विकचकुटज
शकलसितदशनः द्रोणिरिव कृपानुगतः नक्षत्रराशिरिव चित्रमृगाकृत्तिकाश्लेषोपशोभि
तः घर्मकालदिवसइव क्षपितदोषः जलधरसमयइव प्रशमितरजःप्रसरः वरुणइव कृतोदवा
सः श्रीहरिरिवापनीतनरकभयः प्रदोषारंभइव संध्यापिंगलतारकः प्रभातसमयइव बालात
पकपिलः रविरथइव हृतिनियमिताक्षचक्रः स्वराजेव निगूढमंत्रसाधनक्षपितविग्रहः जल
धिरिव करालशैलमंडलावर्तगर्भः भगीरथइव दृष्टगंगावतारः मधुकरइवासदनुभूतपुष्कर

का०
टं०
१
21

ववासः वनचरोपिकृतमहालयप्रवेशः संयतोपिमोक्षार्थी सामप्रयोगपरोपिसततावलंबितदंडः
प्रसुप्तोपिप्रबुद्धः सन्निहितनेत्रद्वयोपिपरित्यक्तवामलोचनः तदेवकमलसरस्मिन्स्नातुमुपागमत् ।
प्रायेणाकारणमित्राण्यतिकरुणार्द्राणि सदा खलु भवंति सतांचेतांसि यतः समांतदवस्थमालोक्यसमु
पजातदयः समीपवर्तिनमृषिकुमारकमब्रवीत् । अयंकथमप्यकशिशुरसंजातपक्षपुटएवतरुशा
खरादस्मात्परिच्युतः श्येनमुखपरिभ्रष्टेनवानेनभवितव्यं तथाह्यतिदवीयस्तयाप्रपातस्याल्पाव
शेषजीवितोयमामीलितलोचनोमुहुर्मुहुरतितरलंश्वसिति मुहुश्चंचुपुटंविवृणोतिनशक्नोति
शिरोधरांधारयितुमिहेति यावदेवायमसुभिर्नवियुज्यते तावदेवगृहाणैनमवतारयसलिलस
मीपमित्यभिधायतेनमांसरस्तीरमनाययत् । उपसृत्यचजलसमीपमेकदेशनिहितदंडकमंड
लुरादाय मांस्वयमुत्क्रान्तप्रयत्नमुत्तानितमुखमंगुल्याकतिचित्सलिलबिंदूनपाययत् । अंभःकणोद
कृतसेकंचसमुपजातप्राणमुपनतवेपथुंनवनलिनीपलाशस्यजलशिशिरायांछायायांनिधायस
मुचितमकरोत्स्नानविधिं । अभिषेकावसानेचानेकप्राणायामपूतोजपन्पवित्राण्यघमर्षणादी
निप्रत्यग्रमग्रैरुत्क्षिप्तोत्क्षारबिंदुभिर्नलिनीपत्रपुटेन भगवतेसवित्रेदत्त्वार्घमुदतिष्ठत् । आत्तधौतधौ
तधवलवल्कलस्सजोतत्तरुवसंध्यातपः करतलविधूननविशदजटः कमंडलुमादायस्यमुचितासरो

३ं०
१

वरवारिणीप्रत्यग्रस्नानार्द्रजटेन सकलेन तेन मुनिकुमारकदंबकेनानुगम्यमानो मां गृहीत्वा तपोवना
भिमुखं शनैः शनैरुपागच्छत् । अनतिदूरमिव गत्वा दिशि दिशि सदा सन्निहितकुसुमफलैस्तालति
लकतालीतमालहिंतालबकुलबहुलैरेलालताकलितनारिकेलीकलापैरालोललोध्रलवलील
वंगलतापल्लवैरुल्लसच्चूतरेणुपल्लवपटलैरलिकुलझंकारमुखरसहकारैरुन्मदमदकलकोकिल
कुलकलालापकोलाहलिभिरुत्फुल्लकेतकीमंजरीरजःपुंजपिंजरैः पूगीलतादोलाधिरूढवनदेव
तैस्तारकावर्षमिवाधर्मेऽपि विनापि पवनं कुसुममनिकरमनिलचलितमनवरतमतिधवलमुत्सृजद्भिः
समसंकपादपैः काननमुपगूढमविचकितप्रचलितकुसुमसारमानसावलाभिरुत्फुल्लकमलिनीलोहि
नीभिः मारीचिमायामृगावलूनतृणवीरुत्सहलिनाभिः दाशरथचापकोटिक्षतकंदमंतर्विशीर्णमितस्तत
लाभिर्दंडकारण्यस्थलीभिरुपशोभितप्रांतमागृहीतसमित्कुशकुसुममहद्भिर्विकैरध्ययनमुखरशिष्या
नुगतैः सर्वतः प्रविशद्भिर्मुनिभिरशून्योपकंठमुत्कंठितशिखिमंडलश्रूयमाणजलकलशापूरणध्वा
नमनवरताज्याहुतिप्राज्यैश्चित्रभानुभिः समारीवामिव मुनिजनममरलोकं निनीषुभिरुह्यमानधूम
लेखव्याजेनाबध्यमानसमस्तस्वर्गसाधनगमनसोपानसेतुमिवोपलक्ष्यमाणमासन्नवर्तिनीभिस्तपो
धनसंपर्कादिवापगतकालुष्याभिस्तरंगपरंपरासंक्रांतरविबिंबपंक्तिभिस्तापसंदर्शनागतसप्तर्षिमा

का॰ टी॰ २२

लाविगाह्यमानाभिरिवातिविकचकुमुदवनमृषिजनमुपासितुमवतीर्णं ग्रहगणमिव निशासु दृष्टं हंसीभि

र्दीर्घिकाभिः परिवृतमनिलवशविनमितशिखाभिः प्रणम्यमानमिव लताभिरनवरतमुकुलकुसुमैरभ्यर्च्य

मानमिव पादपैराबद्धपल्लवाञ्जलिभिः विक्षिप्यमानमिवोटजाजिरविप्रकीर्णशुष्यच्छ्यामा

कमुपसंगृहीतामलकीलवलीकर्कन्धुकदलीलकुचचूतपनसतालफलमध्ययनमुखरवटुजनमन

वरतश्रवणगृहीतवषट्कारवाचालशुककुलमनेकशारिकोद्गम्यमानवैश्वदेवपिंडमासन्नवापीक

लहंससूनभुज्यमाननीवारबलिमेणीजिह्वापल्लवोल्लिह्यमानमुनिबालकमग्निकार्यार्थमुपसमि

त्समायमानसमित्कुशकुसुममुपभग्ननारिकेलरसस्निग्धशिलातलमचिरनववल्कलरसपाट

लभूतलरक्तचंदनापालिमाऽऽदित्यमण्डलोपनिहितकरवीरकुसुममंसिमानानिर्दिग्धभस्मरेखाकृतत्रि

निजनभोजनभूमिपरिहारं शालामृगकराकृष्टनिष्क्राम्यमानप्रवेश्यमानजरदंधतापसमिभका

लभार्धोपभुक्तपतितैः सरस्वतीभुजलतावियलितैः शालावलयैरिव मृणालशकलैः कल्माषित

मृषिजनार्थमेणकैर्विषाणशिखरोत्खन्यमानविविधकंदमूलमम्बुपूर्णपुष्करपुटैर्वनकरिभिराप्यू

माणाविटपालवालकमृषिकुमारकाकृष्यमाणावनवराहदंष्ट्रान्तरालग्नशालूककंदमुपजातप

रिचयैः कलापिभिः पक्षपटपवनसंधुक्ष्यमाणमुनिहोमहुताशनमारब्धामृतचारुगंधमर्धपक्वाप

ग्रं॰ २२

रोड्गणशाखाणयपरमलामोदितमविछिन्नाज्यधाराहुतिजातभृङ्कारमुखरितमुपचर्यमाणाति
थिवर्गंपूज्यमानपितृदेवतमर्च्यमानहरिहरपितामहमुपदिश्यमानश्राद्धकल्पंव्याख्यायमान
यज्ञविद्यमालोच्यमानधर्मशास्त्रंवाच्यमानविविधपुस्तकंविचार्यमाणसकलशास्त्रार्थमार
भ्यमानपर्णशालमुपलिप्यमानाजिरमुपमृज्यमाणोटजाभ्यंतरं आबध्यमानध्यानमंत्रार्थ
मभ्यस्यमानयोगमुपक्रियमाणवनदेवताबलिंनिर्वर्त्यमानमौंजमेखलंक्षाल्यमानवल्कल
मुपक्रियमाणगवेधुकंशोष्यमाणपुष्करबीजंग्रथ्यमानाक्षमालंन्यस्यमानत्रिदंडमदृष्ट
पूर्वंकलिकालेनापरिचितमनृतेनस्याश्रुतपूर्वंमनंगस्याज्ञयोनिमिवत्रिभुवनवंदितं सुरासुरसि
वप्रकटितहरिवराहरूपं सांख्यमिवकपिलाधिष्ठितंमथवनोपमिवबलाबलीढदर्पितधेनुक
मुदयनमिव आनंदितवत्सकुलंकिंपुरुषाधिराज्यमिव पुण्यजनगृहीतकलशाभिषिच्यमानद्रु
मं जलधरसमयमिववनगहनंचीरनीरनिधिमिवमध्यस्थवसुमहाविंहसूदनमिवपलाशक
लप्रहारसमूलितनाहात्राख्यिसंचयं खांडवविनाशोच्छितार्जुनमिवप्रारब्धाग्निकार्येस्वरभिविलेप
नधरमपिसततनाविर्भूताज्यगंधं मातंगकुलाध्यासितमपिपवित्रमासादितधूमकेतुशनमपि।
प्रांतोपहृंवपरिसर्पाहिजपतिसदामत्रिहितनतरुगहनांधकारमतिरमणीयमपरमिवब्रह्मलोक

का॰
हे॰
ग

२३

साश्रममपश्यम् ॥ यत्र मलिनता हविर्धूमेषु न चरितेषु मुखरागः शुकेषु न कोपेषु तीक्ष्णता
कुशाग्रेषु न स्वभावेषु चंचलता कदलीदलेषु न मानसेषु चक्षूरागः कोकिलेषु न परकलत्रेषु
कंठग्रहः कमंडलुषु न सुरतव्यापारेषु मेखलाबंधो व्रतेषु नेर्ष्याकलहेषु स्तनस्पर्शो होमधेनु
षु न कामिनीकुचेषु पक्षपातः कृकवाकुषु न विद्याविवादेषु भ्रान्तिरनलप्रदक्षिणेषु न शा
स्त्रेषु वसुसंकीर्तनं दिव्यकथासु न तृष्णायां गणना रुद्राक्षवलयेषु न शरीरेषु मुनिबालनाशः
क्रतुदीक्षायां न मृत्युना रामानुरागो रामायणेन न यौवनेन मुखभंगविकारो जरया न धनाभिमानेन
यत्र च महाभारते शकुनिवधः पुराणे वायुप्रलपितं वयःपरिणामे द्विजपतनं उपवनचंदनेषु
जाड्यमग्नीनां भूतिमत्त्वं हरिणानां गीतव्यसनं शिखंडिनां नृत्यपक्षपातः भुजंगानां भोगः
कपीनां श्रीफलाभिलाषः मूलानामधोगतिः तस्य चैवंविधस्य मध्यभागमलंकुर्वाणस्य समा
हैकलोद्भिन्नलोलपल्लवस्य मुनिजनालंबितवल्कलाजिनजलकरकसनाथशाखस्य तापस
कुमारिकाभिर्मूलभागादनुपीनविक्षिप्तचाञ्जलस्य हरिणशिशुभिः परिपीयमानालवालजल
स्य मुनिकुमारकबद्धकृष्णाचीरदाम्नो नीलकृतेन गोमयोपलिप्तविविक्ततलस्य नातिमहतः प
त्रिमंडलतया विस्तीर्णावकाशस्य रक्ताशोकतरोरधश्छायायामुपविष्टमुग्रतपोभिर्भुवन

गे॰
ग

मिव सागरैः कनकगिरिमिव ज्वलनपर्वतैः आक्रान्तमिव वैतानवह्निभिः कल्पान्तदिवसमिव रविभिः काल
मिव कल्पैः समन्तान्महर्षिभिः परिवृतम् ग्रहणभीतयेव कंपिना देहयात्राप्रणयिन्येवाविहितकेश
ग्रहया आकुलयेव गलितभ्रूभंगया मत्तयेवास्खलितगमनया प्रसाधिकयेव प्रकटिततिलकया गृहीतव्र
तयेव भस्मधवलया जरया धवलीकृतविग्रहं मायामिनीभिः पलितपाण्डुराभिस्तपसा विजित्य प्रति
ज्ञानमाविलं धर्मपताकाभिरिवोद्गताभिः स्वर्गलोकमारोढुं पुण्यरज्जुभिरिव शिरोपसंगृहीताभिरुपा
र्जिताभिरतिहृदयमहृद्यस्यतपःपल्लवैः कुसुममञ्जरीभिरिवोद्गताभिर्जटाभिरुपशोभमानं ॥ उपचि
तभस्मत्रिपुण्ड्रकेण तिर्यक्प्रवृत्तेन त्रिपथगास्रोतस्त्रितयेन हिमगिरिशिलातलेनेव ललाटफलके
नोपेतं । प्रथोग्रवचन्द्रकलाकराभ्यामवलंबितवलिशिथिलाभ्यां भ्रूलताभ्यामवष्टभ्यमान
दृष्टिं । अनवरतमन्त्राक्षराभ्यासविवृताधरपुटतया निष्पतद्भिरतिशुचिभिः सत्यप्ररोहैरिव सा
मभिरिव स्वच्छेन्द्रियवृत्तिभिरिव विद्यागुणैरिव करुणारसैरिव धर्मप्रवाहैरिव दशनमयूखैर्ध
वलीकृतपुरोभागं । उद्वमदमलगंगाप्रवाहमिव जह्नुम् । अविरतसोमोद्गारवहगंधिश्वासाव
कृष्टैः मूर्तिमद्भिः प्राणापानैरिव समवाप्तविभागसन्निहितैः परिस्फुरद्भिरलिभिरिव विहितं ॥
अतिकृशतया निम्नतरगण्डगर्तप्रवृत्ततन्त्रयोणमाकारालनावकमवसीर्णयाण विरलनयनपक्ष्म

मालम्बमानदीर्घरोमकद्रस्रवणविवरमानाभिलंबकूर्चमञ्जुकलापमाननेन दधानं । अतिचपला
नामिंद्रियाश्वानामंतःसंयमनरज्जुभिर्निर्वाननाभिः कंठनाडीभिर्निरंतरसमद्धकंधरमुन्नतविरा
लास्थिपंजरमंसावलंबिनधवलयज्ञोपवीतमनिलवशावलिततनुतरंगाभंगमुह्यमानमिव मह॰
णालमिव मंदाकिनीप्रवाहमकल्पमंगमुद्वहंतं अमलस्फटिकशकलघटितमक्षवलय
मुज्ज्वलस्थूलमुक्ताफलग्रथितं भक्तवलयमुज्ज्वलं सरस्वतीहारमिव चलंगुलिविवरगतमाव
र्तयंतं अनवरतभ्रममिव तारकमपरमिव ध्रुवं । उन्नमितसिराजालकेनरजाकल्पतरुमिव परिण
तलतासमयेन निरंतरनिचितममलैरंशुकैरिव अमृतफलैर्विसभगुणासेनानंतेनाभिरि
व निर्मितेन मानससरोजलक्षालनशुचिनाङ्कूलवल्कलेन द्वितीयेनेव जराजालकेन संछादितं
मासन्नवर्तिना मंदाकिनीसलिलपूर्णेन त्रिदंडोपविष्टेन स्फटिककमंडलुना विकचपुंडरीकरा
शिमिव राजहंसेनोपशोभमानं अचनैःस्थैर्येण गांभीर्येण सागराणां तेजसा सवितुः प्रशासेन तु
षाराचलस्य निर्मलतया स्वरस्य सं विभागमिव कुर्वाणं । वैनतेयमिव स्वप्रभावोपात्तसकलखिलातिथप
तं । कमलासनमिवाश्रमोपगतं जरच्चंदनतरुमिव भुजंगनिर्मोकधवलजटाकुलं प्रशांतवारणमिवप्र
लंबकर्णपालिं वृहस्पतिमिव जन्मवर्धितकचं दिवसमिवोद्यतार्कबिंबभास्वरप्रभं शरत्कालमिव ।

क्षीणवंशं शांतनवमिव प्रियदेवव्रतं मंदाकिनीकूलमिव रुद्राक्षवलयग्रहणनिपुणं शिशिरसमयसूर्यमि
वहुतलोकाश्रयं गामौर्वानलमिव सततपयोभक्षं शून्यनगरमिव दीनानाथविपन्नशरणं पशुपतिमिव भ
स्मपांडुरमांसस्थलशरीरं भगवंतं जाबालिमपश्यम् ॥ अवलोक्य तं चाहमचिंतयं अहो प्रभावस्तप
सामियमस्य शांतापि मूर्तिरुत्तप्तकनकावदाता परिस्फुरंती सौदामिनीव चक्षुः प्रतिहंति तेजसा
सततमुदासीनोपि महाप्रभावतया भयमिवोपजनयति । प्रथममापततस्तु शुष्कनलकाशकुसुमनि
पातिनानलचटुलवृत्तिर्नित्यमसंहिष्णुतपस्विनां मतं तु तपसामपि तेजःप्रकृत्या भवति । किमुत
सकलभुवनवंदितचरणानामनवरततपःक्षपितमलानां करतलामलकवदखिलं जगदालोक
यतां दिव्येन चक्षुषा भगवतामेवंविधानामघक्षयकारिणि निपुणानि हि नाम ग्रहणान्यपि महामु
नीनां । किं पुनर्दर्शनानि । धन्यमिदमाश्रमपदं अयमपि पतिर्यस्याथवा भुवनतलमेव धन्यमखि
लमनेनाधिष्ठितमवनितलकमलयोनिना । पुण्यभाजः खल्वमी मुनयो यदहर्निशमेनमपरमि
व नलिनासनमपगतान्यव्यापाराः प्रत्यालोकननिश्चलदृष्टयः पुण्याः कथाः शृण्वंतः पर्युपासते
सरस्वत्यपि धन्या यास्य सततमतिप्रसन्नैकरुणारसनिष्यंदिदिग्गाधेगांभीर्ये रुचिरद्विजपरिवारा
मुखकमलसंपर्कसुखमनुभवंती निवसति हंसीव मानसे । चतुर्मुखमुखकमलवनवासिभिः

का॰ पू॰ २५

25

चतुर्भिर्वेदैः सुचिरं द्वितीयमिदं अपरमुचितमासादितं स्थानं एतस्मात्सद्यःशरत्कालमिव कलिकाल जलदसमयकलुषिताः प्रसादमुपगताः पुनरपि जगति सरित इव सर्वविद्याः । नियतमिह सर्वा त्मना कृतावस्थितिना भगवता पराभूतकलिकाल विलसितेन धर्मेण न स्मर्यते कृतयुगस्य धव लितलमनेनाधिष्ठितमालोक्य न वहति नूनमिदानीं सप्तर्षिमालानिवासाभिमानमम्बरतले । महासत्त्वेयं जरा यास्य प्रलयरविरश्मिनिकरदुर्निरीक्ष्ये शिशिरकिरणपाण्डुरशिरोरुहग्रहणज टाभारे फेनपुञ्जधवला गङ्गेव पशुपतेः ह्रीदाकृतिरिव शिखाकलापे विभावसोर्निष्पतन्ती विभा त्यनवानवेत्राग्निज्जाततललफलाज्यधूमपटलमलिनीकृताश्रमस्य भगवतः प्रभावाद्भीतमिव रविकिर णजालमतिदूरतः परिहरति तपोवनं । एते च पवनलोलपुञ्जितशिखाकलापोपरचिताञ्जलयस्त्व वात्र मन्त्रपूतानि हवींषि परिगृह्णन्त्येतस्याग्रदक्षिणायः । तरलितनताकरुकूलवल्कलोयं चास्य मलयानिलसमसुरभिपरिमलो मन्दमन्दसञ्चारी सशङ्क इवास्य समीपमुपसर्पति गन्धवाहः । प्रायो म हाभूतानामपि दुरभिभवानि भवन्त्यस्य तेजांसि । सर्वतेजस्विनामपि अग्रणीर्हि सूर्यमिव चाभाति ज गदेनाधिष्ठितं महात्मना निष्कम्पेवहितिरेतदन्वक्षमाद्देयमवाहः कारणमस्य सन्तरणसेतुः संसारसि न्धोरगाधेः आधारः क्षमाम्भसां पशुराममालतागहनस्य सागरः सन्तोषामृतस्य उपदेष्टा सिद्धिमार्गस्य

रां॰ २५

रक्तगिरिरसकृद्द्रुहस्य मूलस्तपसमनन्तरोः नाभिः प्रज्ञाचक्रस्य स्थितिबंधो धर्मध्वजस्य तीर्थं सर्वविद्यावता-
राणां वाडवानलो लोभार्णवस्य निकषोपलः शास्त्ररत्नानां दावानलो रागपल्लवस्य महामंत्रः क्रो-
धभुजंगस्य दिवसकरो महांधकारस्यार्गलाबंधो नरकद्वाराणां कुलभवनमाचाराणामायतनं
मंगलानां अभूमिर्मदविकाराणां दर्शकः सत्पथानां आदर्शः सर्वविद्यानां उत्पत्तिः साधुताया ने-
मिरुत्साहचक्रस्याश्रयः सत्वस्य प्रतिपक्षः कलिकालस्य कोशः तपसः सखा सत्यस्य क्षेत्रमार्ज-
वस्य प्रभावः पुण्यसंचयस्यादत्तावकाशो मत्सरस्यागतिर्विपत्तेः अस्थानं परिभूतेरननुकूलोभिमा-
नस्यासंमतो दैन्यस्यायत्तो रोषस्याविषयो विषयाणामनभिमुखः सुखानां ॥ अस्य भगवतः प्रभा-
वादेन दृष्टिप्रशांतवैरमपगतमत्सरं तपोवनमहो प्रभावो महात्मनां । अत्र हि शाश्वतिकं विरोधमप-
हाय शांतात्मानस्तिर्यंचोपि तपोवनवसतिसुखमनुभवंति । तथा ह्येष विकचोत्पलरवनानु-
कारिणमुत्पतत्स्वाकचंद्रकशतं हरिणालोचनद्युतिशवलमभिनवशाद्वलमिवाधिवसति शिखिनः
कलापमातपहतो निःशंकमहिः । अयमुत्सृज्य मातरमजातकेसरैः केसरिशिशुभिः सहोप-
जातपरिचयः प्रक्षरत्क्षीरधारामापिबति कुरंगशावकः सिंहीस्तनं । एष मृणालकलापाशंकि-
भिः शशिकरधवलं सटाभारमामीलितलोचनो बहुमन्यते द्विरदकलभैराकृष्यमाणां मृगपतिः

हृदमिह कपिकुलमपगतचापलमुपनयति मुनिकुमारकेभ्यः स्नातेभ्यः फलानि एते च न निवार्यं
ते मदान्धा अपि गंडस्थलीभाजिमदजलपाननिश्चलनिश्चलानि मधुकरकुलानि जातदयैः कर्ण
तालैः करिणः किंबहुना तापसाग्निहोत्रधूमलेखाभिरुत्पन्नाभिरनिशमुपपादितकृष्णाजिनोत्त
रासंगा इव शोभा वल्कलिनो निश्चलेननास्तरवोपि सनियमा इव लक्ष्यन्ते अस्य भगवतः । किंपुनः सचेत
नाः प्राणिन इत्येवं चिंतयन्तं मां तस्यामेवाशोकतरोरधश्छायायामेकदेशे स्थापयित्वा हारीतः पादा
वुपसंगृह्य कृताभिवादनः पितुरनतिसमीपवर्तिनि कुशासने समुपाविशत् । आलोक्य मां ते सर्वे एव
मुनयः कुतोयमासादितः शुकशिशुरिति तमासीनमपृच्छन् । असौ तु तानब्रवीत् । अयं मया स्नातु
मितो गतेन कमलिनीसरस्तीरतरुनीडनिपतितः शुकशिशुरातपजनितक्लान्तिरुत्तप्तपांसुपटलमध्य
गतो दूरनिपातनविह्वलतनुरल्पावशेषायुरासादितः तपस्विजनदुरारोहतया च तस्य वनस्पतेः स्वनी
डमारोपयितुमिति जातदयेनानीतः तद्यावदयमप्ररूढपक्षतिरवलम्बो न विहर्तुमुत्पतति तावदत्रैव क
स्मिंश्चिदाश्रमतरुकोटरे मुनिकुमारकैरस्माभिरुपनीतेन नीवारकणनिकरेण फलरसेन वा संवो
ध्यमानो धारयतु जीवितं । अनाथपरिपालनं हि धर्मोस्मद्विधानाम् उद्भिन्नपक्षतिस्तु गगनतलसंचरण
समर्थो यास्यति यत्रास्मै रोचिष्यते । इहैवोपजातपरिचयः स्थास्यतीत्येवमादिकमस्मत्संबद्धमाला

पमाकर्ण्य किंचिदुपजातकुतूहलो भगवान्जाबालिरीषदावलितकंधरः पुण्यजलैः प्रक्षालयन्निव
मामभिप्रशांतया दृष्ट्या सुचिरमुपजातप्रत्यभिज्ञान इव पुनः पुनर्विलोक्य स्वस्यैवाविनयस्य फल
मनेनानुभूयत इत्यवोचत् । स हि भगवान्कालत्रयदर्शी तपःप्रभावाद्दिव्येन चक्षुषा सर्वमेव क
रतलगतमिव जगदवलोकयति वेत्ति जन्मांतराण्यतीतानि कथयत्यागामिनमर्थमीक्षणगोचर
गतानां च प्राणिनामायुषः प्रमाणमावेदयति यतः सर्वैव सा तापसपरिषच्छ्रुत्वा किमर्थं वा कृतः जन्मांत
रे कोयमासीदिति कुतूहलिन्यभूत् । उपनाथितवती च तं भगवंतं । आवेदय प्रसीद भगवन् कीदृ
शस्याविनयस्य फलमनेनानुभूयते कश्चायमासीज्जन्मांतरे विहगजातौ कथमस्य संभवः संगमः कि
मभिधानो वायं । अपनय तन्नः कुतूहलं आश्चर्याणां हि सर्वेषां भगवान्प्रभव इत्येवमुपयाच्यमानस्त
तपोधनपरिषदा स महामुनिः प्रत्यवादीत् । अतिमहदिदमाश्चर्यमाख्यानकं अल्पश्चायमह्नः प्र
त्यासीदिति च नः स्नानसमयः भवतामप्यतिक्रामति देवार्चनविधिवेला तदुत्तिष्ठंतु भवंतः सर्वं पूर्व
वदाचरंतु यथोचितं दिवसव्यापारमपराह्णसमये भवतां पुनः कृतमूलफलाशनानां विस्रब्धोपविष्टानां
आदितः प्रभृति सर्वमावेदयिष्यामि यश्चानेन प्रकृतमपरस्मिन्जन्मनि इह च लोके यथास्य संभूतिः
अयं च तावदपगतक्लमः क्रियतां आहारेण नियतमप्ययमात्मनो जन्मांतरोदंतं स्वप्नोपलब्धमिव मयि क

का॰ टं॰ २७

27

घयति सर्वमशोषतः स्मरिष्यतीति अभिदधत्येव तस्मिन्सहमुनिभिः स्नानादिकमुचितं दिवसव्यापारमक
रोत्। अनेन च समयेन परिणतो दिवसः स्नानोत्थितेन मुनिजनेनार्घविधिमुपपादयता यः क्षितितले
दत्तस्तमंबरतलगतः साक्षादिव रक्तचंदनाङ्गरागं रविरुदवहत्। ऊर्ध्वमुखैरर्कबिंबविनिहितदृ
ष्टिभिरूष्मपैः तपोधनैरिव परिपीयमानतेजःप्रसरो विरलातपो दिवसस्तनिमानमभजत्। उद्यत्स
प्तर्षिसार्थस्पर्शपरिजिहीर्षयेव संहृतपादः पारावतचरणपाटलरागो रविरंबरतलादवालंबत।
आलोहितताराः तज्जालं जलशायिनगगनस्य मधुभिदो विगलन्मधुधारमिव नाभिनलिनमिव प्रतिमागतं
नमपरार्णवे सूर्यमंडलममलद्यत। विहाय धरणिमुन्मुच्य कमलिनीवनानि शकुनय इव दि
वसावसाने तरुशिखरेषु पर्वताग्रेषु च रविकिरणाः स्थितिमकुर्वन्। आलंबरक्तातपच्छेदा मुनि
भिरालंबिनालोहितवल्कला इवाश्रमतरवः क्षणमशोभन्त। अस्तमुपगते च भगवति सहस्रदी
धितौ अपरार्णवतटाल्लुलंती विद्रुमलतेव पाटला संध्या समदृश्यत यस्यामाबध्यमानध्यानमेक
देशोपदुह्यमानहोमधेनुदुह्यमानपयोधाराध्वनिमनोहरमग्निहोत्रवेदीविप्रकीर्यमाणहरितकुशमृषिकुमारि
काभिरितस्ततो निक्षिप्यमाणदिग्देवतार्चनबलिसिक्तमाश्रमपदमभवत्। क्वापि विहृत्य दिवसा
वसानलोलतारकातपोवनधेन्वेव कपिला परिवर्तमाना संध्याभ्युदितैस्तपोधनैरदृश्यत। विर

गं॰ २७

प्रोषिते च सवितरि शोकविधुरा कमलमुकुलकमण्डलुधारिणी हंससितदुकूलपरिधाना मृणालध
वलयज्ञोपवीता मधुकरमण्डलाक्षवलयमुद्वहन्ती नलिनी रविसमागमव्रतमिवाचरत्। अपरसा
गराम्भसि पतिते दिवसकरे उत्पतनवेगोत्थितमम्भःशीकरनिकरमिव तारागणमम्बरतलमधारय
त्। अचिरप्रवृत्तसिद्धकन्यकाविक्षिप्तसंध्यार्चनकुसुमशबलमिव तारकितं वियदराजत। क्षणेन
चोन्मुखेन मुनिजनेनोर्ध्वविप्रकीर्णैः प्रणामाञ्जलिसलिलैः क्षाल्यमान इवागलदखिलः संध्या
रागः। क्षयमुपगतायां च संध्यायां तद्विनाशदुःखिता कृष्णाजिनमिव विभावरी तिमिरोद्गममभि
नवमवहत्। अपहाय मुनिजनहृदयानि सर्वमन्यदन्धकारतां तिमिरमनयत्। क्रमेण च रवि
रस्तमुपयात इत्युपलभ्य सञ्जातवैराग्य इव धौतदुकूलवल्कलधरः सताराक्षसूत्रः पर्यन्तस्थितनक्ष
त्रतिमिरतमालवनलेखं सप्तर्षिमण्डलाध्युषितमरुन्धतीसंचरणपवित्रितमुपहिताषाढमालक्ष्यमा
णमूलमेकान्तस्थितचारुतारकमृगममरलोकाश्रममिव गगनतलममृतदीधितिरध्यतिष्ठत्। चं
द्राभरणभूतरत्नाकरकाशितकपालशकलालंकृतादम्बरतलात्र्यम्बकोत्तमाङ्गादिव गंगास्रोतसा सारवाद्दा
स्रवन्ती हंसधवला धरणिमपतज्ज्योत्स्ना। हिमकरसरसि विकचपुण्डरीकसिते चन्द्रिकाजलपा
नलोभादवतीर्णो निश्चलमूर्तिरमृतपङ्कलग्न इवादृश्यत हरिणः। तिमिरजलधरसमयापगमदा

नंतरमभिनवसिंदूरवारिकृतस्नानमपांडुरैरंगनानागनैरुपागंतहंसैरिवकण्ठदरसरोसिचंद्रपादैः विगलितस
कलोदयारागं रजनिकरबिंबमंबरापगावगाहधौतसिंदूरमैरावणकुंभस्थलमिव तत्क्षणमलक्ष्य
त । शनैः शनैश्च दूरोदिते भगवति हिमकरे हिमसलिलनिकरधौतधूलिनेव धवलीकृतेन चंद्रातपेन जगा
ति । श्रवश्यायजलबिंदुपतनमंदगतिषु विघटमानकुमुदषंडकषायपरिमलेषु समुपोढनि
द्राभरालसतारकैरन्योन्यग्रथितपक्ष्मपुटैरारब्धरोमंथरसैर्वनगैर्मन्थरगैरभिनंदितागमनेषु प्रवात्सु
निशासमीरणेषु अर्धयाममात्रावशेषितायां विभावर्यां हारीतः कृताहारं समादाय सर्वैस्तैः सह मु
निभिः उपसृत्य चंद्रातपोद्भासिनि वनैकदेशे वेत्रासने सुखोपविष्टमनतिदूरवर्तिना जालपादेना
नाशिष्येण पवित्रपाणिना मंदं मंदमुपवीज्यमानं पितरमवोचत् । तात सकलेयमस्मच्छ्रवणकु
तूहलाकुलितहृदया समुपस्थिता तापसपरिषदाबद्धमंडला प्रतीक्षते अपगतश्रमश्चायं कृतः पत्रि
पोतः तदावेद्यतां यदनेन कृतं किंचिदपरस्मिन्जन्मनि कोयमभूद्भविष्यति वा । इत्येवमुक्तस्तु म
हामुनिरग्रतः स्थितं मामालोक्य तांश्च सर्वानेकाग्रान् श्रवणतत्परान् मुनीन्बुद्ध्वा शनैरब्रवीत् । श्रूय
तां यदि कौतूहलमस्ति । त्रिभुवनललामभूता प्रसवभूमिरिव कृतयुगस्य जन्मनिवासोचिता भ
गवता महाकालाभिधानेन भुवनत्रयसर्गस्थितिसंहारकारिणा प्रमथनाथेनापरेव पृथिवी समुत्पा

ष्टिता । द्वितीयपृथिवीशंकयाच जलनिधिनेव रसातलगंभीरेण जलपरिखावलयेनपरिवृता । पशु
पतिनिवासप्रीत्याच गगनतलोल्लेखिशिखरमालिना कैलासगिरिणेव सुधासितेन प्राकारमंडले
नपरिगता प्रकटशंखशुक्तिमुक्ताप्रवालमरकतमणिराशिभिश्चामीकरचूर्णवालुकानिकरनिचि
तैरायामिभिरगस्त्यपरिपीतसकलसलिलैः सागरैरिव महाविपणिपथैरुपशोभिता । सुरासुर
सिद्धगंधर्वविद्याधरोरगाध्यासिताभिश्चित्रशालाभिरवलोकनकुतूहलादवतीर्णाभिर्दि
व्यविमानपंक्तिभिरिवालंकृता । मथनफलत्रस्यसिंधुधवलमन्दरद्युतिभिः कनकमयामलसार
कशोभैरनिलदोलायमानसितध्वजैरुपरिपतत्त्रभाभ्रगङ्गैरिव तुषारगिरिशिखरैरमरमन्दिरै
र्विराजितशृङ्गाटका । सुधावेदिकोपशोभितोदपानैर्नवपवनचलितजलघटीयन्त्रसिच्यमानह
रितोपवनान्धकारैः केतकीधूलिधूसरैरुपशल्यकैर्विभूषिता मदमुखरमधुकरपटलान्धका
रितनिष्कुटा स्फुरदुपवनलतापरिमलसुरभिसमीरणावाणितवर्णैरालोहितताम्रकपताकैः
श्वासबद्धरक्तचामरैः विद्रुममयैः प्रतिभवनप्रतिष्ठितैर्मकराङ्कैः मदनयष्टिकेतुभिः प्रकाशितमक
रध्वजपूजा सततप्रवृत्ताध्ययनध्वनिधौतकल्मषा । स्तिमितमुरजरवगम्भीरगर्जितेषु स
लिलशीकरासारवर्षिषु विविधकुसुमसारसवलवकरचितसुरचापचारुषु धारागृहेषु मत्तम

का॰
हं॰
१९
29

यूरमण्डलैरामण्डलीकृतशिखण्डैस्ताण्डवव्यसनिभिराबध्यमानकेकाकोलाहला विकच
कुवलयकान्तैरुत्फुल्लकुमुदधवलोदरैः अनिमिषदर्शनरमणीयैराखण्डललोचनैरिव सहस्र
स्रसंख्यैरुद्भासिता सरोभिः । अविरलकदलीवनकलिताभिरमृतफेनपुञ्जपाण्डुरिताभि
र्दिशिदिशि ग्रहग्रणानां आचार्यआचाराणां धाताधर्माणां शेषाहिरिव महीभारधरणक्षमः
सलिलनिधिरिव महासत्त्वः जरासन्धइवप्रकटितसन्धिविग्रहः त्र्यम्बकइवप्रसादितदु
र्गः युधिष्ठिरइवधर्मप्रभवः सकलवेदवेदाङ्ग·विदशेषमङ्ग·लैकसारो बृहस्पतिरिव शुनासी
रस्य कविरिव वृषपर्वणः वसिष्ठइव दशरथस्य धौम्यइवाजातशत्रोः दमनइवनलस्य सर्वे
कार्येष्विव हितमतिरमात्यब्राह्मणः शुकनासोनामासीत् । योनरकासुरशास्त्रप्रहारभूषणे
भ्रमन्मन्दरानितम्बानिर्दय निष्पिष्टकठिनांसपीठे श्रीनारायणवक्षःस्थलेपिस्थितामङ्कव
लाभाममन्यत प्रज्ञाबलेन लक्ष्मी । यंचसमासाद्यदर्शिनराज्यफलालनेवमहापादपमने
कप्रतानगहना विस्तारञ्चपयप्योमज्ञा यस्यचानेकचारप्रकृष्टसहस्रसञ्चारविदिते चतुरु
दधिवलयपरिक्षेपप्रमाणे धरणीतलेभवनइवाविधितमहरहस्तद्धासितमपि किञ्चिन्नासी
त् ॥ सराज्ञाबालएवसमरतरुजरकरपीवरेण राजलक्ष्मीलीलोपधानेन सकलजगदभयप्र

गे॰
१९

दानयज्ञदीक्षायूपेन स्फुरदसिलतामरीचिजालजटिलेन निखिलारातिकुलप्रलयधूमकेतुना द
ण्डेन बाहुना विजित्य सप्तद्वीपवलयां वसुन्धरां तस्मिंश्चैकनामनाम्नि मित्रे शुक्रहृदीव रा
ज्यभारमारोप्य सुस्थिताः प्रजाः कृत्वा कर्तव्यशेषमपरमपश्यन् । प्रशमिताशेषविपक्षतया
विगतशङ्कः शिथिलितपृथ्वीव्यापारः प्रायो यौवनसुखान्यनुबभूव । तथाहि । कदाचिदु
ल्लसत्कठोरकपोलफलकजर्जरितकर्णपल्लवानां मानिनीनां चन्दनजलच्छटाभिरिव स्मित
सुधाच्छविभिरभिषिच्यमानः कर्णोत्पलैरिव लोचननालैरभिताड्यमानः कुङ्कुमवासधू
लिभिरिवाभरणप्रभाभिराकुलीक्रियमाणलोचनः धवलांशुकैरिव करनखमयूखजाल
कैराच्छाद्यमानः चम्पककुसुमदलमालिकाभिरिव भुजलताभिराबद्ध्यमानः दष्टाधरधुत
करतलचर्मणि वलयचर्मणि वलयकलरववरमणीयमणितैरिव रभसदलितदन्तपत्रदलद
न्तविनिपातनत्रासितमचरणानलगलदलक्तकारक्तशोणैरे रभसकचग्रहहर्षितानमाणिक्यकर्ण
पूरप्रहसितजघनचक्रसमाग्रस्पर्शपङ्कःप्रचलनाङ्कितपद्मदमग्नकुङ्कुमजलकर्णिकाचलितरोचना
तिलकपत्रलङ्कुःमनङ्कुःपरवशाः स्फुरतमानननान । कदाचिन्मकरकेतनकनकनटाचपरम्प
राभिरिव कामिनीकरस्फटाविनिर्गताभिः कुङ्कुमजलधाराभिः पिञ्जरीक्रियमाणकायो ला १

का॰
दं॰
३॰
30

त्ताजलच्छटामञ्जरपाटलीकृतदुकूलः मृगमदजलबिन्दुशबलचन्दनश्यामलः कनकशृङ्ग
कोशोस्थितैरंचिक्रीड । कदाचित्कुचचन्दनचूर्णधवलोर्मिमालि चटुलितलताकोटिवाचालच
रणालक्तकसिक्तकलहंसमिथुनं श्रवणनिपतितकुसुमशरं प्लवमानकर्णोत्पलवलयद
लं उन्नमितनम्बसञ्चोभजर्जरिततरङ्गः मृदूलितनालपर्यस्तनलिननिपतितधूलिपटलम
नवरतकरास्फालनेस्फुरत्फेनबिन्दुचन्द्राङ्कितमवरोधजनेन सह जलक्रीडया गृहदीर्घिका
णामभ्यस्वकार । कदाचित्सङ्केतवञ्चिताभिः प्रणयिनीभिरवबद्धभ्रुकुटिभिरावर्ण
नमाणिमालिहार्यमुखरभुजलताभिः बकुलकुसुमावलीसंयतचरणैर्नखकिरणविमिश्रैः
कुसुमदामभिः कृतापराधो दिवसमनायत ॥ कदाचिद्बकुलतरुरिव कामिनीगण्डूषशी
धुरासवास्वादप्रदिनो विकासमभजत । कदाचिदशोक इव पवनाञ्चितचरणनलप्रहारसङ्क्रान्त्राल
नैको रागमुद्वाह । कदाचिन्मलयाचल इव चन्दनधवलः कण्ठावसक्तलोलकुसुममालः
पानमसेवत कदाचिद्वन्यगज इव मदरक्तकपोलदोलायमानकर्णपल्लवो मदकलः काननं
विकचवनलताविलयसुरभिपरिमलं जगाहे । कदाचित्काञ्चनमणिनूपुररवनिनादानन्दितमा
नसो हंस इव कमलवनेषु रेमे । कदाचिन्मृगपतिरिव स्कन्धावलम्बिनकेसरमालः क्रीडा

गं॰
३०

पर्वतकेषु विजहार । कदाचिन्मधुकर इव विजृम्भमाणकुसुमगुल्मलतान्तरेषु ललनासहस्रेषु बभ्र-
म । कदाचिन्नीलपटरचितावगुण्ठनो बहुलनिशाप्रदोषोद्गतसमुत्कण्ठिताः सुन्दरीरभिससार । क-
दाचिच्च विघटितकनककुम्भवाटप्रकटवातायनेषु । अनवरतदह्यमानकालागुरुधूमवल्लीभिरवि-
रतावितैरध्यासितविटङ्केषु महाप्रासादकुक्षिषु कतिपयाप्तस्त्रीहस्तविहितो वीणावेणुरवज-
मनोहरमन्तःपुरसङ्गीतकं ददर्श । किं बहुना । यद्यदतिरमणीयमभिमतमविकलमायत्तं
तदात्वे च तत्तदनाद्विग्नचेताः परिसमाप्तत्वादन्येषां पृथिवीव्यापाराणां सिषेवे तद्व्यसनि-
तया । सुदिनप्रजस्य हि परिसमाप्तसकलप्रयोजनस्य नरपतेर्विषयोपभोगलीला भूषणम्
इतरस्य तु विडम्बना प्रजानुरागहेतोश्चानुरागाद्दर्शनं ददौ । सिंहासनं च निमित्तेष्वारोह-
च्छुकनासोऽपि तं महान्तमपि भारमनायासेनैव प्रज्ञाबलेन बभार । यथा च राजा सर्वकार्याण्य-
कार्षीत् तद्वदसावपि द्विगुणीकृतप्रजानुरागश्चक्रे । तमपि चालितचूडामणिमणिमरीचि-
मञ्जरीमालाभिः मौलिभिरावर्जितकुसुममौलेरवनतमथाश्रीकरसिक्तसभं हरावनतिमे-
हितमणिकुण्डलकोटिसंघट्टिताङ्कुं दे राजकमानताम । तस्मिन्नपि चालिते चलितवङ्कल-
हि र कुं बलप्रावरवबधिरीकृतभुवनाः बलभयप्रचलवसुधातलदोलायमानगिरयः ।

का॰ दे॰ ३१

गलन्मदान्धगन्धगजघटान्धकारिताः संसर्पत्त्रिबहलधूलिपटलधूसरितसिन्धवः प्रबलपदाति
बलकलकलरवस्फोटितश्रवणाः सरभसोद्घुष्यमाणजयशब्दनिर्भराः सोद्धूयमानधवलचामर
सहस्रसंछादिताः प्रज्ज्वलितनरेन्द्रवृन्दक नकदण्डातपत्रसङ्कटनष्टदिवसातपादशादिशो
बभूवुः । एवं च तस्य राज्ञो मन्त्रिविनिवेशितराज्यभारस्य यौवनसुखमनुभवतः कालो जगाम
भूयसा च कालेनान्येषामपि जीवलोकसुखानामर्थिः सर्वेषामन्तयर्यो एकं तु सुतदर्शनसुखं
न लेभे । तथा संभोज्यमानमपि निष्फलशृङ्गारदर्शनं शारदृतनावनमिवान्तःपुरमभूत् । यथा
यथा च यौवनमतिचक्राम तथा तथा विफलमनोरथस्यानपत्यताजन्मा महानवर्धत संतापः
विषयोपभोगसुखेभ्यश्च मनो विजगर्हे । नरपतिसहस्रपरिवृतमप्यसहायमिव चक्षुष्मन्त
मप्यन्धमिव भुवनालम्बनमपि निरालम्बमिवात्मानमत्यन्तमन्यत । अथास्य चन्द्रलेखेव
हरजटाकलापस्य कौस्तुभप्रभेव कैटभारातिवक्षःस्थलस्य वनमालेव मुसलायुधस्य वेला
व सागरस्य मदलेखेव दिग्गजस्य लतेव पादपस्य कुसुमोद्गतिरिव सुरभिमासस्य चन्द्रिकेव
चन्द्रमसः कमलिनीव सरसः तारापङ्क्तिरिव नभसः हंसमालेव मानसस्य चन्दनवनराजिरिव
मलयाचलस्य फणामणिशिखेव शेष स्य भूषणमभूत् त्रिभुवनस्य विस्मयजननी जननीव वनि

ग्रे॰ ३१

ताविभ्रमाणां सकलान्तःपुरप्रधानभूता महिषी विलासवती नाम। एकदा च तदावासमुपगतस्तां
चिन्तास्तिमितदृष्टिना शोकमूकेन परिजनेन परिवृतां मौनादवस्थितैश्च ध्यानामीलितलोचनैः
कञ्चुकिभिरुपास्यमानामनतिदूरवर्तिनीभिश्चान्तःपुरवृद्धाभिराश्वास्यमानां चाविरलास्रबिन्दु
पातार्द्रीकृतदुकूलामनलङ्कृतां वामकरतलविनिहितमुखकमलामसंयतालकां
निविडपर्यङ्कोपविष्टां तां रुदतीं ददर्श। कृतप्रत्युत्थानां तां तस्यामेव पर्यङ्किकायामु
पवेश्य स्वयं चोपविश्याविज्ञातबाष्पकारणो भीतभीत इव करतलेन बाष्पाम्भःकणोज्ज्वलौ क
पोलौ भूमिपालस्तामवादीत्। देवि किमर्थमिदमनुद्गतगुरुशोकभारमन्थरमशब्दं रुद्यते
ग्रथितमुक्तामुक्ताफलजालकमिव बाष्पबिन्दुनिकरमनारतमवबध्नन्ति पक्ष्मपङ्क्तयः किमिति त्वमत्र
किमर्थं च कृशोदरि नालङ्कृतासि बालातपरक्तारविन्दकोशयोः किमिति न मानिनि
चरणयोरलक्तकरसः। उन्मदसारसः कलहंसकौ कस्मात्पादपङ्कजस्पर्शेनानुगृही
तौ मणिनूपुरौ। किंनिमित्तमयमपगतमेखलाकलापमूको मध्यभागः। किमिति च हरि
णाङ्क इव हरिणलाञ्छने न लिखितः कस्तूरिकापत्रभङ्गः पयोधरभारे। केन कारणेन तन्वी
यं हरजटाजूटचन्द्रलेखेव गङ्गास्रोतसा न भूषिता हारेणावरोपितपयोधरा किमुत्थावहसि शि

का॰ दे॰ ३२

32

लासिनि स्रवदस्रुजललवधौतकुङ्कुमपत्रलताङ्कं कपोलफलकं । इदं च कोमलाङ्गुलिदलं
रक्तोत्पलमिव करतले केन ते कर्णपूरत्वमारोपितं इमां च केन हेतुना मानिनि धारयस्यनुपरचितो
रचनाबिन्दुतिलका मलकिनी ललाटिकालेखां । अयं बहुलपक्षप्रदोष इव चन्द्रलेखाविरहितः
करोति मे हृदि खेदं बहलतिमिरपटलान्धकारः केशपाशः प्रसीद निवेदय देवि दुःखनिमित्तं ।
इदं हि पल्लवमिव सरागं मे हृदयमाकम्पयन्ति तरलीकृतस्तनांशुकास्तवायताः श्वाससमारुताः कच्चि
न्मयापराद्धं अन्येन वा केनचिदस्मदुपजीविना परिजनेन । अतिनिपुणमपि चिन्तयन्न पश्यामि ख
लु स्खलितमल्पमप्यात्मनस्त्वद्विषये त्वदायत्तं हि मे जीवितं राज्यं च कथ्यतां सुन्दरि शुचः कारणं
इत्येवमभिधीयमानापि यदा न किञ्चित्प्रतिवचः प्रतिपदे विलासवती तदा विहाय बाष्पहेतुमस्याः
परिजनमपृच्छत् । अथैनमस्यास्ताम्बूलकरङ्कवाहिनी सततमत्यासन्ना मकरिका राजानमुवाच ।
देव कुतो देवादल्पमपि स्खलितं अभिमुखे च देवे का शक्तिः परिजनस्यान्यस्य वा कस्यचिदपराद्धुं
महाग्रहग्रस्तेव विफलनरेन्द्रसमागमास्मीत्ययमस्या देव्याः सन्तापः । सुमहांश्च कालः सन्ताप्य
मानायाः प्रथममपि स्वामिनी दानवश्रीरिव सततनिन्दितमन्वरता शयनस्नानभोजनभूषणपरि
ग्रहादिषु समुचितेष्वपि दिवसव्यापारेषु कथं कथमपि परिजनेन प्रयत्नादनुवर्त्यमाना सशोकेव

दे॰ ३२

सीत् देवहृदयपीडापरिजिहीर्षया दर्शितनवतीनविकारं अद्यतु श्रीभगवन्तं महाकालमर्चयि
तुं इतोगतेनयात्रमहाभारते वाच्यमाने श्रुतमपुत्राणां किलनसन्ति लोकाः शुभाः पुन्नामनर
कात्त्रायते इतिपुत्रः इत्येतच्छ्रुत्वाभवनमागत्य परिजनेनसादरं प्रणाममभ्यर्थ्यमानापि ना
हारमभिनन्दति नभूषणपरिग्रहमाचरति नोत्तरंप्रतिपद्यते केवलमविरलबाष्पबिन्दुनान्ध
कारितमुखी रोदितीत्येतदाकर्ण्यदेवःप्रमाणम् इत्यभिधायविरराम। विरतवचनायान्तस्यांभू
मिपालस्तूष्णींमुहूर्तंस्थित्वा दीर्घमुष्णंच निःश्वस्यनिजगाद देविकिमत्रक्रियतां दैवायत्ते व
स्तुनि अतिमात्रमलंरुदितेन नवयमनुग्राह्याः प्रायोदेवतानां आत्मजपरिष्वङ्गसुखास्वादस्य
त्वमप्यभाजनमस्माकंहृदयं अस्मिञ्जन्मनिनकृतमनवदातंकर्म जन्मान्तरविहितं हि फलमु
पनमतिपुरुषस्येहजन्मनि नशक्यंदैवमन्यथाकर्तुमभियुक्तेनापि यावन्मानुष्यके शक्यमु
पपादयितुं तावत्सर्वमुपपाद्यतां अधिकांकुरुदेविगुरुषुभक्तिं द्विगुणमुपपादयदेवतापूजां
ऋषिजनसपर्यासुचदर्शितादराभव परंहिदैवतमृषयः यत्नेनाराधिता यथासमीहितफला
नामतिदुर्लभानामपिवराणांदातारोभवन्ति श्रूयतेच चण्डकौशिकप्रभावान्मगधेषुबृहद्रथो
नामराजाजनार्दनस्यप्रतिमल्लंभुजबलमप्रतिरथंजरासन्धंनामतनयंलेभे। दशरथश्चराजा

का॰ दं॰ ग्र

33

परिणतवया विभाण्डकमहामुनिसुतस्य प्रसादान्नारायणभुजानिवाप्रतिहतशक्तीनुदधीनिवाक्षोभ्या
नवाप चतुरः पुत्रान् । अन्ये च राजर्षयस्तपोधनानाराध्य तनयदर्शनामृतास्वादसुखभाजो बभूवुः
अमोघफला हि महामुनिसेवा । ममापि खलु देवि कदा समुपारूढगर्भभरालसामापाण्डुरमुखी
मासन्नपूर्णचन्द्रोदयामिव पौर्णमासीनिशां देवीं द्रक्ष्यामि कदा मे तनयजन्ममहोत्सवानन्दनिर्भरो
हरिष्यति पूर्णपात्रं परिजनः कदा हारिद्रवसनधारिणी सुतसनाथोत्सङ्गा द्यौरिवोदितरविमण्ड
ला सबालातपा मामानन्दयिष्यति देवी कदा सर्वौषधिपिञ्जरजटिलकेशो निहितरक्षाघृतबिन्दुनि
तालुनि विन्यस्तगौरसर्षपो भिमृष्टभस्मतिलकः गोरोचनालिखितचित्रकण्ठसूत्रग्रन्थिरुत्तानशा
योद्यानस्तन्यः स्मिताननः पुत्रको जनयिष्यति मे हृदयाह्लादं कदा गोरोचनाकपिलद्युतिरन्तः
पुरिकाकरतल परम्परया सञ्चार्यमाणमूर्तिरशेषजनाभिनन्दितो मङ्गलप्रदीप इव मे शोकान्ध
कारमुन्मीलयिष्यति चक्षुः । कदा क्षितितलरेणुधूसरो मण्डयिष्यति मम हृदयेन हर्षं च स
ह्रपविभ्रमन्नवराङ्गनं कदा केसरिकिशोरकमिव गात्रचङ्क्रमणावस्थः सञ्चरिष्यतीतस्ततः
स्फटिकमणिभित्तिप्रतिबिम्बितान्भवनमृगगणानवकाङ्क्षिपुत्रकः । कदान्तःपुरिकानूपुरनिनादसङ्गता
न्गृहकलहंसकाननुसरन्नव्याजाम्बरमधावितः कनकमेखलाघण्टिकारवानुसारिणीमायासयि

गं॰ ग्र

ष्यति धात्री । कदा स्नानगृहपङ्कलिलिखितपत्रलेखो मणिकुट्टिमतलेष्वस्खलो ऽस्य विदिण्डिमध्वनितजनित
प्रीतिरूर्ध्वकरविप्रकीर्णचन्दनधूलिराङ्गणचितानुकूलिशिखिवराङ्कुशाकर्षणेन विधुननशिरःकरि
ष्यति मत्तगजलीलाक्रीडां कदा मातृस्वरणायकगलरागोपयुक्तः शोभेण पिण्डालक्तकरसेन वृ
द्धकाञ्चुकिनां विडम्बयिष्यति मुखानि कदाञ्जनतूलचञ्चललोचनो मणाङ्कहिमेषधोमुखेह
ष्टिरन्तर्मतिष्यति स्वलङ्कृतिरात्मनः प्रतिबिम्बकानि कदा नरेन्द्रसहस्रप्रसारितभुजयुगलाभि
नन्द्यमानागमनो भूषणभूमिमणिमयूखलेखाकुलीक्रियमाणलोलदृष्टिरास्थानस्थितस्य मेऽङ्क
ऽन्तःपर्यटिष्यति सभाङ्गणेषु । इत्येतान्यन्यानि च मनोरथशतानि चिन्तयन्त्योऽन्तः मन्त्राप्यमानस्य मेऽर्थ
त्रिरजन्यः । मामपि दहत्यवायमुद्धन्निशामनपत्यतासमुद्भवः शोकः शून्यमिव मम भाति जग
द्दीवलं अफलमिव पश्यामि राज्यं अप्रतिविधेये तु विधातरि किं करोमि । तदुच्यतामयं देवि शो
कानुबन्धः आधीयतां धर्मे धैर्ये च धीः धर्मपराणां सदा समीपसञ्चारिण्यः कल्याणसम्पदो भवन्ति
इत्येवमभिधाय स्वयं करतलेनाभिनवपल्लवकोमलेन विकचकमलोपमानमाननं तस्याः साश्रु
लेखममार्ज । पुनः पुनश्च प्रियशतमधुराभिः शोकापनोदननिपुणाभिर्धर्मोपदेशगर्भाभिर्वाग्भि
रास्वास्य सुचिरं स्थित्वा नरेन्द्रो निर्जगाम । निर्गते च तस्मिन्मन्दीभूतशोकावेगा विलासवती यथा

का॰
दं॰
त्रय
34

क्रियमाणमाभवनात्परिग्रहादिति समुपविष्टवानासद्व्यापारमन्वतिष्ठत् । ततः प्रभृति च सुतरां देवताराध
नेषु ब्राह्मणपूजासु गुरुजनपरिचर्यासु चाधिकमादरवती बभूव यच्च यतः किञ्चित्कुतश्चिच्छुश्राव त
त्तद्गर्भकामतया सर्वं चकार । सुमहान्तमपि क्लेशं नागणयत् अनवरतदह्यमानगुग्गुलुबहल
धूमान्धकारितेषु चण्डिकामन्दिरेषु धवलाम्बरा शुचिर्विमुक्तिरुपोषिता हरितकुशोपच्छदेषु पल्ल
वशयनेषु सुष्वाप । पूर्णसलिलपरिपूर्णैर्विविधकुसुमफलोपेतैः क्षीरतरुपल्लवलाञ्छनैः
सर्वरत्नगर्भैः शातकौम्भकुम्भैर्गोकुलेषु वृद्धगोपवनिताहृतमङ्गलालङ्कृतानां लक्षणसम्पन्नानां गवामधः
सस्नौ । प्रतिदिवसमुत्थायोत्थाय सर्वरत्नोपेतानि हैमानि तिलपात्राणि ब्राह्मणेभ्यो ददौ । महा
नरेन्द्रलिखितमण्डलमध्यवर्तिनी विविधबलिदानानन्दितदिग्देवतानि बहुलपक्षचतुर्दशीनि
शासु चत्वरेषु स्नपनमङ्गलानि भेजे । सिद्धायतनानि कृतविविधदेवतोपयाचितकानि सिषे
वे । दर्शितप्रत्यादेशानि सन्निहितमातृभवनानि जगाम प्रसिद्धेषु नागह्रदेषु ममज्ज अश्वत्थप्र
भृतीनुपपादितपूजान्महावनस्पतीन्कृतप्रदक्षिणा ववन्दे । दोलायमानधवलमणिवलयेन
पाणिकमलेन स्नात्वा स्वयमेवाऽऽर्द्रसिनासिक्तसम्पादितं रजतपात्रपरिगृहीतं वयसेभ्यो दधिब
लिमदात् । अपरिमितकुसुमधूपधूपलम्पायससबलिजालकलिलामहरहर्जेपे दुर्गादेवी

गे॰
त्रय

सपर्य्यामानतान् स्वयंप्रयाह्नतपिण्डपाताभक्तिप्रवणेन मनसा सिद्धादेशान् क्षपणकान्पप्रच्छ
निमित्तिकादेशोवचनानि बहुमेने निमित्तज्ञानुपचचार शाकुनज्ञानविदामादरमदर्शयत् । अ
नेकवृद्धपरम्परागतागमानि रहस्यानि चकार । दर्शनागतं द्विजजनं नमात्मजन्मदर्शनोत्क
कावेदीपश्रुतीरकारयत् । अनवरतवाच्यमानाः पुण्याः कथाः शुश्राव गोरोचनालिखितभू
र्जपत्रगर्भान्मन्त्रगण्डकान् बाहू रक्षाप्रतिसरोपेतान्योषधिसूत्राणि बबन्ध । परिजनोपि चा
स्याः सततमुपश्रुत्यै निर्जगाम वाग्निमित्तानि च जग्राह शिवाभ्यो मातृभ्यो बलिपिण्डमन्वाद
नेनिषुप्रत्यसृजं स्वप्नदर्शनानि यथा एव चचक्ष चत्वरेषु शिवबलिमुपजहार च । एवं गच्छति
काले कदाचिद्राजा क्षीणभूयिष्ठायां रजन्यामल्पावशिष्टपाण्डुरतारके जरत्पारावतपक्ष
धूम्रे नभसि स्वप्ने सितप्रासादशिखरस्थिताया विलासवत्याः करिण्या इव बिसपल्लवमा
ननं सकलकलाकलापपरिपूर्णमण्डलं शशिनं विशन्तमद्राक्षीत् । सप्रबुद्धश्चोत्थाय हर्ष
विकासस्फारितनयनतारकेण चक्षुषा धवलीकृतवासभवनः तस्मिन्नेव क्षणे समाहूय
शुकनासाय तं स्वप्नमकथयत् । स च समुपजातहर्षः समुवाच देव सम्पन्नाः सुचिराद
स्माकं प्रजानां च मनोरथाः कतिपयैरेवाहोभिरसंशयमनुभवति स्वामी सुतमुखकमला

का॰
द॰
३५

35

वलोकनं सखे। अद्य खलु मयापि निशि स्वप्ने धौतधवलवाससा प्रशान्तमूर्तिना दिव्याकृतिना
द्विजेन विकचचन्द्रकलावदातदलशालिनमालोलकेसरसहस्रजटालं मकरन्दमधुशीकरवर्षि
पुण्डरीकमुत्सङ्गे विनिहितं दृष्टं। आवेदयन्ति हि प्रत्यासन्नमानन्दमग्रपातीनि शुभानि निमित्ता-
नि। किं वान्यत्प्रियं नरमयपरमानन्दकारणमतो भविष्यत्यवितथफलाश्च प्रायेण निशावसानस-
मये दृष्टा भवन्ति स्वप्नाः। सर्वथा नचिरेण मान्धातारमिव धौरेयं सर्वराजर्षीणां भुवनानन्दहे-
तुमात्मजं जनयिष्यति देवी शरत्कमलिनीवाभिनवकमलोद्गमेन गन्धगजमाह्लादयिष्य-
ति। देव येन दिग्गजमदलेखेवोच्छिन्नसन्तानाहितनिभारधारणोचिता भविष्यति कुलसन्ततिः
स्वामिनः इत्येवमभिदधानमेव तं करे गृहीत्वा नरेन्द्रः प्रविश्यान्तःपुरमुभाभ्यामेताभ्यां स्वप्नाभ्यां
विलासवतीमानन्दयांचकार। कतिपयदिवसापगमे च देवताप्रसादात्सरसीमिव प्रतिमा-
शशी विवेश गर्भो विलासवतीम्। येन नन्दनवनराजिरिव पारिजातेन मधुसूदनवक्षःस्थ-
लीव कौस्तुभमणिना नितरामराजत। दर्पणश्रीरिव गर्भच्छलेन सङ्क्रान्तमवनिपालप्रतिबि-
म्बमुद्वाहसा। शनैः शनैश्च प्रतिदिनमुपचीयमानगर्भा निर्भरापि पीतसागरसलिलभर-
मन्थरेव मेघमाला मन्दमन्दं सञ्चचार। अजस्रजृम्भारम्भजृम्भिकमाजिह्मितलोचनं सालसं।

गो॰
३५

निश्वासा । तथावस्थां च तामहरहः स्वयमनेकवस्तुवाञ्छितपानभोजनां आहर्षमिव प्रणामाय
मानपयोधरमुखीं केतकीमिव गर्भपाण्डुतामालोक्येङ्गितज्ञशालः परिजनो विज्ञातवान् । अथ
तस्याः सर्वपरिजनप्रधानभूता सदा राजकुलसंवासचतुरा सदा च राजसमीपवर्तिनी कार्यप्रगल्भा सर्वम
ङ्गलकुशला कुलवर्धमाना नाम महत्तरिकासीत् । सा प्रसङ्गात्तद्दिवसे प्रदोषवेलायामभ्यन्तरमास्था
नमण्डपगतं गन्धतैलावसेकज्वलितदीपिकासहस्रपरिवारमुडुनिकरमध्यवर्तिनमिव पौर्णमासी
भोगिनं उरगराजफणामणिसहस्रान्तरालस्थितमिव श्रीनारायणं मूर्धाभिषिक्तैः प्रधाननरेन्द्रै
स्वापरिमितैः परिवृतमनतिदूरावस्थितपरिजनमनन्तरमुत्सृज्य वेत्रासनोपविष्टेन धौतधवलाम्ब
रपरिधानेनाकल्पवेषेण जलनिधिनेवागाधगाम्भीर्येण समयापादितविश्रम्भनिर्भरास्ताः कथाः
शुकनासेन सह कुर्वाणं भूमिपालमुपसृत्य रहः कर्णमूले विदितविलासवतीगर्भवृत्तान्तमकार्षी
त् । तेन तत्तस्या वचनेनाश्रुतपूर्वेणासम्भावितेनामृतरसेनेव सिक्तसर्वाङ्गस्य सद्यः प्ररूढरोमा
ङ्कुरनिकरकण्टकिततनोरानन्दरसेन निर्भरीक्रियमाणस्य स्मितविकासितकपोलस्थलस्य प
रिस्फुरितहृदयातिरिक्तं हर्षमिव दशनांशुवितानच्छलेन विकिरतो राज्ञः शुकनासमुखे लोलता
रकमानन्दजलबिन्दुक्लिन्नपक्ष्ममालं तत्क्षणं पपात चक्षुः । अनालोचनसर्वस्वं तं हर्षमसमीक्ष्य

का॰
टे॰
३६
36

कुवलयवर्धनां च स्मितविकसितश्रवणमागतां दृष्ट्वा तस्याश्चाथ स्वप्नमनन्तरं मनसि परिवर्तमानत्वादविदि
तवृत्तान्तोऽपि तत्कालोचितमपरमपि महतो हर्षस्य कारणमपश्यच्छुकनासः स्वयमप्येतस्म
न्नर्पितमानसः समीपतरमुपसृत्य नातिप्रकाशमाबभाषे । देव किमस्ति किंचिदस्मिन्स्वप्नदर्शने
सारं उत्फुल्ललोचनाह्नि कुवलयवर्धनाह्वयपत्ने देवस्यापीदं प्रियवचनश्रवणकुतूहलादिव श्रव
णमूलमुपसर्पद्भिरुपरचयतीव नीलकुवलयकर्णपूरशोभामानन्दजलपरिप्लुतितरलतारके
विकसदावेदयति महत्त्वहर्षकारणमीक्षणयुगले उपाहृतमङ्गलोत्सवश्रवणकौतुकसुहृत्को
त्हकं लाम्यति मे मनः तदावेदयतु देवः किमिदं इत्युक्तवति तस्मिन्राजा विहस्याह यदि सत्यम
नया कथितं तत्तथा सर्वमवितथं स्वप्नदर्शनं श्रद्दधेऽहं तत्र न श्रद्दधे जनोऽस्माकमियती भाग्यसम्पत् अ
भाजनं महत्त्वमयमीदृशानां प्रियवचनश्रवणानां अवितथवादिनीमपि कुवलयवर्धनामेवंविधानां क
ल्याणानामसम्भावितमात्मानं च मन्यमानो विपरीतमिवात्मानं पश्यामि तदुत्तिष्ठ स्वयमेव गत्वा कि
मत्रमन्यामिति देवीं दृष्ट्वा ज्ञास्याम इत्यभिधाय विसर्ज्य सकलं नरेन्द्रलोकमुन्मुच्य च स्वाङ्गेभ्यो भू
षणानि कुवलयवर्धनायै दत्त्वा तया च प्रसादानन्तरमवनितललग्नविलललाटलेखया शिरःप्रणामे
नाभ्यर्चितः सह शुकनासेनोत्थाय पवनचलितनीलकुवलयदललीलाविडम्बकेन दक्षिणेनाक्ष्णा

गें॰
३६

स्कन्धेनाभिनन्द्यमानः तत्कालमेवासमग्रचिन्तेन विरलविरलेन परिजनेनानुगम्यमानः प्रवः से

न्दपिरीणीनामनिललोलस्थूलशिखानां प्रदीपिकामालोकेन समुत्सार्यमाणकल्याणान्तरनिमि

त्संहतिरवद्रः प्रमयासीत् । तत्र च स्वहस्तरचितासे विधानेन वस्त्रधौतलेपधवलिते मञ्चालि

तमङ्गलसुवर्णकलशाधिष्ठितद्वारपक्षके सत्यग्रलिखितमङ्गलालेख्योज्ज्वलभित्तिभागे मनो

हारिणि उपरिविततविताने वितानपर्यन्तावसक्तमुक्तागुणे मणिप्रदीपप्रतिहततिमिरे

वासभवने भूमिविलिखितमङ्गलनयापरिक्षेपं शिरोभागविन्यस्तधवलनिद्राकलशमाबद्ध

विविधौषधिमन्त्रमवस्थापितरक्षासाक्षिवलयमितस्ततो विप्रकीर्णगौरसर्षपमवलम्बिबा

लयोङ्ग्रथितलोहपिप्पलदलमासन्नहरितारिष्टपल्लवमुत्तुङ्गः पादपीठप्रतिष्ठितमित्र

दीधिति धवलमच्छदपटमचलराजशिलातलविशालगर्भीकृतं शयनतलमधिशयानां

कनकपात्रपरिगृहीतैरविच्छिन्नविरलावस्थितदधिलवैर्जलतरङ्गैः नवलसितशालिसिक्तैर्नि

कैरग्रथितकुसुमाञ्जलिसनाथैः स्वर्णभाण्डकैरावेष्टितामममृत्स्यपलेश्च सत्यग्रपिष्टर

पिण्डमिश्रैरविच्छिन्नसलिलधारानुगम्यमानमार्गैः पटलकमञ्चलिनेस्थूलशीतलप्रदीपैः

गौरसर्षपैः सलिलाञ्जलिमिश्रै ग्राचवाऊमालेनान्नः प्रवर्जनेन क्रियमाणावतारणकम

ङ्गलो । धवलाम्बरविविक्तवेषेण प्रमुदितेन प्रस्तुतमङ्गलप्रायालापेन परिजनेनो·
पास्यमाना उपारूढगर्भतयान्तर्गतजलझोलामिव वाहिनीं सलिलमध्यैरावणामिव मन्दाकिनी
गुहागतसिंहामिव गिरिमाला जलधरपटलान्तरितदिनकरामिव दिवं उदयगिरितिरोहित
शशिमण्डलामिव विभावरीं अभ्यर्णवर्तिब्रह्मकमलनिर्गमामिव श्रीनारायणनाभिं आसन्नाग
स्त्योदयामिव दक्षिणाशां फेनावृतामृतकलशामिव क्षीरोदवेलां गोरोचनाविचित्रितदशामः
उपहसनमतिधवले दुकूलयुगलं वसाना विलासवतीं ददर्श ॥ ससम्भ्रमपरिजनप्रसारितक
रतलावलम्बनावष्टम्भेन वामजानुविन्यस्तहस्तपल्लवा प्रचलितभूषणमणिरवमुखरमुत्तिष्ठ
न्ती विलासवती अलमलमत्यादरेण देवि नास्यात्तत्त्वमित्यभिधाय सहैव तया तस्मिन्नेव शयनी
ये पार्थिवः समुपाविशत् । सम्पृष्टचामीकरचारुपादे धवलोपच्छदे वासने शायनान्ते शुकनासो
न्यषीदत् । अथ तामुपारूढगर्भामालोक्य हर्षभरमन्थरेण मनसा प्रस्तुतपरिहासो राजा देवि
शुकनासः पृच्छति यदाह कुलवर्धनात्ता किं तथैवेत्युवाच अव्यक्तस्मितस्फुरितकपोलाधरलो
चनात्तलज्जया दर्शनांसे शुकेनैव देहमाच्छादयन्ती विलासवती नत्वाननमधोमुखी तस्थौ । अ
नः पुनश्चानुबध्यमाना देव किं मामतिमात्रं त्रपापरवशां करोषि नाहं किञ्चिदपि वेद्मीति अ

अभिदधाना तिर्यक्कलितनतारेण चक्षुषावनतमुखी राजानं साभिसूयमिवापश्यत् । अपरिस्फुट
हासज्योत्स्नाविशदेन अवभाषिणा भूभुजां पतिरेनामभ्यूयो बभाषे । सुतनु यदि मदीयेन वचसा
न वत्रपा वितन्यते तदयमहं स्थितो निभृतं । अस्यास्तु किं प्रतिविधास्यसि विघटमानदलकोशवि
शदचम्पककान्तेः सर्वाङ्गीणतया परिम्लानिमीयमानत्वङ्माङ्गरागस्य पाण्डुतामापाद्यमानस्य
वर्णस्य । अनयोश्च गर्भसंभवान्मुखमेकनिर्वाप्यमानहृदयशोकानलप्रभवं धूममिवोद्वमतोः
तमालपल्लवलाञ्छितमुखयोरिव कनककलशयोः मरकतादिवालिखितकृष्णागुरुपङ्कप
त्रलतयोः श्यामायमानचूचुकयोः पयोधरयोः । अस्य वा प्रतिदिनमतिगाढतामापद्यमाने
नु काञ्चीकलापेन सूच्यमानस्य नष्टप्रायत्रिवलिलेखावलयस्याक्रम्यमाणमङ्गतो मध्यभागस्य इ
त्येवं ब्रुवाणमवनिपालमन्तर्निगूढहासः शुकनासः देव किमायासयसि देवी इयमनयाक
थयापि लज्जते त्यज कुलवर्धना कथितवार्तासम्बद्धमालापमस्मितमब्रवीत् । एवंविधाभिः
चानन्दप्रायाभिः कथाभिः सुचिरं स्थित्वा शुकनासः स्वभवनमयासीत् नरेन्द्रोपि तस्मिन्नेव वा
सगृहे तया सह तां निशामत्यवाहयत् । ततः क्रमेण यथासमीहितगर्भदोहदसम्पादनेन
प्रसूतिदिनासन्नप्रसवसमये प्रशस्तेहनि अनवरतगलज्जालिकाकलितकालकलैराहितनया ।

स्तनयोश्च पयोधरयोः किं प्रतिविधास्यसीति सम्बन्धः एवमग्रेपि

येणैकैः सहोनैः लग्नेषु प्रशस्तायां वेलायां मिव स्पष्टमिव जलधरमाला सकललोकहृदयानन्द-
कारिणं विलासवती सुतमसूत । यस्मिञ्जाते सम्भ्रमाभिपतता प्रधावितस्य परिजनस्य चर-
णशतसहस्रसंक्षोभितचलितनलिनितलः भूपालाभिषेकप्रहतस्वलङ्कृतिविकलकञ्चुकि-
सहस्रः जनसम्मर्दनिष्पिष्यमाणपतितकुब्जवामनगणः विघूर्णमानाङ्गःस्रस्तजनाभरणझ-
ङ्कारमनोहरः सर्वपात्रहरणविलुप्यमानवसनभूषणः संक्षोभितनगरो राजकुले हृदिह-
र्षसंभ्रमो महानभूत् । अनन्तरं च मन्दरमथ्यमानजलधिघोषगम्भीरदुन्दुभिध्वानपुरःसरेण
प्रहतमृदङ्गमृदङ्गशङ्खकाहललानकनिवहनिर्भरेण मङ्गलपटुपटहरवसंवर्धितेनानेकज-
नसहस्रकलकलबहुलेन त्रिभुवनमाप्यायन्नोत्सवकोलाहलघोषेण । समन्ततः सान्तःपुरः
सप्रकृतयः सराजलोकाः सवेशाधकवनयः सबालकवृद्धानन्दनृत्यरागोपालसुमत्ताह्नहर्ष-
निर्भराः प्रजाः । प्रतिदिनमवर्धत चन्द्रोदयेनेव जलनिधिः कलकलसुक्लेव राजसूनोर्जन्म-
महोत्सवः पार्थिवस्तु तनयाननदर्शनोत्सुकहृदयोऽपि दिवसावसाने मौहूर्तिकगणोपनी-
ते प्रशस्ते मुहूर्ते निवारितनिखिलपरिजनः शुकनासद्वितीयः मणिमयमङ्गलकलशोत्कग-
लास्वस्त्येन ग्रामस्रकबद्धप्रविष्टकालनताप्रतानेन विविधवनपल्लवनिवहनिरन्तरं निचितेन सन्निहि-

तकनकमयहलप्रहलकफलकेन अविरलग्रथितसितकुसुममिश्रदूर्वाप्रवालमालालङ्कृ-
तेन अविलम्बिताविकलव्याघ्रचर्मणा वन्दनमालान्तरालघटितेन घण्टागणेनालम्बितलोहितपि
प्पलदामसनाथेन द्वारदेशेन विराजमाने । उभयतस्तद्वारपत्रकयोर्मर्यादानिर्मणेन गोमय
मयीभिः स्नानविनिहितवराटकप्रकारदन्तुराभिरन्तरान्तराबहुविधवर्णरागरुचिकार्याच कु
ङ्कुमलेशलाञ्छिताभिः कुसुम्भकेसरलवाश्लेषलोहिताभिः लेखाभिरालिखितस्वस्ति
कजालमुपरचयता हरिद्राद्रवक्षरणपरिस्तरणपरिपिञ्जराम्बरधारिणीभगवती षष्ठी-
देवीकुर्वताविकचपत्रपुटशिखाशिखण्डमण्डलाधिरूढमालोललोहितपटचिह्नितपताक
मुल्लसितशक्तिदण्डं कार्तिकेयमर्चयता विन्यस्तालक्तकपटलपाटलमध्यभागो सूर्याच
न्द्रमसो अवधूतकुङ्कुमपङ्कपिञ्जरीकृताम्मूर्ध्नोनकनकमययवनिकारकाण्डकिनीम् ।
अविरललग्नगौरसिद्धार्थप्रकरतया काञ्चनरसलवखचितामिव । मृण्मयगण्डकक
टम्बकमालां विन्यस्यता चन्दनजलधवलितेषु भित्तिशिखरभागेषु पञ्चरत्नविरचि
तचीरकलापचिह्नाम् ॥ आपीनपिष्टपहाङ्कितां वर्धमानकपरम्परामन्यानि च प्रसव

गृहमङ्गलमण्डनानि समादधता प्रबन्धिवर्गेण समधिष्ठितम् ॥ उपहारसंयतविविध
गन्धकुसुममालालङ्कृतजरच्छागम् अविरलव्रीहिमध्यावस्थितनार्यवृद्धाध्यासितशयन
शिरोभागं । अनवरतदह्यमानाज्यमिश्रभुजगनिर्मोकमेषविषाणक्षोदम् अनलरक्ष
क्ष्यमाणपल्लवम् उल्लसितचन्दनधूपगन्धम् अध्ययनप्रवृत्तद्विजविकीर्यमाणशान्त्यु
दकलवं अभिनवालिखितमातृपटपूजाव्यग्रधात्रीजननम् अनेकवृद्धाङ्गनारब्ध
स्थितिमङ्गलगीतिमनोहरम् । उत्पाद्यमानस्वस्त्ययनं क्रियमाणशिशुरक्षाबलि
विधानं । आसाद्यमानधवलकुसुमदामकमानमाञ्छिन्नपठ्यमानश्रीनारायणनाम
सहस्रम् अमलहाटकयष्टिप्रतिष्ठापितैरन्तःप्रभानीवनिश्चलशिखैर्ध्यायद्भिर्मङ्गल
प्रदीपैरुद्भासितं उत्तानासितलतामनाथ्यमाणाभिः सर्वतो रक्षाप्रकर्षैः परिवृतं सू
तिकागृहमपश्यत् ॥ ॥ अम्भः पावकं च स्पृष्ट्वा । प्रविवेश ॥ ॥

ॐ

प्रविश्य च प्रसवपरिक्षाममूर्त्तेः शयनगताया विलासवत्याः स्वप्रभासमुद्योतितगर्भगृहप्रदीप
प्रभमव्यङ्गरागात्वादुदयपरिपाटलमंडलमिव सवितारमपरसंध्यालोहितबिंबमिव चन्द्र
मसमनुपजातकालिम्यमिव कल्पतरुपल्लवमरुणकलरक्तारविन्दराशिमवनिमेषेणावतीर्ण
मिव लोहिताङ्गं विद्रुमकिसलयैर्दलैरिव घ्रातपद्मैरिव पद्मरागराशिभिरिव विरचिताव
यवमनभिव्यक्तश्रवणपंचकमिव महासेनं सुरवनिताकरस्पृष्टमिव अमरपतिकुमारकमुत्तम
कल्याणकान्तिस्वभास्वरया स्वदेहप्रभयापूरयन्तमिव वासभवनमुद्भासमानैः सहजमसूच
णैरिव महापुरुषलक्षणैरुपेतमागामिकालपालनप्रहृष्टया श्रिया समालिंगितमाह्लाद
हेतुमात्मजं ददर्श ॥ विगतनिमेषनिश्चलपक्ष्मणा च सुचिरं चक्षुः प्रहृष्टसंघटितानन्दवा
ष्पपटलाभ्यन्तरतारकेण हर्षविस्फारितेन स्निग्धेन चक्षुषा पिबन्निवालक्ष्यन्निव स्पृशन्निव मनो
रथसहस्रप्राप्तदर्शनं सस्पृहमीक्षमाणस्तनयाननमुद्दे ॥ कृतकृत्यमिवात्मानमेने समु
त्पन्नमनोरथः शुकनासस्तु शनैः शनैरङ्गप्रत्यङ्गान्यस्य निरूपयन्प्रीतिविस्फारितलोचनो मही
पालमवादीत् ॥ देव पश्य पश्यास्य कुमारस्य गर्भसंपीडनवशादपरिस्फुटावयवशोभ

का॰ टी॰ ध॰
५०

पिमाहात्म्यमाविर्भावयंति चक्रवर्तिचिह्नानि तथा ह्यस्य संध्यांशुरक्तबालशशिकलाकारे ललाट
पटे नवनलिननालभङ्गतन्तुतनीयसूर्णा परिस्फुरति । एतद्धि कचपुण्डरीककर्णायतंशु
क्लस्निग्धैर्धवलयतीव वासभवनमरालपक्ष्मलोचनयुगलं विजृम्भमाणकमलमनोह
रमियमस्य सहजमानना मोदमाजिघ्रतीव वृहदायतं कनकलेखेव नासिका रक्तोत्पलकलिकें
कार सुहृद्दृतीत्येवास्याधररुचकं रक्तोत्पलकलिकालोहिततलो भगवतो विष्णुरिव सद्ध
शंखचक्रचिह्नौ प्रशस्तलेखालांछितौ करावभिनवकल्पतरुपल्लवकोमले लेखामयैः
ध्वजरथतुरगातपत्रकमलैरलंकृतं अनेकनरेन्द्रसहस्रचूडामणिचक्रचुम्बनोचितं चरण
युगलं ॥ एवं च वदत्येव भैरिवा नितंबीतः स्वरयोगास्पन्दनः शृण्वतस्त्येवैकपथयतिनासि
न्ससंभ्रमप्रहृष्टेन राजलोकेन द्वारिस्थितेन दत्तमार्गस्त्वरितगतिः सहर्षरोमाञ्चपुलकिततनुः
स्फारीकृतलोचनो मङ्गलकनामा प्रहृष्टवदनः प्रहृष्टः पादयोः प्रणम्य व्यजिज्ञपत् ॥ देवदि
ष्ट्या वर्धसे प्रतिहताः शत्रवः चिरंजीव जयच पृथिवीं त्वत्प्रसादादद्य भवतः शुकनासस्या
पि ज्येष्ठायां ब्राह्मण्यां मनोरमाभिधायां रामस्येव रेणुकायां तनयो जातः । श्रुत्वा देवः प्रण
मामिति प्रथमं स्पर्शैः अमृतवृष्टिनिमग्नाकारेण तद्वचनं प्रीतिविस्मारितचरमो

टी॰
पं॰

चनंकेसरिकिशोरकमिव पंजरगतंकृत्वा प्रतिषिद्धनिर्गममाचार्यकुलपुत्रप्रायपरिजनपरिवार
मपनीताशेषशिशुक्रीडनव्यासंगमनन्यरसमखिलविद्योपादानार्थमाचार्येभ्यश्चन्द्रापीडंशोभ
नेदिवसे वैशंपायनद्वितीयमर्पयांबभूव ॥ प्रतिदिनंचोत्थायोत्थायसहविलासवत्या वि
रलपरिजनस्तत्रैवगत्वैनमालोकयामासराजा । चन्द्रापीडोप्यनन्यहृदयतया तथानियं
त्रितो राज्ञाप्यचिरेणैवकालेनयथास्वमात्मकौशलंप्रकटयद्भिः पात्रवशादुपजातोत्साहैः
राचार्यैरुपदिश्यमानाः सर्वाविद्याजग्राह ॥ मणिदर्पणइवातिविमलेतस्मिन्संचक्रामसक
लः कलाकलापः । तथाहिपदेवाक्येप्रमाणेधर्मशास्त्रेराजनीतिषुव्यायामविद्यासुचापच
क्रचर्मकृपाणशक्तितोमरपरशुगदाप्रभृतिषु सर्वेष्वायुधविशेषेषु रथचर्यासु गजपृष्ठेषु तुरं
गमेषु वीणावेणुमुरजकांस्यतालदर्दुरपुटप्रभृतिषुवाद्येषुभरतादिप्रणीतेषु नृत्तशास्त्रेषु
नारदीयप्रभृतिषु गान्धर्ववेदविशेषेषु हस्तिशिक्षायां तुरगवयोज्ञानेपुरुषलक्षणेषु चित्र
कर्मणिपत्रच्छेद्येषु पुस्तकव्यापारेलेख्यकर्मणि सर्वासुद्यूतकलासु गान्धर्वशास्त्रेषु शकु
निरुतज्ञानेग्रहगणितेरत्नपरीक्षासु दारुकर्मणिदंतव्यापारे वास्तुविद्यास्वायुर्वेदे यंत्रप्रयो
गे विषापहरणे सुरंगोपभेदे तरणेलंघनेप्लुतिषु आरोहणे रतितंत्रेषु इन्द्रजालकथासु ना

का॰
दं॰
५

टंकेष्वाख्यायिकासु काव्येषु महाभारतेतिहासरामायणेषु सर्वदेशभाषासु सर्वसंज्ञासु सर्वशिल्पेषु छं
दःस्वन्येष्वपि कलाविशेषेषु परं कौशलमवाप ॥ सहजा चास्य श्रममभ्यसतो वृकोदरस्येव शैशा
व एवाविर्बभूव सर्वलोकविस्मयजननी महाप्राणता । यदृच्छया क्रीडता यनेन करतलालम्बित
कर्णपल्लवावनताङ्गाः सिंहकिशोरेणैक क्रमाक्रान्ता इव गजकलभकाश्चलितुमपि न शेकुः ॥ ए
कैकेन कृपाणप्रहारेण बाल इव नालनतृन्मृणालदण्डानिव लुलाव । सकलराजन्यवंशदावा
नलस्य परशुरामस्येवास्य नाराचाः शैलशिलातलभिदो बभूवुः । दशपुरुषसंवाह्येन योग्येन चा
योदण्डेन श्रममकरोत् ऋते च महाप्राणतायाः सर्वविद्याभिरन्याभिः कलाभिरनुचकार नवैशंपा
यनः चन्द्रापीडस्य तु सकलकलाकलापपरिचयबद्धमानेन शुकनासगौरवेण सहपांसुक्रीडन
तया सहसंवृद्धतया च सर्वविस्रम्भस्थानं द्वितीयमिव हृदयं वैशम्पायनः परं मित्रमासीत् ॥ निमेषम
पि तेन विना स्थातुमेकाकी न शशाक वैशम्पायनोऽपि न मल्लकरमिव वासरोऽनुगच्छन् क्षणमपि न
विरहयांचकार । एवं तस्य सर्वविद्यापरिचयमाचरतोः चन्द्रापीडस्य त्रिभुवनविलोभनीयोऽमृतर
मइव सागरस्य सकललोकहृदयानन्दजननश्चन्द्रोदय इव प्रदोषस्य बहुविधरागविकारभङ्गुरः सु
रधनुःकलाप इव जलधरसमयस्य मकरध्वजायतनस्तनः कुसुमसमय इव कल्पपादपस्याभिव्यज्य।

गें॰

ग्रहोकल्याणपरम्परा सत्योऽयंजनप्रवादः यद्विपद्विपदंसम्पत्सम्पदमनुबध्नातीति सर्वथासमा
नन्दःस्वप्नस्वप्नोदर्शयता विधिना भवतैवचयमनुवर्तिना इत्यभिधायप्रीतिविकसितमुखः ससंभ्रमस
मालिङ्ग्य स्वयमेवशुकनासस्योत्तरीयं पूर्णपात्रंजहार ॥ तस्मैचप्रीतमनाः प्रियवचनश्रवण
तुष्टःपेशलसखायापरिमितंपारितोषिकमादिदेश ॥ उत्थायचनर्तितेनेवतेनचरणविक्षेपक्वणित
नूपुरमहंसस्वप्रबोधितदिगन्तरेण सरभसोत्क्षेपवलयितेनमणिवलयावलीवाचालितभुजलते
नाधीकृतैरुद्यानतालैःकरपुटैरनिलल्लुण्ठनामाकाशकमलिनीमिवदर्शयता पर्यस्तस्रस्ते
नकर्णपल्लवेन परस्पराङ्गदकोटिसंघट्टदष्टपाटितोत्तरीयांशुकेन श्रमजलधौतनाङ्गरागराजि
तसर्वाङ्गवाससा किञ्चिदवशिष्टतमालपत्रेणविलासिनीहसितेकृतिचिह्नकेवररचनाप्रकारेप्र
श्रुयतासरभसबलादसवलन्हलोलहारलतास्फालितकुचस्थलेन सिन्दूरतिलकलाञ्छितालक
लेखेन विप्रकीर्णपिष्टातकपांसुपिञ्जपिञ्जरितकेशपाशेन प्रनृत्यन्महाकञ्चुकिनवामनवधि
रजडजनप्रवरः सरेणोत्तरीयांशुकग्रीवाबद्धावकृष्टविडम्बितजरत्कञ्चुकिकदम्बकेन कलमधु
रगुञ्जायता हर्षनिर्भरतया मत्तेनेवायरहृष्टगृहीतेनकाव्यगानवाच्यावाच्याविवेकेन नृत्तक्रीडाप्रसक्ते
नान्तःपुरिकाजनेन प्रचलमणिकुण्डलाहतकपोलभित्तिनाचविह्वलमानकर्णोत्पलेनाधोविगलि

का॰
दं॰

नविलोलशेखरेण दोलायमानवैकक्षिककुसुममालेन निर्दयप्रहतगंभीरमृदंगमंगलपटह
निनादानुगतकाहलशंखरवजनितरसेन चरणसंनिपातैर्दार्यमाणेव वसुधां राजपरिजनेन प्रनृ
त्तेनच चारणगणेन विविधस्तुतिवाद्यकृतकोलाहलेन पठता गायता वल्गता चानुगम्यमानः
शुकनासभवनं गत्वा द्विगुणतरमुत्सवमकारयत् ॥ अतिक्रान्ते च षष्ठीजागरे प्राप्ते दशमेऽहनि
पुण्ये मुहूर्ते गाः सुवर्णं च कोटिशो ब्राह्मणसात्कृत्वा मातुरस्य मया परिपूर्णमण्डलश्चन्द्रः स्वप्ने
मुखकमलमाविशन् दृष्ट इति स्वप्नानुरूपमेव सूनोश्चन्द्रापीड इति नाम चकार ॥ अपरेद्युः
शुकनासोऽपि कृत्वा ब्राह्मणोचिताः सकलाः क्रियाः राजानुमतमात्मजस्य विप्रजनोचितं वैशम्पाय
न इति नाम चक्रे ॥ क्रमेण कृतचूडाकरणादिबालक्रियाकलापस्य शैशवमतिचक्राम चन्द्रा
पीडस्य तारापीडः ॥ क्रीडाप्रसंगविघातार्थं बहिर्नगरादनुसिप्रं प्राकारमण्डलेन परिक्षिप्तमनुप्राका
रमाहितेन महता परिखावलयेन परिवेष्टितमतिदृढकवाटसंपुटसंघाटितैकद्वारप्रवेशमेका
न्तोपरचिततुरगवाह्यालीविभागमवकोशमात्रायाममतिमहतान्तर्हिमगिरिशिखरमालानुका
रिणा सुधाधवलेन चन्द्रशालावलयेन विलसितमधःकल्पितव्यायामशालममरागाराकारं
विद्यागृहमकारयत् ॥ सर्वविद्याचार्याणां च संग्रहे यत्नमतिमहान्तमतिष्ठत् ॥ तत्रस्थ

ग्रं॰

मानरागरमणीयः सूर्योदयइव कमलवनस्यविविधविलासयोग्यः कलापइव शिखंडिनोयौ
वनारंभः प्रादुर्भावरमणीयस्यापिद्विगुणंरमणीयतांपुपोष ॥ लब्धावसरोनवसेवकइव नि
कटीबभूवास्यमन्मथः लक्ष्म्यासहविस्तारवक्षःस्थलं बंधुजनमनोरथैः सहासूर्येनोनदण्ड
ह्रयमरिजनेनसहतनिमानमभजतमध्यभागः त्यागेनसहप्रथमानमाननानानितम्बभागः
प्रतापेनसहारूरोहरोमराजिः प्रहितकलत्रालकलत्ताभिः सहप्रलंबनामुपययौभुजयुग
ले । रचितेनसहधवलतामभजतलोचनयुगलं आज्ञयासहगुरुर्बभूवभुजशिखरदेशः
स्वरेणसहगंभीरतामाजगामहृदयं । एवंचक्रमेणसमारूढयौवनारम्भं परिसमाप्तसकलक
लाविज्ञानमधीताशेषविद्यंचावगम्यानुमोदितमाचार्यैश्चंद्रापीडमानेतुंराजाबलाधिकृतंब
लाहकानामानमाहूय बहुतुरगबलपदातिपरिवृतमतिमयासेनहनिप्राहिणोत् ॥ सगत्वा
विद्यागृहं द्वास्थैःसमावेदितःप्रविश्य क्षितितललम्बितचूडामणिना शिरसाप्रणम्यसविनयमि
समुचिते राजसमीपइव सविनयमासने राजपुत्रोन्यषीदत् ॥ स्थित्वाचमुहूर्तमात्रंबलाहृ
कश्चंद्रापीडमुपसृत्यदर्शितविनयोव्यजिज्ञपत् कुमारोविद्यानन्ददर्शनसुखाभिलाषी महा
राजः समाज्ञापयति पूर्णानोमनोरथाः निर्गमायविद्यागृहात्सर्वाचार्यैरनुगृहीतोसि संगन्त्व

का०
दृ०
५३

वेगंगजकुमारकमिववारिबंधाद्विनिर्गतं अभिगतसकलकलाकलापंपौर्णमासीशशिनमिवोद्गतं
उपपन्नत्वाच्चव्रजेत सफलतामानीयचिरदर्शनोत्कण्ठितानि लोकलोचनानिदर्शनमुखानि तेसमग्रान्तः
कान्यतीवान्तःपुरजनानि अयमत्रभवतोदशमोवत्सरोविद्यागृहमधिवसतः प्रविष्टोपिषष्ठमत्र
भवन्वर्षमेवंसर्वापिण्डितेनामषोडशेनप्रवर्धसे ॥ तदस्मात्प्रभृतिनिर्गत्यदर्शनोत्सुकाभ्योदत्त्वाद
र्शनमखिलाभ्योमातृभ्यः अभिवाद्यचगुरूनपगतनियंत्रणोयथासुखमत्रभवराज्यसुखानि
नवयौवनललितानिच संमानयराजलोकंपूजयद्विजातीन् परिपालयप्रजाः आनन्दयबन्धु
वर्गं अयंचतेत्रिभुवनैकरत्नमनिलगरुडसमजवइन्द्रायुधनामातुरङ्गमः प्रेषितोमहाराजेन
हारिनिहति पषवलदेवस्यपारसीकाधिपतिना त्रिभुवनाश्चर्यमितिकृत्वा जलधिजलादुत्थित
मयोनिजमिदमश्वरत्नंसमासादितं मयामहाराजाधिरोहणयोग्यमिदमितिमन्दिरप्रप्रहितो ह
स्त्यानिवेदितंचलक्षणविद्भिः । देवयान्युच्चैःश्रवसःश्रूयंतेलक्षणानितैरप्योपेतेनभूतोभावीवा
तुरङ्गमइति तदयमनुगृहीतामधिरोहणेन इदंचमूर्धाभिषिक्तपार्थिवकुलप्रसूतानांविनयो
पपन्नानांशूराणामभिरूपाणांकलावतांचकुलक्रमागतानां राजपुत्राणांसहस्रंपरिचार्यंजना
र्थमत्रप्रेषितंतुरङ्गमाधिरूढं द्वारिप्रणाममलालासंप्रतिपालयनीत्याभिधाय विरतवचसिबला

गे०

त्युक्ते चन्द्रापीडः पितुराज्ञां शिरसि कृत्वा नवजलधरध्वानगम्भीरया गिरा प्रवेशयेन्द्रा
युधमिति निर्जिगमिषुरादिदेश ॥ अथ वचनानन्तरमेव प्रवेशितमुभयतः खलीनकनक
कटकवलनाभ्यां पुरुषाभ्यामाकृष्यमाणमतिप्रमाणमूर्ध्वकरपुरुषप्राप्यपृष्ठभागमापिबन्त
मिव संमुखागतमखिलमाकाशमतिनिष्ठुरेण मुहुर्मुहुः प्रकम्पितोदररन्ध्रेण हेषार
वेण पूरितभुवनोदरविवरेण निर्भर्त्सयन्तमिवालीकवेगगर्वितं गरुत्मन्तमतिदूरमव
नमता प्रतिक्षणमतिह्रस्वमुन्नमता जवनिरोधस्फीतरोषक्रकरायमाणघोरघोणेन शिरो
भागेन निजजवदर्पवशादुल्लङ्घनार्थमाकलयन्तमिव त्रिभुवनमसितपीतहरितपाटला
भिराखण्डलचापानुकारिणीभिः लेखाभिः कल्माषितशरीरमास्तीर्णविचित्रवर्णक
म्बलमिव कुञ्जरकलभं कैलासतटाघातधातुधूलिपाटलमिव हरवृषभमसुररुधिरप
ङ्कलेखालोहितसटमिव पार्वतीसिंहं रंहःसंघातमिव मूर्तिमन्तमनवरतपरिस्फुरत्प्रो
थपुटोन्मुक्तसीत्कारेणोद्वमन्तमिव स्खलितमुखखलीनखरशिखरक्षोभजन्मनो ला
लाजलभुवः फेनपल्लवानुदधिनिवासमैत्रीपीतामृतरसगण्डूषानिवोद्गिरन्तमत्यायतम
तिनिर्मांसतया समुत्कीर्णमिव वदनमुद्वहन्तमाननमण्डले निहितारुणमणिसमुत्कृते

का· टी·

रेश्रुकलापेस्वरूपेणेनाव सञ्जारञ्जचामरेणेव निश्चलशिखरेण कर्णिकारगलेन विराजमानमुक्त्व
लकनकशृङ्खलारचितरश्मिकलापकलितयालालाटालोहितलम्बलोलमटासेनानर्घ
जलनिधिसंचरणालीनविद्रुमपल्लवयेवशिरोधरयेवोपविशितमतिकुटिलकनकपत्रल
ताविताननभङ्गुरेण पदेपदेरणितरत्नरत्नमालेन स्थूलमुक्ताफलमायेणतारागणेनेव
सन्ध्यारागेणेवं ख्यालंकारेणालंकृतन ॥ मुक्तालंकारनिहितमरकतरत्नप्रभाश्यामाय
मानदेहतयागगनतलनिपतितदिवसकररथतुरङ्गः शङ्कामिव जनयन्तमतितेजस्विनया
जलनिरोधरोषवशाल्यनिरोमकूपोद्गतानि सागरपरिचयलग्नानि मुक्ताफलमणिपादपीठ
मुकारिभिः मज्जनशिलाघटितैरिवानवरतपवनोत्पतनजनितैर्विषमश्रमवरवैः मु
क्षुभिः स्तुवकप्रदैर्जर्जरितनवमन्थरैर्मुक्तजवाद्यमिवाभ्यस्यन्तमुत्कीर्णमिव जंघासुविस्तारितमि
व रोमिमास्तरणीकृतमिव मुखेप्रसारितमिव कन्धरायामुल्लिखितमिव पार्श्वयोर्विगुणीकृ
तमिव जघनभागेजवमतिपन्नमिव गरुत्मतस्त्रैलोक्यसंहरणसहायमिव मारुतस्याशा
वतारमिवोच्चैःश्रवसोवेगसब्रह्मचारिणमिव मनसोहृदिचरणमिव सकलवसुन्धरोल्ल
ङ्घनक्षमेवर्कणाङ्गसामिव मानसप्रचारमथमासादितसमिव विकसिताशोकपटलेप्रान्त

गे·

नमिव भस्मासिन त्रिपुरदाहकान्तिं नमसंकमलवनमिव मधुपङ्कपिङ्गकेसरं ग्रीष्मदिवसमिव महा
याममुग्रतेजसं भुजङ्गमिनं महावेगमत्यभिप्रायं स्मरदर्पप्रतिमिव शाखमालिकाभरणभीतमिव रत्न
त्नकर्णौ विद्याधरराज्यमिव चक्रवर्तिनरवाहनोचितं सूर्योदयमिव सकलभुवनाद्याहरमसमानिशा
घमिन्द्रायुधमद्राक्षीत् ।। दृष्ट्वा च तमहमहप्रवंममानुषलोकोचिताकारमखिलत्रिभुवन
राज्योचितमशेषलक्षणोपपन्नमश्वरत्नमतिमायमतिधीरप्रकृतेरपि चन्द्रापीडस्यापस्पर्शोविस्म
यो हृदये ।। आसीच्चास्य मनसि सुरभसविवर्तनचलितवासुकिभ्रमितमन्दरेण मथ्नता जल
निधिजलमिदमश्वरत्नमुद्धृतं सुरासुरलोकेन पुनरारोहणाय मेरुशिलातलविशालमस्य पृष्ठ
माखण्डलेन किमासादितं त्रैलोक्यराज्यफलमुच्चैःश्रवसा विस्मितहृदयो वञ्चितः खल्वजल
धिना मथनमखः । मन्ये च भगवतः श्रीनारायणस्य चक्षुर्गोचरमियता कालेन नायमुपगतो येन
द्यापि गरुडपृष्ठमहिमानेन न परित्यजति अहो खल्वतिशायिनी त्रिदशराजसम्पद्धिरियं नातस्य राज्य
लक्ष्मीः यदेवंविधान्यपि सकलत्रिभुवनदुर्लभानि रत्नानि उपकरणतामागच्छन्ति ।। अति
तेजस्विनया महाप्राणतया च सदैवतेयमस्याकृतिः यत्सत्यमारोहणशङ्कामिव मे जनयति ।
न हि सामान्यवाजिनामामानुषलोकोचिताः सकलत्रिभुवनविस्मयजनन्य ईदृश्यो भवन्त्याकृ

का॰ दं॰ 45

नयः । देवतान्यपि हि ऋषिनिशापवशादुज्झितनिजशरीरकाणि शापवचनोपनीतानि शरीरान्तरा
ण्यध्यासितवन्त्येव । श्रूयते हि पुरा स्थूलशिरा नाम महातपा मुनिरखिलत्रिभुवनललामभूताम
प्सरसं रम्भाभिधानां शशाप । सा हि स्वर्लोकमपहाय मम हृदये निवेशयात्मानं मम हृदयेति व्या
ताविद्धा मृत्तिकावत्यां शतधन्वानं नाम राजानमुपसेवमाना मर्त्यलोके महान्तं कालमुवास ॥
अन्ये च महात्मानो मुनिजनशापपरिपीतप्रभावा नराकारा भूत्वा बभ्रमुरिमं लोकं । अस्मादयम
नेनापि महात्मना केनापि शापभाजा भवितव्यं आवेदयतीव मदन्तःकरणमस्य दिव्यतामिति विचिन्त
यन्नेव चारुह्य तुरगासनादुदतिष्ठत् मनसा चतुरगमुपहृत्य महात्मन्नन्योऽसि सोऽसि नमोऽस्तु ते
सर्वथा मर्षणीयोऽयमतिक्रमोऽस्माकमपरिगतानि दैवतानि प्रच्छन्नानि परिभवमाज्जि भवन्तीत्यामन्त्र
याम्बभूव । विदिताभिप्राय इव स तमिन्द्रायुधस्तु कुलशिखरः केसरसटाहतिकेसरतारकेण तिर्यक्च
क्षुषा विलोक्य पुरःस्फुरः नाऽयनादितितलमुन्नतवानश्चलिभूमसारितनक्रोडरोमराजिना दक्षिणखु
रेणारोहणायाङ्कयन्निव स्फुरितनासापुटविवरघर्घरध्वनिमिश्रं मथरमपरुषमञ्जुहुंकारपरं परागुबद्ध
मतिमनोहरं हेषारवमकरोत् ॥ अथानेन मथरहेषितेन दत्तारोहणाभ्यनुज्ञ इव इन्द्रायुधमा गे॰
रुरोह चन्द्रापीडः समासाद्य तं प्रादेशमात्रमिव त्रैलोक्यमखिलं मन्यमानो निर्गत्य प्रलयजलध

रविमुक्तोपलासारयत्रघोषेण जयनेवसमानलमनिनिष्ठुरेणाखुरप्रहतानां रवेणाखुरदत्तोनिरुद्धा
णाघोरघोषेण चर्ह्णीषितेन बाधिरीकृतसकलभुवनविवरमशिशिरकिरणदीधितिपरामर्शास्फु
रितविमलकेनोर्ध्वीकृतेन कुंदलतावनेनोज्ज्वालनीलोत्पलकलिकावनगाहनेन सवङ्खवरागन
तलमलंकुर्वाणेन तहृणमाहूतानपत्रसहस्रान्धकारितान्दिग्मुखेनयास्फुरितप्रतानमनु
चापकलापकल्माषमिव जलधरवृन्दमुद्धमन्त्येन प्रज्ञाधवलिनमुखेन यानवरेन वलनच
कलितयाचप्रलयसागरजलकल्लोलसंघातमिव समुत्कृत्तमहदुष्पर्यन्तमसमसैन्यमपश्यत ॥
ततश्च सागरजलमिव चन्द्रोदयेन चन्द्रापीडनिर्गमेन सकलमेव संचचालास्वीये । प्रहृतमह
त्मिकयाच प्रणामलालसाः सदभसापनीतातपत्रशून्याशिरसः परस्परोत्पीडनकुपितततरगानि
वारणायासिताः ते राजपुत्रा सपर्यावारयन्त एकैकस्य प्रतिनामग्रहणमावेदयमाना बलाहृकेन
विप्रचलितमुकुटपद्मरागकिरणोत्कर्मच्छलेनानुरागमिवोद्वमद्भिः संघटितमेवाञ्जलिमुकुल
तयापोषराज्याभिषेककलशावर्जितसलिललग्नकमलैरिव हृदावनतैः शिरोभिः प्रणेमुः ॥
चन्द्रापीडस्तु तान्सर्वान्संमानयित्वा यथोचितमननरत्तुरंगमाधिरूढेन वैशम्पायनेनानुगम्यमानः
राज्यलक्ष्मीनिवासपुण्डरीकाक्रान्तिनामसकलराजन्यकुलकुमुदखण्डचन्द्रमण्डलेनेवनवरक्त

का॰
टी॰

46

मेणामरप्रवंसी प्रलिनायमानेनक्षीरोदफेनधवलितवासुकिफणामण्डलच्छविनास्थूलमुक्ता
कलापजालकाहृतेनोपरिविन्यस्तेनकेसरिणामुद्गच्छन्तातिमहताकान्तस्वर्णदण्डेनातपत्रेणानि
वर्णातिवायिनः उभयतः समुद्धूयमानचामरकलापनर्तितकर्णपल्लवः पुरःप्रधावतानेक
णवीरमुकुटसहस्रेणानीकसहस्रसंख्येन पदातिपरिजनेन जयजीवेति च मधुरवचसामङ्ग
लप्रायमनवरतमुच्चैःपठता वन्दिजनेन स्तूयमानो नगराभिमुखः प्रतस्थे । क्रमेण च तं स
मासादितनवयौवनमनङ्गमिवावतीर्णं नगरमार्गमुपयान्तमवलोक्य सर्व एव परित्यक्तसकल
व्यापारो रजनिकरोदयप्रतिबुध्यमानकुमुदवनानुकारी जनः समजनि ॥ सत्यमस्मिन्समय
ति मुखे कमलाविडम्बनाविहृताकृतिः कार्त्तिकेयो विडम्बयति कुमारभावम् । धन्या वयम
तिपुण्यभाजो यदिमाममानुषीमस्याकृतिमन्तः समारूढप्रीतिरसनिष्पन्दविस्तारितेन कु
तूहलोत्तानितेन लोचनयुगलेनानिवारितेनाः पश्यामः सफलानो जातानि जन्मवन्ना। सर्व
थानमोऽस्मै नृपो नरधारिणे चन्द्रापीडच्छद्मने पुण्डरीकेक्षणायेति वदन्नारचितप्रमाणाञ्जलि
नगरलोकः प्रणनाम । सर्वतश्च समुद्घाटितकवाटपुटप्रकटवनायनसहस्रतया चन्द्रापी
डदर्शनकुतूहलान्नगरमपि समुन्मीलितलोचननिवहमिवाभूत् ॥ अनेन च समास

गें॰

सकलविद्यो विद्यागृहान्निर्गतोयमागच्छति चन्द्रापीड इति समाकर्ण्यालोकनज्ञातहृल्लिन्यः
सर्वस्मिन्नेव नगरे संभ्रमभ्रान्तहस्तावधारितसमासप्रसाधनव्यापाराः काश्चिद्धामकरतलग्नदर्पणाः
स्फुरितसकलरजनिकरमण्डला इव पौर्णमासीरजन्यः काश्चिदार्द्रालक्तकरसपाटलितच
रणाग्राः कमलपरिपीतबालातपपल्लविन्यः काश्चित्सम्भ्रमस्खलनविगलितमेखलाकला
पाकुलितचरणकिसलयाः स्खलितलास्यानमन्दमन्दसञ्चारिण्य इव करिण्यः काश्चिज्जलध
रसमयदिवसश्रिय इवेन्द्रायुधरागरञ्जिताम्बरधारिण्यः काश्चिदुल्लसितधवलनखमयूखाः
कृतस्पृहकलहंसकानिव चरणपदान्नृहन्त्यः काश्चित्करतललम्बितस्थूलहारयष्टयो रति
मिव मदनविनाशशोकगृहीतस्फटिकाक्षवलयां विडम्बयन्त्यः काश्चित्पयोधरालग्नगलितमुक्ता
लताः स्तनविमलस्रोतजलोन्नतिनचक्रवाकमिथुना इव प्रदोषश्रियः काश्चिन्नूपुरमणिरस
त्रस्तैः कन्धरया परिचयान्नगनारहस्यमयूरिका इवाविराजन्त्यः काश्चिदर्धपीतोज्झितमणि
चषकाः स्फुरितरागैः मधुरसमिवाधरपल्लवैः द्रवन्त्यो हर्म्यतलानि ललनाः समागत्य
ऽन्याश्च मकरकेतनवातायनविवरविनिर्गतमुखमण्डलकोशाः प्रदाम्बरतलसंचारिणीं कम
लिनीमिव दर्शयन्त्यो दृष्ट्वाः । उदयादिचरमहासामरभसंचलनजन्मा मधुरसारणस्फा

का॰ लितवीणानवकोलाहलबहलो रसनारवाहूतनृत्यमासित ॰॰ चित्रः सवलितचरणतलताडितो
दं॰ सोपानजानगम्भीरध्वनिमहृष्टानामवरोधशिखण्डिनां केकारवानुगम्यमानो नवजलधररवभ
यचकितकलहंसकोलाहलकोमलमकरध्वजविजयघोषणानुकारी परस्परविघट्टनारणि
ततारतरहारमणीनां श्रोत्रहारी हर्म्यकुक्षिप्रतिरवनिर्ह्रादी भूषणनिनादः मुहूर्तमिव च
कितजननिरंतरतया नारीमया इव प्रसादाः सालक्तकपदकमलविन्यासैः पल्लवमयमिव क्षि
तितलमङ्गनांगप्रभावेन प्रवाहेण लावण्यमिव नगरमाननमण्डलनिवहेन चन्द्रमयमिव विश्वं ग
गनतलमातपनिवारणायोन्नमितकरतलजालकेन कमलवनमयमिव दिक्चक्रवालमाभरण
प्रभालोकेनेन्द्रायुधमय इवातपः लोचनमयूखालेख्वासितेनानेन नीलोत्पलदलमय इव दिव
सो बभूव ॥ कौतुकप्रसारितनिश्चललोचनानां तासामादर्शमयानीव सलिलमयानीव स्फटिक
मयानीव हृदयानि विवेश चन्द्रापीडाकृतिः ॥ आविर्भूतमदनरसानां चान्योन्यतः सपरिहा
साः सविभ्रमाः ससम्भ्रमाः सेर्ष्याः सोत्प्रासाः साभ्यसूयाः सविलासाः समदाः सस्पृहाश्च नतन्त्र
णामितरमणीयाः प्रसस्रुरालापाः ॥ अन्यग्याहितविनिगमने मामपि प्रतिपालय दर्शितोन्म  गं॰
त्तेष्टहासेनोत्तरीये उल्लासयालकानीव लसन्निनीमूर्णां सकलतामाननेनावलम्बिनी मूर्णां चंचले

त्वाश्रयाद्दर ऊरुस्तम्भसर्वलितचरणापतसि ... मदनान्धेमदनिस्तेनने केशपाशो उल्लिपचन्द्रा
पीड दर्शनव्यसनिनि कांचीदामकं उन्नयपयपायेकपोलदोलायितेकर्णपल्लवं कवहृदयेग्र
ह्राणानियमितेदन्तपत्रे यौवनोन्मज्ञे विलोकयसे जनेन स्थगयपयोधरभारं अपगतलज्जेशिथि
लीभूतमाकलङ्कस्थूलमलीक अयथेष्ठ नरसागमयतां ऊरुस्तम्भिनिदेहिदर्शनानन्तरं असत्तुष्टे
किंयदालोकयसे नवलहृदयेपरिजनमपेक्षस्व पिशाचगोलिनोज्ज्वरीयाहसयसे जनं अनेक
भंगविकारसूर्णेष्व ... मकारणायासितहृदयाजीवसिमिथ्याविनीते किंव्यपदेशवीतिनेर्विहर
त्रमालोकयसि यौवनशालिनिकिंपीड्यसि पयोधरभारेण अनिकोपनेप्रवनोभवमत्तसिविणि
किमेकाकिनी क्षणात्स्विवानायेन मनंगपरवशा मदीयमज्जरीयाश्वकश्चज्वरीयन्तानयसि तासभम
त्त्रे निवारयात्मानं उज्झितधैर्ये किंधावसि गुरुजनसमक्षमुल्लसत्स्वभावे किमेवमाकुलीभव
सि मुग्धे निगृहस्व मदनज्वरजनितपुलकजालकमस्वाधावरेण किमेवमुत्ताम्यसिबङ्गावि
कारे विविधाङ्गभङ्गवलनायासितमध्यभागाद्दृष्यावियमे शून्यहृदये स्वभावान्निर्गतमपिना
त्मानमवगच्छसि कोतुकाविष्टविसृजनासिनिःश्वसितमनःसंकल्परचितरनसमागमसुखव
सनिमीलितलोचने समुन्मीलितलोचनयुगलमतिक्रामत्ययमनङ्गशरप्रसङ्गः स्खलितेरविर

कां॰
सू॰
५८

किरणनिवारणायउत्तरीयांशुकपल्लवमयि तनोव्रतश्हृद्हीने इष्ट्वामपश्यन्तीवञ्चय
सि लोचनयुगलमथवन्येह्नतासि पश्चाद्दर्शनपरिहारयत्नेन प्रसीदेति विहस्य मपश्य रातिविहि
तं माहात्म्यादिवभगवतमकरध्वजे अयमस्य सितातपत्रेणालिङ्गलनीलधारासि तिमिरशंकानि पति
तेइव मालतीकुसुमशेखरोभिलक्ष्यते ॥ एतदस्य मरकतप्रभाश्यामायितमुपरचितविकचशि
रीषकुसुमकर्णपूरमिव कपोलतलमाभाति । अयमस्यहारान्तनिविष्टारुणमणिकिरणकला
पच्छलेन हृदयं विवृत्य रागभिन्नयौवनरागइव बहिः परिस्फुरति एतदनेन चामरकलापान्तरोदि
तिएववीक्षिते । एतत्किमपि वैशम्पायनेन सहसामोच्चदर्शनमयूखावधवलीकृतदिङ्मण्डलान्त
हसितं एषोस्य अभ्यपत्नतिहृदितरागेणोत्तरीयांशुकप्रान्तेन बलाइकाबरगात्रवलनजन्मानेमं
लाग्रकेशोश्ववेणस्तुपहरति ॥ अयमनेनलक्ष्मीकरकमलकोमलतलः सम्प्रान्तिपतितिर्यक्तू वङ्ग
मस्कन्धनेनिविमसुवर्णपल्लवः सलीलमयमनेन च तातापूलयाचनार्थमुन्नानिततलोदीर्घाङ्गु १
लिमानामुषुष्करकोशोभीगजेनेव शैवालकवलमसलालसः प्रसारितः करः । धन्यासायो १
लक्ष्मीरिव निर्जितकमलं करतलमस्य वक्षस्थरासपत्नीयहीष्यति धन्या च देवी विलासवती
कमलमहीमण्डलभारधरणक्षमः कुम्भादिगजइव गर्भेणचयया व्यूढः इत्येवंविधानिचा

गें॰

न्यानिवदन्तीनां नासापीयमानइव लोचनपटैराहूयमानइव भूषणरवैरनुगम्यमानइव हृ
दयैर्निबध्यमानइवाभरणरत्नरश्मिरज्जुभिरुपाह्रियमाणइव नवयौवनबलिभिः शिथिलभुज
लताविगलितधवलवलयनिकरैः पदेपदे विवाहानलइव कुसुमामिश्रैर्लाजाञ्जलिभिरिव
कीर्यमाणश्चन्द्रापीडो राजकुलसमीपमाससाद । क्रमेण च धामवद्भ्याभिरनवरतकरस्थलग
लितमदमषीःपङ्ककरीभिरञ्जनगिरिमालामलिनाभिः उन्नतरथाभिरन्धकारितदिङ्मुखेन
घा जलधरादिव वर्षीयमाणे नेहपण्डरथवलातपत्रसहस्रसंकटमनेकद्वीपान्तरागतनृपानसमं
कुलं राजभवनमासाद्य तुरंगमादवततार ॥ प्रवर्तीर्य च करतलेन करेणैव वैशम्पायनमवलम्ब्य
पुनः सविस्मयं प्रस्थितेन बलाहकेनोपदिश्यमानमार्गस्त्रिभुवनमिव पुञ्जीभूतमष्टहीनक
नकवेत्रलतैः सितोष्णीषैः सितवेषपरिग्रहेनयाश्रीनद्वीपसप्रज्ञवैरिव कृतनयगप्रहरैरिव म
ह्याप्रमाणैर्दिवानिशमालिखितैरिवोत्कीर्णैस्तोरणस्तम्भनिषण्णैः चन्द्रशालिकाविटङ्कवेदिका
सकटशालावैरभङ्कुःपैकपह्नाप्तिनकैलासशोभैरमलसुधावदातैः सप्रालेयशैलमिव महाप्रसा
दैरनेकवनायनविवरविनिर्गतफ्रवतिभूषणकर्णाभरणसहस्रनया कनकशाङ्कःलाजालके
नोपरिवितानेन विराजमानमन्तर्गनाकथनिवाह्नाभिराशीविषमङ्कुलाभिःपाना वलग्रहाभि

का॰
टू॰

49

दिवातिगम्भीराभिरायक्रथ्यमानाभिरुपेतेन सबलाचरणालङ्कारसक्रमणिशकलैः शिखरनिली
नशिखिवरञ्जलकृतकलकेकाकलकलैः क्रीडापर्वतकैरुपशोभितमुज्ज्वलवल्कलकम्बलावगुण्ठि
तकनकपर्णाभिः प्रलम्बचामरकलापभ्रामिभिश्चलकर्णपल्लवाभिर्दिग्भिरिवोपाहृतशोभा
विनर्थानिर्भूतनाभिर्ग्रामकरेणुकाभिरशून्यकक्षान्तरमालानस्तम्भनिषण्णसेनचनवजलधरघोषग
म्भीरमन्त्रगानवीणावेणुरवरम्यमास्फालितघर्घरिकाघर्घरमनवरतसङ्गीतमृदङ्गध्वनिमामि
तलोचनत्रिभागेन निश्चलकर्णतालनाकर्णयतावामदशनकोटिनिषण्णहस्तेन सलीलमुभय
पार्श्वावलम्बिवर्णकम्बलतया विन्ध्यगिरिणेवाविष्कृतधातुविचित्रितपक्षसम्पुटेनाधोरणगीता
नन्दकृतमन्दकण्ठगर्जितेन मदजलशकलमाङ्कुशशोभितश्रवणपुटेन रजनिकरबिम्बभ्रमिवि
तसंवर्तकाम्बुदवृन्दविडम्बिनेन कर्णान्तलम्बिना काञ्चनमयेन कृतकदन्तमूलमिवाङ्कुशे
नमुखमुद्रयन्नामदजलमलिनेन द्वितीयेन कर्णचामरेण कपोलतलदोलायमानेन म ध
करञ्जलेनालङ्क्रियमाणेनात्मगतया पूर्वकायस्य प्रतिवामनतयाच जघनभागस्यपाताला
दिवोन्निष्पतनाति ग्रामसमयेन परिस्फुरत्साचन्द्रनक्षत्रमालेन शरदारम्भेणेव प्रकटिताकारणचा
रुपृष्ठकेरणवामनरूपेणेव कृतत्रिपदीविलासेन स्फाटिकगिरितटेनेवलग्नसिंहमुखप्रतिमेन

गं॰

प्रसाधितेनेवालोलकर्णपल्लवाहननसुखेन गन्धमादननाम्ना गन्धहस्तिना सनाथीकृतैक
देशमुज्ज्वलपटकदम्बप्रचारिभिरेभिःस्वरसितमधुकरसंघटिकारवमुखरकर्णैर्निषण्णलोहि
तस्कन्धकेसरबालपल्लवैर्वनगजरुधिरपाटलसटैरविकेसरिभिः प्रशोभितयवसवाधि
ष्ठितेवरोपविष्टमन्दुरापालैरारब्धमङ्गलगीतध्वनिदत्तकर्णैः प्रवृत्तैःकपोलालापिनमधुरसस
रसल्लासितलाजकवलैः भूपालवल्लभैर्मन्दुरागतैस्तुरगैरध्यासितं अधिकरणमण्डपगतैः
चार्यवेषैरत्युच्चवेत्रासनोपविष्टैः कर्ममयैरिव धर्माधिकारिभिर्महाप्रकरणैरधिष्ठितं अधिगत
सकलग्रामनगरनामभिरेकभवनमिव जगदखिलमालोकयद्भिरालिखितसकलभुवन
व्यापारतया धर्मराजनगरव्यतिकरं दर्शयद्भिः अधिकरणलेखकैरालिख्यमानशासनसह
स्रमनन्तरावस्थितनरपतिनिर्गमप्रतीक्षमाणपरिवारेण स्थानस्थानेषु बद्धमण्डलेन कनकमया
र्धचन्द्रनाराचगणाशानशाकलैःस्वर्णफलकैर्निर्माणमयमिव दर्शयता स्फुरितनिशितकरवालक
रमरोहकरालितातपेन प्रकटवर्णप्रच्छादितधवलदन्तपत्रेणोर्ध्वबद्धमौलिकलापेन धवल
चन्दनस्थासकखचितभुजोरुदण्डेन बद्धासिधेनुकेनाईद्रविडसिंहलप्रायेण सेवकजनेनाध्या
नमण्डपगतेन यथोचितासनोपविष्टेन प्रसाधयता रोदरक्रोडमभ्यस्यता सप्तपदव्यापारमास्फा

का॰
दं॰

50

लयता पवित्रवादिनीमालिखता चित्रफलके भूमिपालप्रतिबिम्बमाबध्नता काव्यगोष्ठीमातन्वता परि
हासकथा विन्दता बिन्दुमतीं चिन्तयता प्रहेलिकां भावयता नरपतिकृतकाव्यसुभाषितानि पठता छि
पदीशब्दता काव्यगुणान् उत्किरता भङ्गानालापयता वारविलासिनीजनमाकर्णयता वैतालि
कगीतमनेकसहस्रसंख्येन धवलोष्णीषपटाश्लिष्टविकटकिरीटसंकटशिखरमाणिक्यरश्मिशिख
ण्डावलम्बबालातपमण्डलेनेव उल्लसद्वनचक्रवालेनेव महार्थाभिषिक्तेन सामन्तलोकेनाधिष्ठि
ते । आस्थानोत्थितभूमिपालसंवर्तितानाचक्रथानवल्गामनानां चरणाभिरनेकवर्णैर्विन्द्राक
धम्रैरिव विराजितसभापर्यन्तममलमणिभूमिसंक्रान्तसर्वावनिबद्धप्रतिबिम्बतया विकचक
मलपुष्पप्रकरमिव संपादयता गतिवशचरणानूपुररवविहार्यरवमाना स्वनश्रवणेन स्कन्धावस
क्तकनकदण्डचामरेण निर्गच्छता प्रविशता चानवरतं वारविलासिनीनां जनेनानुवर्तितमेकदे
शनिषण्णचामीकरस्तम्भोल्लासफलस्वगणमिनस्तनः प्राचलितासितकरनूहिकाञ्चरङ्गपरिमल
वासितदिग्मुखमनेककुब्जकिरातबधिरवामनमूकसंकुलमप्याहूतकिन्नरमिथुनमानीत
वनमानुषं मातङ्गमेषकुक्कुटकुरङ्कपिञ्जलनावकवर्तिकायक्षशुकहरिजितचकोरकादम्ब ।
हारीतकोकिलमालप्यमानस्तकशारिकामिभयानमदयारमलामप्रेक्षस्मिनेश्रुनिकुञ्जक्षि

गे॰

शिखरिणां जीवितैरिव गिरिगह्वरनिवासिभिर्गृहीतैः पञ्जरकेसरिभिरुद्भास्यमानस्त्रस्यमा
नैः काञ्चनभवनजनितदावानलशङ्कैः लोलतारकैर्भ्रमद्भिर्भवनहरिणकदम्बकैर्लोचनप्र
भयाशबलीकृतदिगन्तरं उद्दामकेकारवानुमीयमानमरकतकुट्टिमस्थितशाखिशिखण्डिमण्ड
लमतिशिशिरचन्दनविटपिच्छायानिषण्णनिद्रायमाणहंससमूहं प्रेरितबालिकाजन
प्रस्तुतकार्मुकपाञ्चालिकाक्रीडनेनानवरतमवास्यमानदोलाशिखरहरिणीतचण्डदण्डा
रसूत्रविनाशाशङ्केन भुजगनिर्मोकशङ्किनमयूरनृत्यमानाहारवेण सौधशिखरावतीर्णप्रच
लितपारावतकुलनयास्थलोत्पलिनीवनशोभितेनाङ्गनाः प्रतिकाञ्चनप्रस्तुतनरपतिचित्र
विडम्बनक्रीडेनाश्वमन्दुरापरिभ्रष्टागतैरवल्लभभवनदाडिमीफलैरखण्डितानाङ्गनसहका
रपल्लवैरभिभूतकुब्जवामनकिरातकवनलाञ्छितानि भूषणानि विकरद्भिः कपिभिराकुली
कृतेन स्त्रकशारिकाप्रकाशितसुरतविस्रम्भालापजनितावबोधजनेन प्रमादसमारोहण
चलितैरबलानां चरणावसक्तैर्मणिमयैर्विभूषणैः पदेपदे रणद्भिस्तुलाकोटिवलयैर्हिंग्र
णीकृतकूजितमन्ताभिः भवनकलहंसमालाभिर्धवलितानाङ्गनेन धौतधवलदुकूलो
त्तरीयैः कलधौतदण्डावलम्बिभिः पलितपाकपाण्डुरमौलिभिः प्राचारमयैर्मेधावा

का॰
पू॰
५१

मर्यादेव विनयमर्यादेव गम्भीराकृतिभिः स्वभावधीरैरम्भोधिभिरिवेयः परिजनेनापि जरत्सिंहैरिवा
परित्यक्तसर्वाङ्गावष्टम्भैः कञ्चुकिभिरधिष्ठितेन सम्प्रचित्राभ्यन्तरं जलधरमनाथमिव हस्त्यग्र
कुसुमपटलैः सनीहारामिव ग्राममञ्जनरत्नघटामथकरपीकरैः सनिशामिव तमालवीथिकान्ध
कारैः सबालातपमिव रक्ताशोकैः सभारागामिव ब्रह्माकलापैः सवर्षासमयमिव धारागृहैः
सतडिल्लतामयमिव हेममयीभिः शालभञ्जिकाभिः शिवभवनमिव द्वारावस्थितदण्डपाणिप्रती।
हारगणाश्रयं लोहितकविराजमिव विविधवर्णश्रेणिप्रतिपद्यमानानेकाभिनवार्थसञ्चयमस
रोगणमिव प्रकटमनोरमाङ्गं दिवसमकरोदयमिव विलसत्पद्माकरकमलामोदसुरभिकिर
णमिव निजलक्ष्मीहृतकमलोपकारं नाटकमिव प्रकटपताकाङ्कशोभितं शोणितप्रदमिव
बाणयोगयावास्तोपेतं पुराणमिव यथाविभागावस्थापितसकलभुवनकोशं सम्पूर्णचन्द्रोद
यमिव मृगाङ्कसहस्रसंवर्धितरत्नालयं दिग्गजमिवाविच्छिन्नमहादानसन्तानं ब्रह्माण्डमि
व सकलजीवलोकाधिवासहारकारणोत्पन्नं हिरण्यगर्भमीशानबाहुवनमिव महाभोगिभोग
मण्डलसहस्राधिष्ठितकोष्ठं महाभारतमिवानन्तगीताकर्णनानन्दितनरं यदुवंशमिव उ
लङ्घमागतशूरभीमसुरूपोन्नमसुरूपविभवलयपरिपालितं व्याकरणमिव प्रथममध्यमोत्तम

गे॰

प्रकृष्टविभक्तिस्थितानेकदेशाकारकाख्यानसम्प्रदानक्रियाव्ययप्रपंचं स्वस्थितशब्ददीधिमिव
भयान्तःप्रविष्टसपत्नभूमिभृत्सहस्रसङ्कुलं नर्थानिकृष्टसमागममिव चित्रलेखादर्शि
तविचित्रसकलत्रिभुवनाकारं बलियज्ञमिव प्रमाणप्रकृष्टवामनाधिष्ठिताभ्यन्तरं शुक्ला
पक्षप्रदोषमिव वितनशशिकिरणकलापधवलाम्बरवितानं नरवाहनदत्तचरितमिवा
नः संवर्धितप्रियदर्शनराजदारिकाकूरसचर्वणदत्तोत्कण्ठं महातीर्थमिव नानाश्रवया
त्रसंकुलनिशासमयमिवानेकनक्षत्रमण्डलालङ्कृतं सभानसमयमिव सर्वदिग्भागरागात्र
मेयमिश्रोदयं गान्धिकभवनमिव स्नानधूपवि लेपनवर्णकोज्ज्वलं ताम्बूलिकभवनमि
व हृतलवलीलवङ्गैलाककोलपत्रसञ्चयं प्रथमवयसासमागममिवाविदितहृदयाभि
प्रायचेष्टाविकारं कामुकजनमिव बहुचाटुसंलापसुभाषितरसास्वाददत्तलालसाद्भुतम
ण्डलमिव दीयमानशतसहस्रालङ्करणाङ्कितलेख्यपत्रसञ्चयं धर्मारम्भमिवाशेषजनमनः
प्रह्लादनं महावनमिव विविधश्वापदद्विजोपकृष्टं रामायणमिव कपिकथासमाकुलमार्गं
कुलमिव नकुलालङ्कृतं सङ्गीतभवनमिव अनेकस्थानावस्थापितमृदङ्गं रथकुलमिव भर
तगणानन्दितं ज्योतिषामिव ग्रहमोक्षकलाभागनिपुणं नारदीयमिव माकर्ण्यमानराजध

का॰
दू॰

मेयं ग्राममिव विविधशाहूरसलज्ञास्वादं म्हङ्काव्यमिवानन्यचिन्तितस्वभावाभिप्रायावेदकं महान
दीप्रवाहमिव सर्वङ्गतिनापहूरथनमिव कस्यचिन्नाकाङ्क्षनीयं सन्ध्यासमयमिव हश्यमानचन्द्रोद
येनारायणवक्षःस्थलमिव श्रीरत्नप्रभाभासितदिग न्तरं बलभद्रमिव कादम्बरीरसोविशेष
वर्णेनाकुलमनिब्राह्मणमिव पद्मासनोपदेशात्दर्शितभूमण्डलं स्कन्दमिव शिखिक्रीडारम्भच
ञ्चलं कुलाङ्गनाप्रचारमिव सर्वदोषज्ञानशङ्कं वेश्याजनमिवोपचारचतुरं दुर्जनमिवापगतप
रलोकभयं मर्त्यजनमिवागम्यविषयाभिलाषिणं यगम्याविषयासक्तमिव प्रसंसनीयं योगिन
मिवाभ्यस्तापरप्रकृष्टप्रवेशं सत्रकभटगणमिव ह्तानाह्तनमहूनविचारं सुचरितमिवादिमध्या
वसानकल्याणकारं रामरारम्भमिव परिस्फुरत्प्रवरागारूणीक्रियमाणनिशान्तं दिव्यमुनिगण
मिवकलापिस्तनाथ्यस्तेनकेतूपशोभितं भारतसमरमिवहूतवर्मशालीसुखचक्रसम्भारभीषणं
पातालमिव महाकञ्चुकिसहस्राध्यासितं वर्षपर्वतसमूहमिवान्तःस्थितनापरिमाणसुक्ष्मिः हे
मकूटं महाद्वारमपि दुष्प्रवेशं अवन्तिविषयगतमपि मागधजनाधिष्ठितं स्फीतमपि भ्रमन्त्र
ग्रलोकं राजकुलं विवेश ॥ ससम्भ्रमोपगतैश्च हतनप्रणामैः प्रतीहारमण्डलैरुपदिश्यमा
नमार्गः सर्वतः प्रचलितेन चलनावस्थानेन हूरपर्यस्तमौलिशिथिलितहस्तमणिचुम्बितव

गें
५८

हस्तातलेन राजलोकं प्रत्येकशः प्रतीहारनिवेद्यमानेन सादरं प्रणम्यमानः पदेपदे भवनविनिर्ग
ताभिराचारचतुराभिरन्तःपुरवृद्धाभिः क्रियमाणावतारणकमङ्गलः भुवनान्तराणीव विविधप्रा
णिसहस्रसङ्कुलानि सप्तकक्षान्तराण्यतिक्रम्य अभ्यन्तरावस्थितमनवरतशस्त्रग्रहणश्यामिकाका
लीभवत्करतलैः करचरणलोचनवर्जमासितलोहजालावृतशरीरैरालानस्तम्भैरिव गजमदप
रिमललोभनिरन्तरनिलीनमधुकरपटलजटिलैः क्रमागतैरदोषान्वयैरनुरक्तैः महाप्राणैरत
यानिकर्कशैरयाचदानवैरिवाकारसम्भाव्यमानपराक्रमैः सर्वतः शरीररक्षाकारनियुक्तैः पुरु
षैः परिवृतं उभयतो वारविलासिनीभिरनवरतमाधूयमानचामरं अमलशयनतलशोभिनि मु
रञ्जरामिव मन्दाकिनीवारिणि हंसधवले शयनीयतले निषण्णमपि पितरमपश्यत् । आलोकये
त्येव प्रतीहारवचनानन्तरमतिदूरावनतेन चलितचूडामणिना शिरसा कृतप्रणामं एह्येहीत्या
दैव प्रसारितभुजयुगलः शयनीयतलादीषदुच्छ्वसितमूर्तिरानन्दजलापूर्यमाणलोचनः स
मुद्गतपुलकतया सीव्यन्निवैकीकुर्वन्निव पिबन्निव तं पिता विनयावनतमालिलिङ्ग । आलिङ्गि
तश्चापितचरणपीठसमीपे पिण्डीकृतमुत्तरीयमात्मनः ताम्बूलकरङ्कवाहिना सत्वरमासनी
कृतमपनयेति पाणिना वदन्नेव चरणेन सपुत्रस्ताम्रचूडापीडः क्षितितल एव निषसाद अनन्तरं निहि

का· दं· पत्र

53

नैवासने राज्ञा सह निर्विशेषमुपविष्टो वैशम्पायनोऽप्युपविष्टः । मुहूर्तमिव विश्रम्य च चामरोत्क्षेप
निश्चलानां वरकामिनीनां साभिलाषैरनिलचलितकुवलयदलदामदीर्घैरजिह्मितनवलनादकटा
क्षैरवलोक्यमानश्च दृष्टिपातैः स्थित्वा गाढवत्सं पुत्रवत्सलां मातरमभिवाद्य दर्शनलालसया यथाक्रमं
सर्वाजननीरानन्दयोनिविसर्जितः पित्रा सविनयमुत्थाय निवारितपरिजनो वैशम्पायनद्वितीयोऽन्तः
पुरप्रवेशाय योग्येन राजपरिजनेनोपदिश्यमानवर्त्मा शुद्धान्तमुपययौ । तत्र च धवलकञ्चुका
वच्छन्नशरीरैरनेकशतसङ्ख्यैः श्रियामिव क्षीरोदकल्लोलैः समन्तादुद्भ्रान्तैर्वार्षिकैः परिहृतामि
ति सर्वतश्चाकाराभिः शुक्लाम्बरधारिणीभिः सन्ध्याभिरिव सकलजनवन्द्याभिः प्रलम्बश्रवणपा
शाभिर्विदितानेककथावृत्तान्ताभिर्भूतपूर्वाः कथाः कथयन्तीभिरितिहासान् वाचयन्तीभिः पुस्त
कान्दधतीभिः धर्मोपदेशानावेदयन्तीभिः पुण्याः कथाः कथयन्तीभिर्जरत्प्रव्राजिकाभिर्विनो-
द्यमानानां उपरचितस्त्रीवेशभाषेण षण्ढेन विकटप्रसाधनेन वर्षवरजनेन संसेव्यमाना मनव
रतविक्षिप्यमानवालव्यजनकलापा मुक्तान्तःपुरजनेनेव वसनाभरणकुसुमपटलताम्बूलनाल
हृद्याङ्गरागगन्धद्रव्यधारिणा मण्डलोपविष्टेनोपास्यमाना पयोधरान्तरावलम्बितमुक्ताग्रगणामव

गें·

लहयमध्यप्रवृत्तगङ्गाप्रवाहामिव मेदिनीमासन्नवायनदर्पणपातितमुखप्रतिबिम्बामर्कबिम्ब

प्रविश्याभिमण्डलामिव दिवं सम्प्रपस्थूयमानं तेन ननाम ॥ सा तु तं ससम्भ्रममभ्युत्थाय सत्वरपाश्र्वा
सम्पादनदत्तेषु पार्श्ववर्तिनि परिजने स्वयमेव कृतावतरणका प्रस्नुतपयोधरदत्तवत्सयोधिबिन्दुच्छ
लेन द्रवीभूयस्नेहाञ्जलेन निर्गच्छतेव हृदयेनान्तः प्रभवता तानि धारयन्ती सुचिरमुपाघ्राय तनयं गाढं
तमालिलिङ्ग । अनन्तरमाश्लिष्टं वैशम्पायनं च विनयादवनितले ससम्भ्रमविषाद्गमाकृष्य बलादः
निच्छन्तमपि चन्द्रापीडमुत्सङ्गे समारोपितवती । ससम्भ्रममपरिजनोपनीतायामासन्द्यामुप
विष्टे च वैशम्पायनेऽपि पुनः पुनरालिङ्ग्य ललाटदेशे वक्षसि भुजशिखरयोश्च स्पृशन्ती करतले
न पराम्रष्टपृष्ठीनमवादीत् । वत्स कठिनहृदयस्ते पिता येनेयमाकृतिरीदृशी त्रिभुवनलालनी
यां क्लेशमतिमहान्तमियन्तं काललम्बिता । कथमसि सोढवाननतिदीर्घां गुरुजनयन्त्रणां
अहो बालस्यापि सतः कठोरस्येव ते महद्धैर्यं । अहो विगतशिशुजनक्रीडाकौतुकलाघवमर्भक
त्वेऽपि हृदयं अहो गुरुजनस्योपरि तेऽभक्तिरसाधारणा सर्वथा यथा पितुः प्रसादात्समस्ताभिम
तेनोविद्याभिरालोकितोऽसि एवमचिरेणानुरूपाभिर्वधूभिरुपेतमालोकयिष्यामीत्यभिधाय
चलज्ज्योत्स्निनावनतमात्मस्फटिकप्रतिबिम्बगर्भे विकचकमलकृतकर्णावतंस इव कपोले पर्यु
चुम्बदेनं । एवं च तत्रापि नातिचिरमवस्थित्वा क्रमेण सर्वान्तःपुराणि दर्शनेनानन्दयामास ।

का॰ टं॰ ५४

54

निर्गम्य च राजकुलाद्द्वारावस्थितं इन्द्रायुधमारुह्य तथैव तेन राजपुत्रलोकेनानुगम्यमानः शुकनासं
गृहमयासीत्। ग्रामावस्थितविविधगजघटासङ्कटमनेकतुरगसहस्रसम्बाधमपरिमितजनसह
स्रसंमर्दसङ्कुलमेकदेशोपविष्टैः सहस्रशो निबद्धचक्रवालैरनेककार्यागतैर्दर्शनोत्सुकैः सम
न्ततो रक्षपदैः पाशुपतैर्द्विजैश्च दिवानिशमासेव्यमानमभ्यन्तरप्रविष्टानां च सामन्तानां जघनो
पविष्टप्रकोष्ठोत्सङ्गावस्थितद्विगुणकुथाभिरतिचिरावस्थाननिर्वेधमसहमाधोरणाभिरपर्याण
भिः सपर्याणाभिश्च निश्चलावस्थानमचलायिताभिः यानशःकरिणीभिराकीर्णं शुकनासस्य गृह
मासाद्य सत्वरमधावितैः प्रतीहारप्रकोष्ठैरनिर्वार्यमाणोऽपि राजकुलेरिव राजपुत्रो बाह्याङ्गनप
र्यन्तरगादवततार। द्वारदेशावस्थितमपि तुरङ्गमस्त्वेषामाप्यायनमवलम्ब्य पुरः प्रधावितैः
समुत्सारितपरिजनैस्तथैव प्रतीहारमण्डलैरुपदिश्यमार्गस्तथैव चलितमुकुटकोटिभिर्नरेन्द्र
वृन्दैः सेवासमवस्थितैरुत्थायोत्थाय प्रणम्यमानस्तथैव च प्रचण्डप्रतीहारहुङ्कारभयमूकीभ
वत्परिजनानि प्रचलितनवग्रामसचकितसामन्तचक्रचरणशातचलितनवमहन्धवराणि कक्ष्यान्तरा
णि वीक्षमाणस्तथैव नवसुधावदानप्रासादसहस्रनिरन्तरं द्वितीयमिव राजकुलं शुकनासभव
नं प्रविवेश। प्रविश्यमानेकनरेन्द्रमध्योपविष्टमपरमिव पितरमुपदर्शितविनयो दूरादवनतेन

गें॰ ५४

मौलिना शुकनासं ववन्दे । तं शुकनासः ससंभ्रममुत्थाय सममुत्थितराजलोकः सादरमभिमु
खदत्ताविरलपदः प्रहर्षविस्फारितलोचनागलितानन्दजलः सहैव वैशम्पायनेन प्रेम्णा गाढ
मालिलिङ्ग । आलिङ्गितोन्मुक्तश्च सादरोपनीतमपहाय रत्नासनमनन्तरमेव राजपुत्रः सप्रश्रया
विशत् अनन्तरं चितेनैव वैशम्पायनः समुपविष्टे च राजपुत्रे च राजपुत्रे शुकनासवर्जमन्यः समस्तमखि
लमवनिपालचक्रमुज्झितनिजासनमवनितलमभजत । स्थित्वा तूष्णीं शुकनासः समुद्ग
तपुलकैरङ्गैरावेद्यमानहृदयप्रहर्षस्तमब्रवीत् तात चन्द्रापीड अद्य खलु देवस्य ता
रापीडस्य समासादितविद्यमुपारूढयौवनमालोक्य भवन्तं सुचिराद्भुवनराज्यफलप्राप्तिरुपजाता
अद्य संवृत्ताः सर्वाशिषः अद्य फलितमनेकजन्मान्तरोपार्जितमवदातं कर्म अद्य प्रसन्नाः कु
लदेवताः न ह्यपुण्यभाजामेवंविधाः सकलत्रिभुवनविस्मयहेतवः पुत्रतां प्रतिपद्यन्ते क्व
वयः क्व चेयममानुषी शक्तिः क्व चेदमशेषविद्याग्रहणसामर्थ्यं अहो धन्याः प्रजाः या
साभवता भागीरथप्रतिमो भवानुत्पन्नः पालयिता किं खलु कृतमवदातं कर्म वसुन्धरया
यया सि भर्ता समासादितः हरिवक्षःस्थलनिवासासक्तहृदया सतिनि निर्हृता खलु लक्ष्मीर्या
विग्रहवती भवन्तं नोपसर्पति सर्वथा कल्पकोटीर्महावराह इव दंष्ट्रावलयेन वहतु बहुना

का॰
पू॰
५५

55

वसुन्धराभारं सहस्रमित्रैर्विन्यस्याभिधाय च स्वयमाभरणवसनकुसुमाङ्गरागादिभिरभ्यर्च्य विसर्जयांचका
र । विसर्जितस्तया तयान्तःप्रविश्य दृष्ट्वा वैशम्पायनमातरं मनोरमां निर्गम्य समागतस्नेहाकृष्टः पित्रा
पूर्वकल्पितं प्रतिच्छन्दमिव राजकुलस्य द्वारावस्थितपूर्वकलशमाबद्धहरितपल्लववन्दनमालमु
ल्लासितपताकासहस्रमभ्याहतमङ्गलतूर्यरवपरिपूरितमुपरचितविकचकमलकुसुमप्रकार
मविरहिताग्निकार्यपवित्रमुज्ज्वलविविक्तपरिजनमुपपादिताशेषगृहप्रवेशमङ्गलं कुमारभवने
जगाम ॥ गत्वा च श्रीमण्डपावस्थिते शयने मुहूर्तमुपविश्य सहागतेन राजपुत्रलोकेनाभिषेका
दिकमशनावसानमशेषमकरोद्दिवसविधिम् । अभ्यन्तरे च स्वशयनीयगृहे वैशम्पायनस्यावस्था
नमकल्पयत् एवंप्रायेण चास्योदन्तेन तदहः परिणतिमुपययौ । गगनतलादवतरन्त्या दिवस
श्रियः पद्मरागनूपुरमिव स्वप्रभापिहितरन्ध्रं रविमण्डलमुत्तुङ्गपादपपात सलिलप्रवाहमि
व रथचक्रमार्गानुसारेण दिवसकरस्य वासरालोकः प्रतीचीं ककुभमगमत् । अभिनवपल्लवलो
हिततलेन करेणेवाधोमुखप्रसृतेन दिवसकरबिम्बेन वासरः कमलरागमशेषममार्ज्ज । कम
लिनीपरिचयपरिमलागतालिमालाकलितकण्ठकालपाशैरिव चक्रवाकमिथुनमाकृष्यमा
णं विजघटे । करपुटैर्दिवसान्तमापीनमरविन्दमधुरसमिव रक्तातपच्छलेन दिवसकरबिम्बे

पू॰
५५

ववाम । क्रमेणच प्रतीचीकर्णोत्पले लोकान्तरमुपगते भगवति गभस्तिमालिनि समुत्फुल्ला
सितनायामम्बरतलतडागकमलिन्यां सन्ध्यायां हंसाग्रहपङ्क्तिपत्रलतास्विव तिमिरलेखासु सु
रत्नीषु दिशां मुखेषु अलिकुलमलिनेन कुवलयवनेनेव रक्तकमलाकरे तिमिरनिकरेणोत्सार्य
माणे सन्ध्यारागे । कमलिनीनिमीलितमानपमुन्मूलयितु मन्धकारकरपल्लवेष्विव विशत्सु
रक्तकमलोदराणि मधुकरकुलेषु । शनैः शनैश्च निशाविलासिनीश्रवणावतंसपल्लवे गलित स
न्ध्यारागे दिव्यनिवेशेषु सन्ध्यादेवतार्चनबलिपिण्डेषु शिविरदेवालयनिमिराम्बुनाढ्यमयू
राम्बायि मयूराधिष्ठितास्विव मयूरवासयष्टिषु गवाक्षविवरनिलीनेषु प्रासादलक्ष्मीकर्णोत्पले
षु पारावतेषु । विगतविलासिनीसंवाहननिश्चलकाञ्चनपीठासु स्तम्भीभूतनृत्यशालास्वनास्व
न्तःपुरदोलासु भवनसङ्ककारणाखावलम्बितपञ्जरेषु विगतालापेषु शुकसारिकानिवहेषु
सङ्गीतविरामविश्रान्तवासलसायमानासु वीणासु फवतिनूपुररवमोहात्पशमनिभृतेषु भवन
कलहंसेषु अपनीयमानकर्णशंखचामरनक्षत्रमालामण्डनेषु मधुकरकुलमलिनकपोलभि
त्तिषु स्तम्भवारणेषु । प्रदीयमानेषु राजवल्लभतुरङ्गमसन्दुरादीपेषु प्रविशत्सु प्रथमयामकु
ञ्जरघटासु कृतराजस्वस्त्ययनेषु निष्क्रामत्सु पुरोहितेषु विसर्जितराजलोकविरलपरिजने

का॰
दं॰
५६

56

ष्व विस्तारितेष्विव राजकुलकल्याणरेषु प्रज्वालितदीपिकासहस्रप्रतिबिम्बचुम्बितेषु कृतविकच
चम्पकदलोपहारेष्विव मणिभूमिकुट्टिमेषु निपतितदीपालोकास्वविविरद्वारान्तनलिनीविनोद
नागतबालातपास्विव भवनदीपिकासु निश्चलमेष्विव पिञ्जरकेसरिषु समारोपितकार्मुकेष्व
हीनसायकेयामिकद्वाराः ष्व प्रविष्टेमकरकेतौ वनेसपल्लवेष्विव सरागेषु कर्णीक्रियमाणेषु
स्मरतन्त्रीवचनेषु हृदयेमणिभङ्ग इव सङ्क्रान्तानलेषुज्वलत्सु मानिनीनां शोकविधुरेषु हृदयेषु
प्रवृत्ते प्रदोषसमये । चन्द्रापीडः प्रज्वालितदीपिकाचक्रपरिवारः स्फुरणाभ्यामेव राजकुलं गत्वा
पितुः समीपे मुहूर्तं स्थित्वा दृष्ट्वा च विलासवतीमागत्य स्वभवनमनेकरत्नप्रभाभावलम्बरगारा
जफणामण्डलमिव हृषीकेशः शयनतलमधिशिश्ये प्रभातायां च निशायामुत्थायसम
भ्युत्थानः पितुरभिनवमृगयाकौतुकाकृष्यमाणहृदयो भगवत्प्रसादेन एवमहस्त्ररश्मौ प्राप
स्मेन्द्रायुधमयन्तो वालेयप्रमाणेनाकर्षद्भिश्चामीकरशृङ्खलाभिः कौलेयकान् जवनबाद्यचर्म
शावलवसनकञ्चुकधारिभिरनेकवर्णपट्टचीरिकोष्णीषैः निबिडकच्छैः अनवरतश्रमोपचि
तोरुपिण्डकैः कोणहस्तैः श्वपोषकैरनवरतकृतकोलाहलैः प्रधावद्भिरहिर्गणीकृतगम
नोत्साहः बहुगजतुरगपदातिपरिवृतो वनं ययौ ॥ तत्र च कर्णेनावकृष्टश्रुङ्के विकचकु

गं॰
५६

वलयनीलपलाशकान्तिभिर्भल्लैः मदकलेभकुम्भभित्तिभिर्दीर्घैश्च नाराचैः चापटङ्काररवभ
यचकितवनदेवतोन्मुखवीक्षितो वनवराहान्केसरिणः शरभांश्चमरान्कुरङ्गांश्च जघान ।
अन्यांश्च जीवत एव क्रीडनतया स्फुरतो जग्राह समारूढे च मध्याह्नः सवितरि वनस्थानोत्थि
तेनैव श्रमसलिलबिन्दुवर्षमनवरतमुत्सृजता मुञ्जद्दशनविघट्टनखणखणायितखली
नेन श्रमशिथिलमुखविगलितफेनिलरुधिरलवेन पर्याणपट्टकान्तमारोपितफेनराजिना
कर्णावतंसीकृतमुत्फुल्लकुसुमशबलमलिपटलझाङ्कारमुखरं वनगमनचिह्नं पल्लव
स्तवकमुद्वहतेन्द्रायुधेनोह्यमानः । समुत्पन्नस्वेदतयान्तरान्तरावीहृतमण्डलेन द्विगुण
तरमुपजनितकान्तिः अनेकद्रुमपात्रमारसंभ्रमपरिभ्रष्टच्छत्रधारतया छत्रीकृतेन नवपल्ल
वेन निवार्यमाणातपः वनविविधवनलताकुसुमरेणुधूसरो वसन्त इव विग्रहवानः स्वेदर
जोमलिनललाटाभिव्यक्तावदातस्वेदलेखः दूरविच्छिन्नेन पदातिजनेन शून्यीकृतपार्श्वभा
गः मज्जवितरगाधिरूढैरल्पावशिष्टैः सहराजपुत्रैः एवं वराहः एवं वनमहिषः एवं
शरभः एवं हरिण इति तमेव मृगयावृत्तान्तमुच्चारयन्भवनमाजगाम । अवतीर्य च स
संभ्रमप्रधावितपरिजनोपनीते समुपविश्यासने वारबाणमवतार्य अपनीय चाशेषं तुरङ्ग

का· दं· ५८

57

धिरोहणोचितं वेषपरिग्रहमितस्ततः प्रचलिततालवृन्तपवनापनीयमानश्रमः मुहूर्तं विशश्राम
विश्रम्य च मणिरजतकनककलशसनाथामन्नविन्यस्तकाञ्चनपीठां स्नानभूमिमगात् । निर्वर्ति
ताभिषेकव्यापारस्य च परिविक्तवसनपरिमृष्टवपुषः स्वच्छदुकूलपल्लवाकलितमौलेः गृहीत
धौतवाससः कृतदेवार्चनस्याङ्गरागभूमावुपविष्टस्य राज्ञा विसर्जिता महाप्रतीहाराधिष्ठिता रा
जपरिचारकाः कुलवर्धनासनाथाश्च विलासवतीदास्यः सर्वान्तःपुरप्रेषिताश्चान्तःपुरचारिकाः
पटलकविनिहितानि विविधान्याभरणानि माल्याङ्गरागान्वासांसि चादाय पुरतः तस्योपत
तस्थुः कृपानिस्तृश्च । यथाक्रममादाय च तेभ्यः प्रथमं स्वयमुपलिप्य वैशम्पायनमुपचारवि
ताङ्गरागं कृत्वा दत्त्वा च समीपवर्तिभ्यो यथार्हमाभरणवसनाङ्गरागकुसुमानि विविधमणिभा
जनसहस्रसारमम्बरतलमिव स्फुरिततारागणमाहारमण्डपमुपगच्छत् । तत्र च त्रि
गुणीनकुथासनोपविष्टः समीपोपविष्टेन वैशम्पायनेन यथार्हभूमिभागोपवेशितेन च
राजकुलेन इदमस्मै दीयतामिति प्रसादविशेषदर्शनसंवर्धितसेवारसेन महाहारविधि
मकरोत् । उपस्पृश्य च गृहीतताम्बूलस्तस्मिन्मुहूर्तं स्थित्वेन्द्रायुधसमीपमगमत् तत्र चा
नुपविष्ट एव तद्गुणोपवर्णनप्रायालापाः कथाः कृत्वा सत्त्वायत्ताप्रतीक्षणोन्मुखे पार्श्ववर्तिनि

दं· ५८

परिजनेनाग्रहृतहृदयः स्वयमेवेन्द्रायुधस्य पृष्ठादवतीर्य निर्गत्य च राजकुलमयासीत्
तेनैव च क्रमेणावलोक्य राजानमागत्य निजभवनमनैषीत् । अपरेद्युरुषस्येव प्रभात एव सर्वाङ्गः प्रबोधि
तमवनिपतेः परमसम्मतमन्त्रिमार्गागतया प्रथमे वयसि वर्तमानया राजकुलसंवासप्रगल्भ
यापत्राङ्कितधैर्यया किञ्चिदुपारूढयौवनया प्राक्कोपकालोहितरागेणाश्लेषेण रविणाव
गाढनया सबालातपयेव पूर्वया ककुभा मत्ययग्दलितमनःशिलाहृतवर्णेनाङ्गरागलावण्य
प्रभाप्रवाहेणास्नतरसनदीप्रवेशेणेव भवनमापूरयन्त्या । ज्योत्स्नयेव राज्ञ्यग्रहग्रासभयादपहृ
य रजनिकरमण्डलमवनिमवतीर्णया राजकुलगृहदेवतयामूर्तिमत्या क्वणितमणिनूपुर
कलितचरणयुगलतया कूजत्कलहंसकलितकमलयेव कमलिन्या महार्हमेखलाकला
पाल्कलितजघनस्थलया नातिनिर्भरोद्भिन्नपयोधरया मन्दमन्दभुजलतान्दोलनप्रेङ्खितनखम
यूखेक्ष्क्लेन धाराभिरिव लावण्यमनवरतं स्रवन्त्या दिक्षु वेविसर्पिणा हारलताना नारश्मि
जालेनिमग्नशरीरया क्षीरसागरोन्मग्नवदनयेव लक्ष्म्या बहलताम्बूलकृष्णिकान्धकारितना॰
धरलेखया समसमुन्नताङ्गनासिकया विकसितपुण्डरीकधवललोचनया मणिमकरपत्र
भङ्गकोटिकिरणातपाहतकपोलतया सकर्णपल्लवामिव श्रवणस्रस्तहस्त्याः पक्षपातिताधूसरच

का॰ टी॰ ५५

58

न्दनरसतिलकालङ्कृतललाटया मुक्ताफलप्रायालङ्कारया राधेयराजलक्ष्म्येवोपपादिताङ्गराग
या नववनलेखयेव कोमलतनुलतया त्रय्येव स्मृतिनियमितचरणया मेखलयेव वेदिमध्य
या मेरुवनलतयेव कनकपत्रालङ्कृतया महाप्रभावाकारया कन्यकयानुगम्यमानं कैला
सनामानं काञ्चुकिनमायान्तमप श्यत् ॥ स कृतप्रणामः समुपसृत्य क्षितितलनिहितद
क्षिणकरो विज्ञापयामास कुमार महादेवी विलासवती समाज्ञापयति इयं खलु कन्यका महा
राजेन कुलूतराजधानीमवजित्य कुलूतेश्वरदुहिता पत्रलेखाभिधाना बन्दिजनेन महादेव्या
न्तःपुरपरिचारिकामध्यमुपानीता मयाविगतनाथा दुःखिनेति समुपजातस्नेहया दुहितृनि
र्विशेषमियन्तं कालमुपलालिता संवर्धिता च । तदिदानीमुचिता भवतस्ताम्बूलकरङ्कवाहि
नीति कृत्वा मया प्रेषिता न चास्यामायुष्मता परिजनसामान्यदृष्टिना भवितव्यं बालेव लालनी
या स्वचित्तवृत्तिरिव चापलेभ्यो निवारणीया शिष्येव द्रष्टव्या सुहृदिव सर्वविस्रम्भेष्वभ्यन्त
रीकर्तव्या । दीर्घकालसंवर्धितस्नेहः स्वसुतायामिव हृदयस्यास्ति मे बलवानस्याहङ्कि पा
तः महाभिजनराजवंशप्रसूता चार्हतीयमेवंविधा नियतं च स्वयमेवेयमिति विनीततया क
तिपयैरेव दिवसैः कुमारमाराधयिष्यति केवलमतिचिरकालोपचिता मे प्रेमवृत्तिः अस्या मा

गो॰ ५५

माहनशीलस्य स्यात्कुमार इति सन्दिश्यते सर्वथातथा कल्याणिना प्रयतितव्यं यथेयमति
चिरमपरिचिततया परिचारकान्ते भवतीत्यभिधाय विरतवचसि कैलासे कृताभिज्ञानप्रणामः पत्र
लेखामनिमिषलोचनः सुचिरमालोक्य चन्द्रापीडः यथाज्ञापयत्यम्बा इत्युक्त्वा कञ्चुकिनं
प्रेषयामास । पत्रलेखा तु ततः प्रभृति दर्शनेनैव समुपजातसेवारसा न दिवा न रात्रौ न स्वपतो
न आसीनस्य नोत्थितस्य न भ्रमतो न राजकुलगतस्य छायेव राजसूनोः पार्श्वं मुमोच । चन्द्रापीड
स्यापि तस्यां दर्शनादारभ्य प्रतिक्षणमुपचीयमाना महती प्रीतिरासीत् अभ्यधिकं च प्रतिदि
वसमस्याः प्रसादमकरोत् । आत्महृदयादव्यतिरिक्तामिव चैनां सर्वविश्रम्भेष्वमन्यत । ए
वं च समतिक्रामत्सु केषुचिद्दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारा
नुपचितसम्भारसङ्ग्रहार्थमादिदेश । समुपस्थितयौवराज्याभिषेकं च तं कदाचिद्दर्शनार्थमाग
तमारूढविनयमपि विनीततरमिच्छन् शुकनासः सविस्तरमुवाच । तात विदितवेदितव्यस्या
धीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति केवलं च निसर्गत एव अभानुभेद्यमरत्नालोको
च्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवं अपरिणामोपशमो दारुणो लक्ष्मीमदः
कष्टमनञ्जनवर्तिसाध्यमपरमैश्वर्यतिमिरान्धत्वं अशिशिरोपचारहार्यो ऽतितीव्रो दर्पदाहज्वरो

का० दे० ५९

59

षमा सततममूलमंत्रगम्यो विषमो विषयविषास्वादमोहः नित्यमस्नानशौचबाध्यो बलवान्रा
गमलोपलेपः । अजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवतीत्यतो वि
स्तरेणाभिधीयसे गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिरूपत्वममानुषशक्तित्वं चेति महती खल्व
नर्थपरम्परा । सर्वाविनयानामेकैकमप्यलमेनेषामायतनं किमुत समवायः यौवनारम्भे च ।
प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति । अनुज्झितधवलतापि सरागैव भवति
यूनां दृष्टिः अपहरति च वात्येव शुष्कपर्णं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरु
षं प्रकृतिः इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका नवयौवनकषा
यितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः ।
नाशयति च दिग्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु । भवादृशा एव भाजनमुप
देशानां अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखमुपदेशगु
णाः । गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य इतर
स्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरमुपजनयति हरति सकलमति
मलिनमपि दोषजातं गुरूपदेशः प्रशमहेतुः परिणाम इव पलितरूपेण शिरसिजजालममलिनं ।

गे० ५९

कुर्वन्गुणरूपेण तदेव परिणमयति अयमेव च अनास्वादितविषयरसस्य ते काल उपदेशस्य कुसुम
शरप्रहारजर्जरिते हि हृदये जलमिव गलत्युपदिष्टम् अकारणं च भवति दुष्प्रकृतेरन्वयः श्रुतं वा
विनयस्य चन्दनप्रभवो न दहति किमनलः किं वा प्रशमहेतुनापि न प्रचण्डतरी भवति वडवान
लो वारिणा गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानं अनुपजातप
लितादिवैरूप्यमजरं वृद्धत्वं अनारोपितमेदोदोषं गुरुकरणं असुवर्णविरचनमग्राम्यं कर्णाभ
रणं अतीतज्योतिरालोकः अनुद्वेगकरः प्रजागरः विशेषेण तु राज्ञां विरला हि तेषामुपदेष्टा
रः प्रतिशब्दक इव राजवचनमनुकरोति जनो भयात् । उद्दामदर्पश्वयथुस्थगितश्रवणविवरा
श्चोपदिश्यमानमपि ते न शृण्वन्ति शृण्वन्तोऽपि गजनिमीलितेन बधिरीभवन्तः खेदयन्ति हितो
पदेशदायिनो गुरून् अहङ्कारदाहज्वरमूर्छान्धकारिता विह्वला हि राजप्रकृतिः अलीकाभि
मानोन्मादकारीणि धनानि राज्यविषविकारतन्द्रीप्रदा लक्ष्मीः आलोकयतु तावत्कल्या
णाभिनिवेशी लक्ष्मीमेव प्रथमं । इयं हि सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः
क्षीरसागरात्पारिजातपल्लवेभ्यो रागमिन्दुशकलादेकान्तवक्रतां उच्चैःश्रवसश्चञ्चलतां
कालकूटान्मोहनशक्तिं मदिराया मदं कौस्तुभमणेरतिनैष्ठुर्यं इत्येतानि सहवासपरिचयवशा

का॰ दं॰ ३॰

60

स्थिरत्वविनोदनचिह्नानि गृहीत्वेवोद्गता न ह्येवंविधमपरमपरिचितमिह जगति किञ्चिदस्ति यथेयमनार्या लब्धापि खलु दुःखेन परिपाल्यते दृढगुणपाशसन्दाननिस्पन्दीकृतापि नश्यति उद्दामदर्पभटसहस्रोल्लासितासिलतापञ्जरविधृताप्यपक्रामति । मदजलदुर्दिनान्धकारगजघटितघनघटापरिपालितापि पलायते न परिचयं रक्षति नाभिजनमीक्षते न रूपमालोकयति न कुलक्रममनुवर्तते न शीलं पश्यति न वैदग्ध्यं गणयति न श्रुतमाकलयति न धर्ममनुरुध्यते न त्यागमाद्रियते न विशेषज्ञतां विचारयति नाचारं पालयति न सत्यमनुबुध्यते न लक्षणं प्रमाणीकरोति गन्धर्वनगरलेखेव पश्यत एव नश्यति अद्याप्यारूढमन्दरपरिवर्तावर्तभ्रान्तिसंस्कारेव परिभ्रमति । कमलिनीसञ्चरणव्यतिकरलग्ननलिननालकण्टकेव न क्वचिन्निर्भरमाबध्नाति पदं अतिप्रयत्नविधृतापि परमेश्वरगृहेषु विविधगन्धगजगण्डमदमधुपानमत्तेव परिस्खलति । पारुष्यमिवोपशिक्षितुमसिधारासु निवसति । विश्वरूपत्वमिव ग्रहीतुमाश्रिता श्रीनारायणमूर्तिं अप्रत्ययबहुला च दिवसान्तकमलमिव समुपचितमूलदण्डकोशमण्डलमपि मुञ्चति लतेव विटपकानध्यारोहति गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला दिवसकरगतिरिव प्रकटितविविधसङ्क्रान्तिः पातालगुहेव तमोबहुला हिडिम्बेव भीमसा

शो॰ ६॰

हृमेकहार्यैकहृदया प्रावृडिवाचिरद्युतिकारिणी दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्रायाल्पस
त्त्वमुन्मत्तीकरोति सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति गुणवन्तमपवित्रमिव न स्पृशति उदार
सत्त्वममङ्गलमिव न बहु मन्यते सुजनमनिमित्तमिव न पश्यति अभिजातमहिमिव लङ्घयति
शूरं कण्टकमिव परिहरति दातारं दुःस्वप्नमिव न स्मरति विनीतं पातकिनमिव नोपसर्पति ।
मनस्विनमुन्मत्तमिवोपहसति परस्परविरुद्धं चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निज
चरितं तथा हि सततमूष्माणमारोपयन्त्यपि जाड्यमुपजनयति उन्नतिमादधानापि नीचस्व
भावतामाविष्करोति तोयराशिसंभवापि तृष्णां वर्धयति ईश्वरतां दधानाप्यशिवतामातनोति
बलोपचयमावहन्त्यपि लघिमानमापादयति अमृतसहोदरापि कटुकविपाका विग्रहव
त्यपि अप्रत्यक्षदर्शना पुरुषोत्तमरतापि खलजनप्रिया रेणुमयीव स्वच्छमपि कलुषीकरो
ति । यथा यथेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्व
मति तथा हि इयं संवर्धनवारिधारा तृष्णाविषवल्लीनां व्याधगीतिरिन्द्रियमृगाणां परमधू
मलेखा सच्चरितचित्राणां विभ्रमशय्या मोहदीर्घनिद्राणां निवासजीर्णवलभी धनमदपिशा
चिकानां तिमिरोद्गतिः शास्त्रदृष्टीनां पुरःसरपताका सर्वाविनयानां उत्पत्तिनिम्नगा क्रोधवेगग्राहा

णां आपानभूमिर्विषयमधूनां सङ्गीतशालेन्द्रियविकारनाट्यानां आवासदरी दोषाशीविषाणां उत्सार
णवेत्रलता सत्पुरुषव्यवहाराणां अकालप्रावृड्गुणकलहंसानां विसर्पणभूमिर्लोकापवादवि
षविस्फोटानां प्रस्तावना कपटनाटकस्य कदलिका कामकरिणः वध्यशाला साधुभावस्य राहु
जिह्वा धर्मेन्दुमण्डलस्य न च तं पश्यामि यो ह्यपरिचितयानया न निर्भरमुपगूढो यो वा न विप्रल
ब्धो नियतमियमालेख्यगतापि चलति पुस्तमय्यपीन्द्रजालमाचरति उत्कीर्णापि विप्रलभते श्रु
ताप्यभिसन्धत्ते चिन्तितापि वञ्चयति । एवंविधया चानया दुराचारया कथमपि दैववशेन प
रिगृहीता विक्लवीभवन्ति राजानः सर्वाविनयाधिष्ठानतां च यान्ति अभिषेकसमय एव चैषाम
ङ्गलजलकलशैरिव प्रक्षाल्यते दाक्षिण्यं अग्निकार्यधूमेनेव मलिनीभवति हृदयं पुरोहित
कुशाग्रसंमार्जनीभिरिवापनीयते क्षान्तिः उष्णीषपट्टबन्धनेनेवाच्छाद्यते जरागमनस्मरणं आतपत्र
मण्डलेनेवापवार्यते परलोकदर्शनं चामरपवनैरिवापह्रियते सत्यवादिता वेत्रदण्डैरिवोत्सार्यन्ते
गुणाः जयशब्दकलकलैरिव तिरस्क्रियन्ते साधुवादाः ध्वजपटपल्लवैरिव परामृश्यते यशः । त
थाहि केचिच्छ्रमवशशिथिलशकुनिगलपुटचटुलाभिः खद्योतोन्मेषमुहूर्तमनोहराभिः म
नस्विजनविगर्हिताभिः सम्पद्भिः प्रविलोभ्यमानाः धनलवलाभावलेपविस्मृतजन्मानो नैकदो

घोपचितेन तृष्णाग्रहेणेव रागावेशेन बाध्यमाना विविधविषयरसग्रासलालसैः पञ्चभिरप्यनेकसहस्रसं
ख्यैरिवेन्द्रियैरायास्यमानाः प्रकृतिचपलतया लब्धप्रसरेणैकेनापि शतसहस्रतामिवोपगतेन मनसा
कुलीक्रियमाणा विह्वलतामुपयान्ति ग्रहैरिव गृह्यन्ते भूतैरिवाभिभूयन्ते मन्त्रैरिवावेश्यन्ते सत्त्वैरिवा
वेष्ट्यन्ते वायुनेव विडम्ब्यन्ते पिशाचैरिव ग्रस्यन्ते मदनशरैर्मर्माभिहता इव मुखभङ्गसहस्राणि कु
र्वते धनोष्मणा पच्यमाना इव च वेष्टन्ते गाढप्रहाराभिहता इवाङ्गानि न धारयन्ति कुलीरा इव तिर्य
क्परिभ्रमन्ति अधर्मभग्नगतयः पङ्गव इव परेण सञ्चार्यन्ते मृषावादविपाकसञ्जातमुखरोगा
इवातिकृच्छ्रेण जल्पन्ति सप्तच्छदतरव इव रजोविकारैरासन्नवर्तिनां शिरःशूलमुत्पादयन्ति आस
न्नमृत्यव इव बन्धुजनमपि नाभिजानन्ति उत्कम्पितलोचना इव तेजस्विनो नेक्षन्ते कालदष्टा इ
व मन्त्रैरपि न प्रबुध्यन्ते सत्रषा इव ``` न सहन्ते दुष्टवारणा इव महामानस्तम्भनिश्चलीकृता न गृ
ह्णन्त्युपदेशं तृष्णावेशमूर्च्छिताः कनकमयमिव सर्वं पश्यन्ति इषव इव पानविवर्धिततैक्ष्
ण्याः परप्रेरिता विनाशयन्ति दूरस्थितान्यपि फलानीव दण्डविक्षेपैर्महाकुलानि शातयन्ति अका
लकुसुमप्रसवा इव मनोहराकृतयो लोकविनाशहेतवः श्मशानाग्नय इव रौद्रभूतयः तैमि
रिका इवादूरदर्शिनः उपसृष्टा इव क्षुद्राधिष्ठितभवनाः श्रूयमाणा अपि प्रेतपटहा इवोद्वेगं जन

का॰ दे॰ ६१

62

यन्ति चिन्त्यमाना अपि महापातकाध्यवसाया इव भयमुपजनयन्त्यन्तर्दिवसमापूर्यमाणाः पापेनैवाध्मा
तमूर्तयो भवन्ति तदवस्थाश्च व्यसनशतशरव्यतामुपगता वल्मीकतृणाग्रावस्थितजलबिन्दव इव
पतितमात्मानं नावगच्छन्ति अपरे तु स्वार्थनिष्पादनपरैः धनपिशितग्रासगृध्रैरास्थाननलिनीबकैः
द्यूतं विनोद इति परदाराभिगमनं वैदग्ध्यमिति मृगयां श्रम इति पानं विलास इति प्रमत्ततां शौर्यमि
ति स्वदारपरित्यागमव्यसनितेति गुरुवचनावधीरणमपरप्रणेयत्वमिति अजितभृत्यतां सुखोप
सेव्यत्वमिति नृत्तगीतवेश्याभिसक्तिं रसिकतेति महापराधावकर्णनं महानुभावतेति परिभव
सहत्वं क्षमेति स्वच्छन्दतां प्रभुत्वमिति देवतावमाननं महासत्त्वतेति वन्दिजनख्यातिं यश इति
तरलतामुत्साह इति अविशेषज्ञतामपक्षपातित्वमिति दोषानपि गुणपक्षमध्यारोपयद्भिः अन्तः
स्वयमपि विहसद्भिः प्रतारणकुशलैर्धूर्तैः अमानुषलोकोचिताभिः स्तुतिभिः प्रतार्यमाणा वि
त्तमदमत्तनिश्चेतनतया तथैवेत्यात्मन्यारोपितालीकाभिमाना मर्त्यधर्माणोऽपि दिव्यांशावतीर्णमि
व सदैवतमिवातिमानुषमात्मानमुत्प्रेक्षमाणाः प्रारब्धदिव्योचितचेष्टानुभावाः सर्वजनस्य हास्य
तामुपयान्ति आत्मविडम्बनां चानुजीविना जनेन क्रियमाणामभिनन्दन्ति मनसा देवताध्यारोप
णप्रतारणादसद्भूतसंभावनोपहताश्चान्तः प्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं संभावयन्ति त्व

गे॰ ६२

गन्नविनस्तीयलोचनं स्वललाटमाशङ्कन्ते दर्शनप्रधानमप्यनुग्रहं गणयन्ति दृष्टिपातमप्युपका
रपक्षे स्थापयन्ति संभाषणमपि संविभागमध्ये कुर्वन्ति आज्ञामपि वरदानं मन्यन्ते स्पर्शनमपि पाव
नमाकलयन्ति मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यो न पूजयन्ति द्विजातीन्न मा
नयन्ति मान्यान्नार्चयन्त्यर्चनीयान्नाभिवादयन्त्यभिवादनार्हान्नाभ्युत्तिष्ठन्ति गुरूननर्थकाया
मान्तरितविषयोपभोगसुखोपभोगमित्युपहसन्ति विद्वज्जनं जरावैक्लव्यप्रलपितमिति पश्य
न्ति वृद्धजनोपदेशं आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय कुप्यन्ति हितवादिने
सर्वथा तमभिनन्दन्ति तमालपन्ति तं पार्श्वे कुर्वन्ति तं संवर्धयन्ति तेन सह सुखमवतिष्ठन्ते त
स्मै ददति तं मित्रतामुपनयन्ति तस्य शृण्वन्ति तत्र वर्षन्ति तं बहु मन्यन्ते तमाप्ततामापादय
न्ति योऽहर्निशमनवरतमुपरचिताञ्जलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति यो वा मा
हात्म्यमुद्भावयति किं वा तेषां साम्प्रतं येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं
प्रमाणं अभिचारक्रियाक्रूरैकप्रकृतयः पुरोधसः पराभिसन्धानपरा मन्त्रिण उपदेष्टारः न
रपतिसहस्रभुक्तोज्झितायां लक्ष्म्यामासक्तिः मारणात्मकेषु शास्त्रेष्वभियोगः सहजप्रे
मार्द्रहृदयानुरक्ता भ्रातर उच्छेद्याः । तदेवंप्रायेऽतिकुटिलकष्टचेष्टासहस्रदारुणे राज्यतं

का॰
दृ॰
३३

63

त्रेस्मिन्महामोहकारिणि च यौवने । कुमार तथा तथा प्रयतेथाः यथा नोपहस्यसे जनेन न निन्द्यसे
साधुभिः न धिक्क्रियसे गुरुभिः नोपलभ्यसे सुहृद्भिः न शोच्यसे विद्वद्भिः यथा च न प्रहस्यसे वि
टैः न प्रतार्यसे कुटिलैः नास्वाद्यसे भुजङ्गैः नावलुप्यसे सेवकैः न वञ्च्यसे धूर्तैः न विप्रलभ्यसे वनि
ताभिः न विडम्ब्यसे लक्ष्म्या न नर्त्यसे मदेन नोन्मत्तीक्रियसे मदनेन नाक्षिप्यसे विषयैः नाकृष्यसे
रागेण नापह्रियसे सुखेन कामं भवान्प्रकृत्यैव धीरः पित्रा च महता प्रयत्नेन समारोपितसंस्कारः
तरलहृदयमप्रबुद्धं च मदयन्ति धनानि तथापि भवद्गुणसन्तोषो मामेवं मुखरीकृतवान् । इद
मेव च पुनः पुनरभिधीयसे विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजातमपि धीरमपि
प्रयत्नवन्तमपि पुरुषमियमतिदुर्विनीता खलीकरोति लक्ष्मीरिति सर्वथा कल्याणैः पित्रा
क्रियमाणमनुभवतु भवान्यौवराज्याभिषेकं अनेककुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धु
रं अवनमय द्विषतां शिरांसि उन्नमय बन्धुवर्गं धनानि अभिषेकानन्तरं च प्रारब्धदिग्विजयः
परिभ्रमन्विजितामपि पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धरां अयं ते कालः प्रतापमारो
पयितुं आरूढप्रतापो राजा त्रैलोक्याधर्षणीयः सिद्धादेशो भवति । इत्येतावदभिधायोपशान्त
वचसि शुकनासे चन्द्रापीडस्ताभिरमलाभिरुपदेशवाग्भिः प्रक्षालित इवोन्मीलित इव स्वच्छी

उं॰
३३

स्नातइवाभिषिक्तइवनिर्वृतइवालंकृतइवपवित्रीकृतइवोल्लासितइवप्रीतहृदयोमुहूर्तंस्थित्वास्व
भावमाजगाम। ततःकतिपयदिवसापगमेराजास्वयमुत्क्षिप्तमङ्गलकलशःसहशुकनासेन
शुभेऽहनिपुरोधसासम्पादिताशेषाभिषेकमङ्गलोनरपतिसहस्रपरिवृतःसर्वेभ्यस्तीर्थेभ्यःस
र्वाभ्योनदीभ्यःसर्वेभ्यःसागरेभ्यःसमाहृतेनसर्वौषधिभिःसर्वफलैःसर्वरत्नैश्चपरिगृहीतैः
आनन्दबाष्पजलमिश्रेणमन्त्रपूतेनवारिणासुतमभिषिषेच। अभिषेकजलार्द्रदेहंतंलतेव
निजपादपंपादपान्तरमसंक्रान्तापितारापीडंनतत्क्षणमेवसञ्चक्रामराजलक्ष्मीः। अनन्तर
मखिलान्तःपुरपरिवृतयाप्रेमार्द्रहृदययाविलासवत्यास्वयमापादतलादामोदिनाचन्द्रातप
धवलेनचन्दनेनानुलिप्तमूर्तिरभिनवविकासितकुसुमकृतशेखरोगोरोचना तिदूर्वाप्रवाल
रचितकर्णपूरोदीर्घदशामलपट्टनिभेनधवलेनदुकूलयुगलेनवसानःपुरोहितप्रतिबद्धप्रतिस
रमसाधितपाणिरभिनवराजलक्ष्मीकमलिनीमृणालेनाभिषेकदर्शनागतेनसप्तर्षिमण्ड
लेनेवहारेणालिङ्गितवक्षःस्थलःसितकुसुमग्रथिताभिराजानुलम्बिनीभिर्विन्दुकवकला
पकोमलाभिर्वैकक्ष्यकस्रग्भिःनिरन्तरनिचितशरीरतयाधवलवेषपरिग्रहतयाचस्नातइवसिंह
इवविधूतकेसरनिकरःकैलासइवस्रवत्स्रोतस्विनीस्रोतोगाशिरैरावणइवमन्दाकिनीस्रु।

का॰
दं॰
४४
64

णालजालजटिलः क्षीरोद इव स्फुरितफेनलवनाकुलः तत्कालप्रतिपन्नवेत्रदण्डेन पित्रा स्वयंप्रनःप्रा
वर्तितजनसमुत्सारणः सभाजितमुपगम्य काञ्चनमयं शशीव मेरुशृङ्गं चन्द्रापीडः सिंहासनमारुरोह
आरूढस्य चास्य कृतयथोचितसकलराजलोकसम्मानस्य मुहूर्तं स्थित्वा दिग्विजयप्रयाणशंसी प्र
लयघनघटाघोषघर्घरध्वनिरुदधिरिव मन्दराघातैर्वसुन्धरापीठ इव कल्पान्तनिर्घातैः सत्पातजलध
र इव तडिद्दण्डैः पातालकुक्षिरिव महावराहघोणाभिघातैः कनककोणैरभिहन्यमानः प्रस्थान
दुन्दुभिरामन्द्रं दध्वने । येन ध्वनता समाध्मातानीवोन्मूलितानीव पृथक्कृतानीव गभीरीकृतानीव
विस्तारितानीव मुखरीकृतानीव बधिरीकृतानीव सर्वाणि भुवनानि । विक्षोभिता इव दिशोन्यो
न्यबद्धभया इवाभवन् यस्य च भरवशाविषमचलितोन्नतफणासहस्रेणालिङ्ग्यमान इव रसातलशे
षेण प्रकटरभिग्रावदन्तदन्तोर्ध्वध्यानैराहूयमान इव दिग्दिक्कुञ्जरैः संत्रासरचितरेचकमण्डलैः
प्रदक्षिणीक्रियमाण इव नभसि दिवसकररथतुरगैः प्रसृतवशर्वाट्टहासशङ्कयाहृष्टीकृतहुङ्कृतेना
भाष्यमाण इव कैलासशिखरिणि त्र्यम्बकवृषभेण कृतगम्भीरकाण्डगर्जितेन प्रत्युद्गम्यमान इ
व मेघावैरावणेन प्रज्ञानस्पर्धारवरोषावेशाननिर्यन्गजवनमितविषाणमण्डलेन प्रणम्यमान इव विबुध
सद्मनि कृतान्तमहिषेण सम्भ्रान्तलोकपालाकर्णितो बभ्राम त्रिभुवनमखिलं निनादः । ततो दुन्दु

उं॰
४४

भिरवमाकर्ण्य जयजयेति सर्वतः समुद्घुष्यमाणजयशब्दः सिंहासनात्सहसोत्थितानां स्त्रिया
सचचाल चन्द्रापीडः स संभ्रमोत्थितैः चान्योन्यसंघट्टविघटितहारसूत्रविगलितान न
वरतमाशाविजयप्रस्थानलीलाजालानिव मुक्ताफलनिकरान्वद्भिः पारिजातइवासित
कुसुममञ्जलपातिभिः कल्पपादपै रैरावनइव विमुक्तकरशीकरैर्वारणराजैः गगनाभोगइ
व तारागणवर्षिभिर्दिग्गजैर्जलदकालइव स्थूलजललवासारस्यन्दिभिः जलधरैरनुग
म्यमानो नरेन्द्रसहस्रैर्वास्थानमण्डपान्निरगात् । निर्गत्य च पूर्वोद्दिष्टयापत्रलेखया स
मध्यासितां त्रिरामानामुपपादितप्रस्थानसमुचितमङ्गल्यालङ्कारां ससंभ्रमाधोरणोपनी
तां करेणुकामधिरुह्य प्रचलरेचककचक्रीकृतदीर्घदावर्तपाण्डुरेण दृष्टावदनबाहुदण्डा
वस्थितकैलासकान्तिना मुक्ताफलजालिना शतशलाकेनातपत्रेण निवार्यमाणातपोऽति
गन्तुमारेभे ॥ निर्गच्छंश्चाभ्यन्तरावस्थितपवप्राकारान्तरितदर्पणानां हारावस्थितानां प्रति
पालयतां राज्ञां जन्मसहस्रेष्वहुमणीनां प्रलक्तकइव स्फुरितप्रतिबिम्बहलेनालोकबालातपेना
भिषेकानन्तरमसहतेन स्वयमतापवाङ्क्षिनेवात्यर्थं पिञ्जरीक्रियमाणादयादिगो यौवनराज्य
जन्मना निजानुरागेणेव राज्यमानमवनितलमासन्नोरवृबिनाशापिस्पनदिस्पाह्नेनेव पाटली

का॰
टं॰
६५

65

क्रियमाणमम्बरमभिनवागतभुवनलक्ष्मीचरणालक्तकरसेनेव लोहितायमानं दिवसं ददर्श ।
निर्गतस्य च ससंभ्रमप्रचलितगजघटासहस्रैरन्योन्यसंघट्टजर्जरितातपत्रमण्डलैरापतद्भिरवनतमौ
लिशिथिलमणिशलाकापंक्तिभिरावर्जितरत्नकर्णपूरैः कपोलस्थलस्खलितकुण्डलैरायस्तसे
नापतिनिर्दिश्यमाननामभिरवनिभुजां चक्रवालैः प्रणम्यमानः बहलसिन्दूररेणुपाटलेन दि
नितलेदोलायमानस्थूलशङ्खाकलापावहलेन सितकुसुममालालाजशबलशिरसा मलय
मन्थानपेन निर्यद्दन्तावर्जितश्वेतगङ्गाप्रवाहेण नागगणदन्तुरितशिखरशिलेन मेरुणेव ग
न्धमादनेनाग्रगम्यमानः कनकालंकारप्रभाकल्माषितावयवेन च दन्तकुसुमस्यासकेनेवाकृष्य
माणेनेन्द्रायुधेन सनाथीकृतपुरोभागः शनैः शनैः प्रथममेव शातक्रतवीमाशामभिप्रतस्थे ।
चलितगजघटाकम्पितधवलातपत्रवनमनेकाकल्लोलपरम्परापतितचन्द्रमण्डलप्रतिबिम्ब
सहस्रं महाप्रलयजलधिजलमिव प्लावितमहीतलं समुद्भूतकलकलमखिलमञ्चचाल
बलं । उच्चलितस्य चास्य स्वभावनाङ्गपपादितप्रस्थानमङ्गलो धवलवासाः सितकुसुममाङ्गरागो
महताबलसमूहेन नरेन्द्रवृन्दैश्चाग्रगम्यमानो धृतधवलातपत्रद्वितीय इव ककुवराजहंसचरितप
दमच्छाशरिणा करिणा वैशम्पायनमाजगाम । प्रागात्मचरजनिकार इव रवेश्चन्द्रापीडस्यासन्न

गों॰
६५

वर्तीबभूव । अनन्तरमिनस्थेतस्य निर्गतो युवराज इति समाकर्ण्य च प्रधावितानां बलानां भरेण चलितकु
लशैलकीलाजर्जरितबन्धनेव तत्क्षणमाचकम्पे मेदिनी । संभ्रमागतैरन्यैश्च प्रणमद्भिर्भूमिपा
लैरंशुलतानालजटिलचूडामणीनां मणिमकुटानामालोकेन उन्मिषितबहलरोचिषां च पत्रभङ्गि
नीनां केयूरमण्डलीनां प्रभासन्तानेन क्वचित्संचार्यमाणचापपल्लवोदा इव क्वचिद्रत्ननिर्मितशिखि
कुलचलच्चन्द्रकशतशारा इव क्वचिदकालतडित्तरला इव क्वचित्सकल्पतरुपल्लवा इव क्वचित्स
मानयन्नचापा इव क्वचित्सबालातपा इवालमक्रियन्त दशदिशः । धवलान्यपि विविधकिरणनिक
रकल्माषैरत्नपङ्क्तिः चूडामणिमरीचिभिर्मायूराणीवाराजन्त राज्ञामातपत्राणि । क्षणेन चन्द्र
रङ्गमयमिव च महीतलं कुञ्जरमयमिव दिक्चक्रं आतपत्रमण्डलमयमिवान्तरिक्षं ध्वजमयमि
वाम्बरतलं इभमदगन्धमय इव समीरणो भूपालमयीव प्रजासृष्टिः आभरणांशुमयीव दृष्टिः कि
रीटमय इवातपः चामरमय इव दिवसो जयशब्दमयमिव त्रिभुवनमभवत् । सर्वतः कुलपर्व
ताकारैः प्रचलद्भिर्मत्तवारणैः उत्थानचन्द्रमण्डलनिभैश्च मेरुशृङ्गिरातपत्रैः संवर्तकाम्भोदभार
भीमनादेन ध्वनता च दुन्दुभिना नारकावर्षमहसेन च विसर्पिता गजसीकरनिकरेण धूमकेतुश
सैश्चोल्लसद्भिरवनिरजोदण्डकैः निर्घातवानगम्भीरघोषैश्च करिकण्ठगर्जितैः तनजकणावर्षै

का॰
दे॰
६६
66

वघूर्णाच भ्रमता मत्तगजकुम्भसिन्दूररेणुना क्षुभितजलधिजलकल्लोलचञ्चलाभिश्च विसर्पन्तीभि
स्तुरङ्गमालाभिः ग्रन्थकाविनिदिगन्तरेण चानवरतं चरता मदगजधारादुर्दिनेन कलकलेनच
भुवनान्तरव्यापिना महाप्रलयकालइव संजज्ञे । बलकोलाहलभीताइव धवलध्वजनिवहनिरन्त्र
रायस्यः क्वापिदिशः मलिनावनिरजःसंस्पर्शपाङ्कितमिव राजयनबलसहस्रसंकटमतिहस्म
स्वरतलमतिससार । प्रचलवेत्रलतासन्त्रस्तार्यमाणाइव हरगाभुररजोधूसरमर्ककिरणास्त्र
मुत्तुः परोभागं इभकरशीकरनिकरनिर्वापणात्रस्तइवातपत्रसच्छादितातपोदिवसोननाश बल
भरजर्जरीकृता मदकलकरिचरणपातमर्द्दिताहिनाथेवप्रयाणभेरी भैरवं रराम भूमिः । गलन्म
दयसेचच रक्तरङ्गफेनपल्लवे मदपयसिव मदस्तुताकरिणांमचस्खलः पदेपदेपदातयः हरिता
लपरिमलनिभेनचातिपङ्कनागगजमदामोदेनालिमस्याप ययाविवानयगन्धग्रहणसामर्थ्यं घ्राणेन्द्रि
यस्य । क्रमेणचप्रसर्पतोबलस्यप्रसरः प्रधावतांजनकदम्बकानां हलहलारवेणानारतदीर्घेणच
काहलानां निनादेनखुररवमिश्रेणचवाजिनां हेषारवेण घनवरतकणतालस्वनसङ्गेन दन्तिना
माडम्बरारवेण ग्रैवेयककिङ्किणीक्वाणितान्त्रसहितेनचगानिवगाहिप्रमविरावविणीनां चाष्टानांदक्कु:
नेन मङ्गलमाङ्गल्यशङ्खसंवर्धितधनीनांच प्रयाणपटहानां निनादेन प्रक्षुभितेव निस्तनस्ताडुमानानां

रा॰
६६

च हृदि दह्यमानां स्वनेन जर्जरीकृतश्रवणपुटस्य स्तब्धोऽभवज्जनस्य । शनैः शनैश्च बल
संक्षोभजन्मादिनेरनेकवर्णतया क्वचिज्जीर्णशफरीक्रोडधूम्रः क्वचित्क्रमेलकसटासन्निभः
क्वचित्परिणतवल्कलरोमजालपल्लवमलिनः क्वचित्पत्रोर्णतन्तुपाण्डुरः क्वचिन्मृणालदण्ड
धवलः क्वचिज्जरत्कपिकपोलकपिलः क्वचिदापिञ्जरवृषभरोमकुफेनपिण्डपाण्डुरः त्रिप
थगाप्रवाह इव हरिचरणप्रभवः कुपित इव सञ्चरन्तमाशावधूपरिहासमिवाहरण एव नयनानि
रुषित इव पिबन्करिकरशीकरजलानि पल्लवानिवोत्पतन्गगनतले अलिनिवह इव अम्बर
न्मदलेखां मृगपतिरिव रचयन्करिकुम्भस्थलीषु पदं उद्यानविजय इव स्खलत्पताकाः जवाग
म इव पाण्डुरीकुर्वन्ध्वजवासांसि मुष्णन्निव पक्ष्मायसंस्थितो हरिषु । आजिघ्रन्निव मकरन्दम
धुपङ्कलग्नः कर्णोत्पलानि मदकलकरिकर्णतालताडनस्खलइव विशालकर्णशङ्खोदरविव
राणि । पीयमान इवोत्कण्ठीभिर्वनितपतिमुकुटमणिपत्रभङ्गमकरिकाभिः अभ्यर्च्यमान
इव तुरगखुरविक्षेपविलुप्तैः फेनपल्लवकुसुमस्तवकैः अनुगम्यमान इव मत्तगजघटा
कुम्भभित्तिसम्भवेन धातुधूलिना आलिप्यमान इव चलच्चामरकलापविधुतेन पटवासपां
सुना प्रोत्साद्यमाण इव नरपतिशोषवसहस्रपरिक्षिप्तैः कुसुमकेसररजोभिस्तत्पपानराक्त

का॰
दं॰
६७

67

िव दिवसकरमण्डलमकाण्डएवपिबत् प्रस्थानमङ्गलप्रतिसरमालिकास्वगोरोचनचूर्णा
यमानः क्रकचदलनचन्दनक्षोदधूसरो रेणुरुत्पपात । अपरिमाणबलसंघट्टनसंपीड्यमा
नश्च संहरन्निव विश्वमशेषमकालमेघपटलमेदुरो विस्तारमपरमपरमारेभे । तेन चक्रमोपची
यमानबहलमलयघनीहारेण राजलक्ष्मीविलासपटवासचूर्णेन आतपत्रपुण्डरीकषण्ड
घारेण सैन्यभरपीडितमहीतलमूर्छान्धकारेणेव जलदकालकदम्बकुसुमोद्गमेन दिव
सकमलवनोद्दलनद्विपयूथेन गगनमहीतलप्लावनप्रलयपयोधिपूरेण त्रिभुवनलक्ष्मीशि
रवोगुण्ठनपटेन महावराहकेसरनिकरकान्तेरेण प्रलयानलधूमजालमांसलेन पाताल
तलादिवोत्थितेनाचरणेभ्यइव निर्गच्छता लोचनेभ्यइव निष्पतता दिग्भ्यइवागच्छता नभस इ
व निपतता पवनादिव उल्लसता रविकिरणेभ्यइव सम्भवता अनुपहतचेतनेन निद्रागमेन
अनालिङ्गितसूर्येणान्धकारेण अप्रथमकालोपस्थितेन भूमिग्रहेण अनुदिततारानिकरेण
बहुलनिशाप्रदोषेण अपतितसलिलेन जलधरसमयेन अभ्यात्तभुजङ्गेन रसातलेन संव
र्धमानेन हरिणेव त्रिभुवनमलक्ष्यतफेनपाण्डुनाचिन्तितक्षोदेन । बहलरजोधूसरितमंशुमालि
किरणबिम्बमवहसितचामरमिव निष्प्रभमभवत् । धूलपटधवलकदलिकेव कलुषतामा

ङें॰
६७

जगाम गगनापगा नरपालभरमतिगुरुमसहमाना पुनरिव भागावतारणोत्थमास्तरोह्व रजोनिभेन मही
निःशेषनिर्पीतानपमन्नदेश्यमानमिव जलनिधिजलेषु धूसरितरविरथध्वजपटमपतद्वनिरजः ।
मुद्गलैनचगर्भवासमिव संहारसागरजलमिव श्रीनारायणोदरमिव ब्रह्माण्डमिव क्षितिमाहृष्टी
महात्मयस्वब्भूवदिवसः समसमयमेवचकाशिरेकञ्जभः रेणुक्तप्रेणेव परिणतमम्बरतलमेक
महाभूतमिव त्रैलोक्यमासीत् । अथ निजमदोष्मसन्नमानोद्विनादिशोदिशाकरविवरनिस्सृ
तैः तरङ्गैः क्षीरोदधवलैः शीकरासारैः करविस्तृतेन च विसर्पता दानबिन्दुदुर्दिनेन हर्षविप्रकी
र्णैस्तु वाजिनां लालाजललवैरुपशमतेजरजसि । पुनरपि जानालोकास्हदिव सागरसलिला
द्विवोन्नममालोक्य बलमुपजातविस्मयः सर्वेतोदत्तदृष्टिः वैशम्पायनमुन्नापीडमाबभाषे ।
कुवराज किं न जितं देवेन महाराजाधिराजेन तारापीडेन यज्जेष्यसि कादिशो न वशीकृता याववशी
करिष्यसि कानि दुर्गाणि न प्रसादितानि यानि प्रसादयिष्यसि कानि द्वीपान्तराणि नात्मीकृतानि
यान्यात्मीकरिष्यसि कानि रत्नानि नोपार्जितानि यान्युपार्जयिष्यसि केन वा प्रणता राजानः
कैर्न विरचितः शिरसि बालकमलकुड्मलकोमलः सेवाञ्जलिः कैर्न महरणीकृताः प्रतिब
द्धहेमपट्टैः ललाटैः सभाभुवः कैर्न घृष्टाः पादपीठे चूडामणयः कैर्न प्रतिपन्ना वेत्रयष्टयः

कैर्नोद्धृतानिचामराणि कैर्नोरीकृताजयशब्दाः केषांनपीताः किरीटपत्रमकरैः सलिलधा
राइव निर्मलाश्चरणनखमयूखराजयः एतैर्हिचतुरुदधिजलावगाहदुर्ललितबलमदाव
लिप्तादशरथभगीरथभरतदिलीपालर्कमान्धातृप्रतिमा अभिमानशालिनः सोमपायिनोमूर्धा
भिषिक्ताः पृथिव्यांसर्वपार्थिवास्त्वामृतमिवाभिषेकपयःपातपूतैः चूडामणिपल्लवैरुद्वहन्ति
मङ्गल्यांभवच्चरणरजःसंहतिं । एभिरियमादिपार्थिवैरिवापरैर्हिनाथवती धरित्री एतानिचाप्यमीषा
मासन्नवितर्दशादिगन्तराणि सैन्यानिभवन्तमुपासते तथाहि । यस्यांयस्यांदिशिविक्षिप्यन्ते
चलाः तस्यांतस्यांरसातलमिवोद्गिरन्ति वसुधेवसूते कुम्भइववमन्तिगगनमिव वर्षन्ति दिवस
इव सृजन्तिबलानि अपरिमितबलतराक्रान्तमन्येस्मरन्ति महाभारतसमरसंक्षोभस्यायंक्षितिः
पयसिस्वरदेशेषु प्रतिस्खलितमाखण्डलध्वजानांप्राणय ऊत्तुङ्गलाङ्गूलमतिकदलिकावनान्तरेषु मयू
खमाली सर्वतश्चमदजलस्रुचाकरिणांमैलायतिमलसृगभिणि वेणिकावाहिणीवारिणानिव
त्रयमस्यानि पतितमधुकरकुलकलकलकलिताकालिन्दीजलकल्लोलकलितेवभातिभूत
धात्री । सैन्यभरसंक्षोभभयान्मारिनइव गगनतलमुत्पतिताः संछादयन्त्येनादिक्चक्रवालध्वज
पङ्क्तयः सर्वथाचित्रंयन्नायंविघटितसकलकुलशैलसन्धिबन्धासहस्रशः शकलीभवतिबल

भरेण धरित्री यद्वाबलभरपीडितेव सुधाधवलाविधराद्दलत्त्रिफणीनां पतङ्गः फणाभिस्त्रयः इत्येवं
वदन्नेव तस्य युवराजः सञ्छिन्नानेकतोरणात्तृणमयप्राकारमन्दिरसहस्रसम्बाधामुल्लसि
तधवलपटमण्डपशतशोभिनीमवापभूमिं तस्यां चावतीर्य राजवत्सर्वाः क्रियाश्चकार । सर्वैश्च
तैः समेत्य नरपतिरमात्यैश्च विविधाभिः कथाभिर्विनोद्यमानः तद्दिवसमभिनवपितृवियोग
जन्मना शोकावेगेनायास्यमानहृदयो दुःखेनाभ्यवाहयत् अतिवाहितदिवसश्च यामिनीमपि
स्वशयनस्थानान्निहूते निह्नितशयनविषमेन वैशम्पायनेनान्यतश्च समीपस्थितितलविन्यस्त
प्रस्तरया पत्रलेखया सह जागर्त्तापितकक्षमन्तरा मात्रबद्धमन्त्रराजकनामसमयं कुर्वन्नालापं ना
स्त्रपज्ज्ञानतनिद्रः प्रायेण जागरदेवातिनिन्ये । प्रत्यूषे चोत्थाय तेनैव क्रमेण तत्र तत्प्रयाणकैः प्रति
प्रयाणकं उपचीयमानेन सेनासमुदायेन जर्जरयन्वसुधामाक्रम्ययानिरीत्रात्सिञ्चन्सरितो
रिक्तीकुर्वन्सरांसि चूर्णयन्काननानि समीकुर्वन्विषमाणि दलयन्दुर्गाणि उन्नयन्निम्नानि नि
म्नयन्स्थलानि शनैः शनैश्च स्वेच्छया परिभ्रमन्नुन्नतान्नमयन्नाश्वासयन्भीतान् उन्मूलयन्
विटपास्त्रासयन्काननेककानभिषिञ्चन्स्थानेषु स्थानेषु राजपुत्रान्समर्जयन्नत्नानि प्रतीच्छन्नु
पायनानि गृह्णन्करानादिशन्देशान्नरणाध्यवस्याद्दिशन्त्रविज्ञानि कुर्वन्कीर्तनानि लेखयन्

का॰
पू॰
६५
69

शासनानि स्थापयन्नग्रजन्मनः प्रणमन्मुनीन्पालयन्नाश्रमाञ्जनयञ्जनानुरागं प्रकाशयन्विक्रमं
आरोपयन्प्रतापं उपचिन्वन्यशः विस्तारयन्गुणान् प्रख्यापयन्सच्चरितमामृद्नंश्च वेलावनानि
बलरेणुभिराधूसरीकृतसकलसागरसलिलः पृथिव्यांविचचार । प्रथमं प्राचीं ततस्त्रिशङ्कु
तिलकां ततोवरुणलाञ्छनां अनन्तरं च सप्तर्षिशबलां दिशो विजिग्ये वर्षत्रयेण चात्मीकृताशे
षद्वीपान्तरं सकलमेव चतुरम्भोधिखातपरिखाप्रमाणं बभ्राम महीमण्डलं । ततः क्रमेण च
जितसकलमहीतलः प्रदक्षिणीकृत्य वसुधां परिभ्रमन्कदाचित्कैलाससमीपचारिणा हेम
जटनाम्ना किरातानां सुवर्णपुरं नाम निवासस्थानं नातिविप्रकृष्टं पूर्वजलनिधेर्जित्वाजग्राह
तत्र च निखिलधरणीतलपर्यटनखिन्नस्य निजबलस्य विश्रान्तस्य विश्रामहेतोः कतिपयान्दिव
सान्तिष्ठन् एकदा तत्रस्थ एवेन्द्रायुधमारुह्य मृगयायां निर्गतो विचरन्कानने शैलशिखराद
वतीर्णं यदृच्छया किन्नरमिथुनमद्राक्षीत् । अपूर्वदर्शनतया तु समुपजातकुतूहलः कृतग्रहणा
भिलाषः तत्समीपमादरादुपसर्पिततुरगः संत्रस्तमपं समुपसर्पन्तं दृष्ट्वैव पुरुषदर्शनत्रासम
धावितं च तत्पलायमानमनवरतपार्ष्णिप्रहारद्विगुणीकृतजवेनेन्द्रायुधेनैकाकी निर्गत्य निज
बलसमूहात्सुदूरमन्तरमससार । तत्र दृष्टमिदं गृहीतमित्यतिरभसाकृष्टचेता महाजवतया ।

गो॰
६५

तुरङ्गस्य प्रवृत्तेन मात्रेणैकपदमिवासन्नाय तस्मात्प्रदेशात्पञ्चदशयोजनमात्रमध्वानं जगाम । त
त्वनिबध्यमानं किन्नरमिथुनमालोकयत एवास्य संमुखापतितमचलतुङ्गः शिखरमारोह
माणं क्षेत्रे च तस्मिन्यानैः शनैस्तदनुसारिणीं दृष्टिं निवेश्याचलशिखरप्रतिहतगतिप्रसरो विधृततुर
ङ्गः स्वयंच्चन्द्रापीडस्तस्मिन्काले समुपारूढश्रमः स्वेदार्द्रशरीरमिन्द्रायुधमात्मानं चालोक्य क्षणमिव
विचार्य स्वयमेव विहस्याचिन्तयत् किमिति निरर्थकमयमात्मा मया बालिशेनेवायासितः किम
नेन गृहीतेन वा किन्नरयुगलेन प्रयोजनं यदि गृहीतमिदं ततः किं अथ न गृहीतं ततोऽपि किं
अहो मूर्खस्येयाः प्रकारः । अहो यत्किञ्चनकारितायामादरः अहो निरर्थकव्यापारेष्वभिनिवे
शः अहो बालिशचरितेष्वासक्तिः साधुफलं कर्म क्रियमाणं जातं वृथा अवश्यकर्तव्याक्रिया
प्रस्तुता विफलीभूता सुहृत्कार्यं संपाद्यमानं नोपपन्नं राजधर्मः प्रवर्तितो न निष्पन्नः कस्मा
दहमाविष्ट इवोत्सृज्य निजपरिवारमेतावतीं भूमिमायातः कस्माच्च मया निष्प्रयोजनमिदमनु
सृतं नरमुखस्वरूपद्वयमिति विचारयमाणो यत्सत्यमात्मैव मे परिहासमुपजनयति न जाने किय
ता ध्वना विच्छिन्नमितो बलमनुयायि मे महाजवो हीन्द्रायुधो निमेषमात्रमतिदूरमतिक्रामति
न चागच्छता मया तुरगवेगवशात्किन्नरमिथुनेन बद्धदृष्टिनास्मिन्नविरलतरुशाखागुल्म

का॰ दं॰ ७० 70

लताप्रतानगहने निरन्तरनिपतितशुष्कपर्णावकीर्णतले महावने पर्यातित्रुषितः येन प्रतिनिवृ
त्त्यमायास्यामि न चास्मिन्प्रदेशे प्रयत्नेनापि परिभ्रमता मया मर्त्यधर्मः कश्चिदासाद्यते यः सुवर्ण
पुरगामिनं पन्थानमुपदेक्ष्यति श्रुतं हि मया बहुशः कथ्यमानं उत्तरेण सुवर्णपुरं सीमन्तलेखाः
सर्वजनपदानां ततः परतो निर्मानुषमरण्यं तच्चातिक्रम्य कैलासगिरिरिति। अयं च कैलासः
तदिदानीं प्रतिनिवृत्यैकाकिना स्वयमुत्प्रेक्ष्योत्प्रेक्ष्य दक्षिणामाशां केवलमतिक्रम्य गन्तव्यं।
आत्मकृतानां हि दोषाणां हि नियतमनुभवितव्यं फलमात्मनैवावधार्य वामकरतलवलितर
श्मिपाशः तुरगं व्यावर्तयामास। व्यावर्तिततुरगश्च पुनरचिन्तितवान् अयमुल्लासितप्रभाभास्वरः
श्रीभगवान्भास्करोऽधुना दिवसश्रियो रशनामणिरिव मध्यमलङ्करोति परिश्रान्तश्चायमिन्द्रायुधः
तदेनं तावद्गृहीतकतिपयदूर्वाप्रवालकवलं कस्मिंश्चिच्छिलाप्रस्रवणे वा सरसि वा स्नानपी
तोदकमपनीतश्रमं कृत्वा स्वयं च सलिलं पीत्वा कस्यचित्तरोश्छायायां मुहूर्तमुपविश्य ततो ग
मिष्यामीति चिन्तयित्वा सलिलमन्वेषमाणो मुहुर्मुहुर्दत्तदृष्टिः पर्यटन्नलिनीजलावगाहो
त्थितस्याचिरापक्रान्तस्य महतो गिरिचरस्य वनगजयूथस्य चरणोत्थापितैः पङ्कपटलैरार्द्रीकृतं
करावकृष्टैश्च समन्तान्मृणालमूलनालैः कमलकलापैः कल्माषितमार्द्रैश्च शैवालप्रवालैः श्या

गं॰ १॰

मलिनितो हेमगृहलिनैस्तरुकुसुममञ्जवलयैः कल्हारकुञ्जलेखानिवानिताविकृतविततवानेस्य स
कर्दमेषु मालूरककलैरवकीर्णं खण्डितैस्तरुकुसुमस्तबककषायैर्वनपल्लवैराच्छादितमालूरनामि
स्तरुकुसुमस्तबकोपविष्टोच्छमन्मधुपदोभिर्वनलताभिराकुलितमभिनवबकुलपरिमलवाहिना न
मालपल्लवरसमयामेन मदजलेन सर्वतः सिक्तं मार्गमद्राक्षीत । उपजातजलाशयशङ्कः स्वनेः
प्रतीपमनुसरन्नुद्ग्रीवहंसयूथपरिक्षिप्तमाणलाकावैरिवोपलक्ष्यमाणः पादपैरुपेतेन स्थूलकपि
लवालकेन शिलातलबहलनयाविरलत्वगोलपेन वनद्विपदानदलितमनःशिलाधूलिक
पिलेन । भङ्गिनीभिरुत्कीर्णाभिरिव पत्रभङ्गकुटिलाभिः पाषाणभेदकमञ्जरीभिर्जटिलीकृत
शिलातलेन अनवरतगलद्गुग्गुलद्रुमद्रवार्द्रीकृतदृषदा शिखरस्तनाशिलाजतुरसपिच्छिलो
पलेन टङ्कणाहययद्युग्रावणाइतनिहरितालदोदयास्तलेनाद्भुतावरोहितानविलमकीर्णकाञ्चनचू
र्णेन सिक्तानानिमग्नचमरकस्तूरिकाम्नगोद्युरपङ्क्तिना संकीर्णजीर्णरङ्कुवल्कलरोमप्रकरनिचि
तेन विषमशिलासङ्कटोपविष्टजीवञ्जीवकयुगलेन वनमहिषमिथुनाध्यासिततटगुहागुव्हेन
गन्धपाषाणपरिमलिना वेत्रलताप्रतानमण्डपवेष्टना कैलासतलेन किंचिदध्वानं गत्वा तस्यैव
कैलासशिखरिणः पूर्वोत्तरे दिग्भागे जलधरवृन्दमिव बहलं तपान्धकारमिव पुञ्जीभूतमत्या

यनं तस्य तटे ददर्श । तं च संप्राप्यादावागतेन कुसुमरजःकषायामोदिना जलसंसर्गशिशिरेण शीकरिणा चन्दनरसमिव स्पर्शेनालिम्पमानेनेव जललवसंक्रान्तिमारुतेन कमलमधुपानमत्तानां श्रोत्रहारिभिः कलहंसानां कोलाहलैराहूयमान इव प्रविवेश । प्रविश्य च तस्य तटात्तस्य मध्यभागे मणिदर्पणमिव त्रिभुवनलक्ष्म्याः स्फटिकभूमिगृहमिव वसुन्धरादेव्याः निर्गमनमार्गमिव सागराणां निष्यन्दमिव दिशामंशावतारमिव गगनतलस्य कैलासमिव द्रवतामापन्नं तुषारगिरिमिव विलीनं चन्द्रातपमिव रसतामुपेतं हराट्टहासमिव जलीभूतं त्रिभुवनपुण्यराशिमिव सरोरूपेणावस्थितं वैडूर्यजालमिव सलिलाकारेण परिणतं शरदभ्रवृन्दमिव द्रवीभूयैकत्र निःस्यन्दितं आदर्शभवनमिव प्रचेतसः स्वच्छतया मनोभिरिव मुक्ताफलांशुभिरिव निर्मितं । आपर्णपर्यन्तमप्यन्तः स्पष्टदृष्टसकलतलतया विरलमिवोपलक्ष्यमाणं । अनिलोद्धूतजललवशीकरधूलिजालैभिः सर्वतः समुत्थितैः संरक्ष्यमाणमिवेन्द्रायुधसहस्रैः प्रतिमानिभेनान्तःप्रविष्टसकाननशैलनक्षत्रग्रहचक्रवालमिव त्रिभुवनं उद्भिन्नपङ्कजेनोदरेण श्रीनारायणमिव बिभ्राणं आसन्नकैलासावतीर्णस्य च शतमखोभवतः खण्डपरशोर्मज्जनोन्मज्जनक्षोभचलितजटामणिचन्द्रच्युतेनामृतरसेन जलन्द्रालितवामार्धकपोलगलितलावण्यप्रवाहानुकारिणा संमिश्रितं

जलं उपकूलतमालवनप्रतिबिम्बान्धकारिताभ्यन्तरैर्दृश्यमानरसातलद्वारैरिव सलिलप्रदेशै
र्गम्भीरतलं दिवाप्युपजातनिशाशङ्कैः चक्रवाकमिथुनैः परिह्रियमाणनीलोत्पलवनगह
नं अमरक्लान्तिनामहृदपरिपूरितकमण्डलुपरिपूतजलं अनेकशो बालखिल्यकदम्बकक्रान्त
सन्ध्योपासनं बहुशः सलिलावतीर्णसावित्रीभग्नदेवतार्चनकमलसहस्रं सप्तर्षिमण्डलस्ना
नपवित्रीकृतं सर्वदासिद्धवधूधौतकल्पलतावल्कलप्रणयकृतोदकं । उदकक्रीडादोहदाग
तानां च गुह्यकेश्वरान्तःपुरकामिनीनां मकरकेतुचापचक्राकृतिभिरतिविकटैरावर्तिभिर्निता
म्बमण्डलैरापीनसलिलं क्वचिद्वरुणहंसोपात्तकमलवनमकरन्दं क्वचिद्दिग्गजमज्जनजर्जरि
तजरन्मृणालदण्डं क्वचित्त्र्यम्बकवृषविषाणकोटिखण्डिततटशिलाखण्डं क्वचिद्यम
महिषशृङ्गशिखरविलिखितफेनपिण्डं क्वचिदैरावतदशनमुसलखण्डितकुमुदखण्डं यौवन
मिवोत्कलिकाबहुलं उत्कण्ठितमिव मृणालवलयालङ्कृतं महापुरुषमिव मीनमकरकू
र्मचक्रप्रकटलक्षणं भार्गवचरितमिव पाण्डुधार्तराष्ट्रकुलक्षतपक्षक्षोभं अमृतमथनस
मयमिव नीरावस्थितशितिकण्ठपीयमानविषं श्रीकृष्णबालचरितमिव तटकदम्बशाखा
धिरूढहरिकृतजलप्रपातक्रीडं मदनध्वजमिव मकराधिष्ठितं दिव्यमिवानिमिषलोचनरमणी

का॰
दं॰
७२

ये अरण्यमिवजलदम्भसामाजापुण्डरीकं उदगकुलमिवानेकशतपत्रपद्मोद्भासितं केसबलमिवमध
करकुलोपगीयमानकुवलयापीडं कद्रूतनयकुलमिवनागसहस्रपीतपयोगण्डूषं मलयमिव
चन्दनशिशिरवनं अमृतमथनमिवाहृष्टात्रं अतिमनोहरमच्छादनेदृष्टे अच्छोदंनामसरोदृष्ट
वान् ॥ आलोकमात्रेणैवापगतश्रमोहस्मास्मानस्यैवमकरोत् अहोनिष्फलमपिमेतुरगस्याव
मिथुनानुसरणमेतदालोकयतः सरः सफलतामगात् अद्यपरिसमाप्तमीक्षणयुगलस्यद्रष्ट
व्यदर्शनफलं आलोकितः खलुरमणीयानामन्तः दृष्टः आह्लादनीयानामवधिः वीक्षितामनो
हराणांसीमन्तलेखाः मत्प्रत्यक्षीकृताप्रीतिजननानांपरिसमाप्तिः विलोकितादर्शनीयानामवसान
भूमिः इदमस्त्यायमरः सलिलममृतमुत्पादयतावेधसापुनरुक्ततामिवनीतासुधासृष्टिः ।
इदमपिखल्वमृतमिव सर्वेन्द्रियाह्लादनसमर्थं अतिविमलतयाचक्षुषः प्रीतिमुपजनयति शि
शिरतयास्पर्शसुखमुपपादयति कमलसुगन्धितयाघ्राणमाप्याययति हंसमुखरतयाश्रुतिमा
नन्दयति स्वादुतयारसनामाह्लादयति नियतंचास्यैवदर्शनोत्सुकतयानपरित्यजति भगवान्कैला
सनिवासव्यसनमुमापतिः नखलुसाम्प्रतमाचरति जलशयनदोहृदंदेवोरथाङ्गपाणिः यदि
दममृतसुरभिसलिलमपहाय लवणरसमप्रहृष्टपयसुदन्वतिस्वपिति नूनंचेदंनप्रथममासी

श्री॰
७२

त्सरः येन प्रलयवराहदंष्ट्राणामभ्यासभीता भूतधात्री कलशयोनिपानपरिकलितसकलसलि
ले सागरमवतीर्णा । अन्यथा यद्यत्रागाधपातालगम्भीराम्भसि निमग्नाभवेन्महासरसि किमेके
न महावराहसहस्रेणापि नासादिताभवेत् नूनं चास्मादेव सलिललेशमादाय महाप्रलयेषु प्र
लयदुर्दिनान्धकारितदशदिशः प्लावयन्ति भुवनान्तराणि मन्ये च । यत्तत्सलिलमयं ब्रह्माण्ड
रूपमादौ भुवनमभूत्तदिदं पिण्डीभूय सरोव्यपदेशेनावस्थितमिति विचारयन्नेव तस्य शिलाश
कलकर्कशोवालुकप्राय विद्याधरोद्धृतमनाङ्गमदकलापार्चितानेकचारुसैकतलिङ्गमतन्वतो
दत्तदिनकरार्घ्यपयःपर्यस्तरक्तकमलशोभितप्रपत्कूलशिलातलोपविष्टजलमात्रपानिषेव्यमा
नानुपमभ्यर्णतया कैलासस्य स्नानागतमातृमण्डलपदपङ्क्तिमुद्राङ्कितमवकीर्णभस्मस्नावित
मग्नोत्थितगणाहूतोद्धूलनमवगाहावतीर्णगण्डस्थलगलित मदम स्रवणासिक्तमतिप्रमाण
पादाक्रम्यमाणत्रुटितकात्यायनीसिंहवितारमार्गं दक्षिणतीरमासाद्य तुरगादवततार । अवती
र्थं च व्यपेतपर्याणमिन्द्रायुधमकरोत् क्षितितललुठितोत्थितं च गृहीतकतिपययवसग्रासं सरो
वतार्य पीतसलिलमिच्छया स्नातं चोत्थाप्यानीतमस्य समीपवर्तिनः तरोर्मूलशाखायामपगत
खलीनं हस्तपाशस्त्रृङ्खलया कनकमय्या चरणे बद्धा कृपाणिकावल्लूनान्तिस्या चाग्रतः कानिचि
व

स्तुरसीर्दूर्वाप्रवालकवलान्तुन्नरपि सलिलमवततार ततस्तु प्रक्षालितकरचरणः स्नानक इव कृ।
त्वा जलमयमाहारं चक्रवाक इव स्वादयन्मृणालशकलानि शिशिरांशुरिव स्पृष्ट्वा करायैः कुमुदा
नि फणीवाभिनवजलतरङ्गवातानानङ्गःपावप्रहारार्त इवोरसि निधाय नलिनीदलोत्तरीयं अव
गाह्य गज इव शीकरासारप्रक्षालितकरः सरःसलिलादुदगात् । प्रत्यग्रभग्नशिशिरैर्बालमृ
णालकैर्जलकणिकाचितैः कमलिनीपलाशैर्लतामण्डपपरिसरे शिलातले प्रस्तरमास्तीर्य नि
धाय शिरसि पिण्डीकृतमुत्तरीयं निषसाद । मुहूर्तं विश्रान्तस्य तस्य सरस उत्तरप्रदेशे सञ्चरतस्तृ
णकवलेन निश्चलश्रवणपुटेन मण्डलीभूतेनोद्ग्रीवेणेन्द्रायुधेन प्रथममाकर्णितं श्रुतिसुभ
गं वीणातन्त्रीझाङ्कारमिश्रमानुष्यं गीतशब्दमशृणोत् श्रुत्वा च जनोत्रविगतमनुष्यसम्पाते प्रदेशे
गीतध्वनेः सम्भू तिरिति उपजातकौतुकः कमलिनीपत्रप्रस्तरादुत्थाय वनामेव गीतसंपातसू
चितां दिशं चक्षुः प्राहिणोत् । अतिदवीयस्तया तु तस्य प्रदेशस्य प्रयत्नव्यापृतलोचनोऽपि विलो।
कयन्न किंचिद्ददर्श तमेव केवलमनवरतं गीतशाब्दं शुश्राव कुतूहलवशाच्च गीतध्वनिजिज्ञासया
कृतगमनबुद्धिर्दत्तपर्याणमिन्द्रायुधमारुह्य प्रियगीतैः प्रथमप्रस्थितैः प्रार्थितेनापि वनहरिणैः
प्रदिश्यमानवर्त्मा सप्तच्छदबकुलैलालवङ्गलवलीलतालोलकुसुमसौरभपरिमलयालिङ्गल।

विरतश्रवणिरत्नतया तमालनीलया दिग्भागमटवीथ्येव पश्चिमसरस्तीरवनलेखया निमिज्जीकृत
तंगीतध्वनिमभिप्रतस्थे क्रमेण च संप्रवणागतैरच्छनिर्झरजालजनितजाड्यैरभिजृम्भितस्फुटजव
ल्कलैः धूर्जटिवृषरोमन्थफेनबिन्दुवाहिभिः षण्मुखशिखिशिखण्डिशिखाचुम्बिभिः अम्बिकाकर्ण
पूरपल्लवोल्लासनदुर्ललितैर्मत्तरजसुरकामिनीकर्णोत्पलमकरन्दोद्गारिभिः आकम्पितकदम्बफ
लैः नमेरुकुसुमपांसुपातिभिः पशुपतिजटाबन्धोत्तंसवासुकिपरिपीतशेषैः राज्ञादिभिः उ
णैः कैलाससमासन्नैरभिनन्द्यमानो । गत्वा च तं प्रदेशं सर्वतो मरकतहरिते द्वे विहारीण तत्र मणि
यैः भ्रमरभृङ्गराजनावरजर्जरितजरठकुसुममञ्जरीजालैरुन्मदकोकिलाकुलकवलीकृतसहृ
कारकोमलाग्रपल्लवैरुन्मदषट्चरणचक्रवालवाचालितविकचहृतकलिकैः आचकितवको
रवचञ्चुचुम्बितनमेरुचाङ्कुरैः चम्पकपरागपुञ्जपिञ्जरकपिञ्जलजग्धपिप्पलीफलैः फलभर
निकरनिपीडितनिवि इद्दालिमीनीडमसृणकलविङ्कैः प्रक्रीडितचपलकपिञ्जलकरतल
ताडनतरलितनाडीपुटैः अन्योन्यकलहकुपितकपोतपोतपक्षपालीपातितकुसुमैः कु
सुमरजोराशिशारशारिकाश्रितशिखरैः शुकपातशुष्कविरलशिखाशिखरमाकलितफलस्फो
तैः जलधरजललवविमलबन्धुगन्धचातकध्यानश्रवणविततमालखण्डैः इभकलभकोन्न

लितनवपल्लववेल्लितलतावलीवलयैः आलीयमाननवयौवनमत्तपरावतपत्तोपपर्यस्तकुसुमस्तव
वैः तत्रपवनकम्पितकोमलकदलीदलवीजितैः अविरतफलनिकरावनतनारिकेलवनैः अ
कठोरपत्रप्रकटपूगविटपिपरिवृतैः अनिवारितविहङ्गमखण्डखण्डितपिण्डखर्जूरजालकैः मदमु
खमयूरीमधुररवविरावितान्तरैः अकलितकलापकलिकादन्तुरैः अन्तरान्तराकैलासतटाङ्कितात
टाङ्कितासिकतिलतलभूमिभागैः वनदेवताकरतलनिवहनिभमलञ्जकजललवसिक्तमिवकि
सलयनिकरमतिसुकुमारमुद्वहद्भिः अग्निपार्श्विकग्रामसमदिनचामरीकुलनिषेवितमूलैः क
पोतगुरुमायैरिन्द्राक्षधैर्यैरिवजनावस्थानैः कुमुदैरिवादत्तदिनकरप्रवेशशिशिराभ्यन्तरैः दाशरथि
बलैरिवाञ्जननीलतलपरिगतमार्गैः प्रासादैरिवसपारावतैः भवनतापसैरिवनिरन्तरोद्भिन्नप्रवा
लतलताङ्कुरजालकैः अभिषेकसलिलैरिवसर्वौषधिकुसुमफलकिसलयसनाथैः आलेख्यशृङ्गै
रिवबहुवर्णचित्रपत्रशकुनिसमशोभितैः कुसुमैरिवभरद्वाजद्विजोपसेवितैः महाकारिभिरिवल
म्बमानबालपल्लवस्तूपस्पृष्टतलैः महासमरसमरैरिवपर्यन्तावस्थितबहुगुल्मकैः हंसैरिवभ्र
मरसम्पातकवचावृतकायैः मयाणामिमृगैरिवविवानरकराङ्गुलिस्पृष्टगण्डैः अवनिपालसायने
रिवसिंहपदाङ्कितलैः आरब्धपञ्चतपःक्रियैरिवोष्मिखिर्भिविमाङ्गलपरिवृतैः दीक्षितैरिवकृत

कुसुमशरविषाणकण्डूयनैः जरत्कुरङ्गनिकरैरिव जटावल्कलमण्डलपरिवृतैः इन्द्रजालिकैरिव
दृष्टिहारिभिः पादपैः परिवृतं चन्द्रप्रभनाम्नः तस्य सरसः पश्चिमे तीरे कैलासपादस्य ज्योत्स्नाव
दातया प्रभया धवलयन्तं प्रदेशं भूतलभागसन्निविष्टं श्रीभगवतः शूलपाणेः शून्यं सिद्धायतन
मपश्यत् । तच्च तपोवनोद्भूतैरितस्ततः समापतद्भिः केतकीगर्भधूलिभिर्धवलीक्रियमाणका
यं पशुपतिदर्शनश्रद्धेनोर्वलोकादिव प्रतिपद्यमानो भस्मव्रतं आयतनप्रवेशप्रणामिव परिश्रम्यमा
णः प्रविश्यापश्यत् । चतुःस्तम्भस्फटिकमण्डपिकातलप्रतिष्ठितमविरतोद्भूतेनाक्षीदेवोलालि
ख्वगलज्जलबिन्दुभिर्धृविघटितचन्द्रबिम्बदलैरिव निर्जटहासमाक्ष्यवैरिव ओषधपणशाक
लैरिव पाञ्चजन्यसञ्छादरैरिव क्षीरोदहृदयाकरैरुपपादितमौक्तिकमुक्ताटविभ्रमैः शुचिभिः
मन्दाकिनीपुण्डरीकैः कृतार्चनं अमलमुक्ताशिलाघटितलिङ्गमघोषत्रिभुवनवन्दितचरणं चरा
चरगुरुं चतुर्मुखं भगवन्तं त्र्यम्बकं तस्य च दक्षिणां मूर्तिमाश्रित्याभिमुखीमासीनां प्रपरावितन्त्र
यासनां प्रति विसारिणा सर्वदिङ्मुखप्लावकेन प्रलयविलुप्तक्षीरोदधिपयः प्रवाहपाण्डुरेणाति
दीर्घकालसञ्चितेन तपोराशिनेव सर्वतो विसर्पता पाण्डुपाण्डुरोरसि स्रोतो जलनिभेन पिण्डीभू
यवहतेव देहप्रभाविताननेन सगिरिकाननं दक्षमयमिव तं प्रदेशं कुर्वन्तीम् अन्यथैव दलयन्तीं कै

लाससगिरिं सन्नवहंसदपि लोचनपथप्रविष्टत्वेन क्षालितामिव मनोनयनयोः प्रीतिधवलप्रभापरिगत
देहतया स्फाटिकगृहगतामिव दुग्धसलिलमग्नामिव विमलदुकूलान्तरितामिवादर्शतलसङ्क्रा
न्तामिव शरदभ्रपटलतिरस्कृतामिवाविस्पष्टविभाव्यमानावयवां पञ्चमहाभूतमयमपहा
य शुक्लात्मकं अङ्गनिष्पादनोपकरणकलापं धवलगुणेनैव केवलेनोत्पादितां दक्षाधरक्रिया
मिवोद्धतगणकचग्रहभयोपसेवितत्र्यम्बकां रतिमिव मदनदेहनिमित्तं हरप्रसादनार्थमाश्रि
तहराराधनां क्षीरोदाधिदेवतामिव सहवासपरिचितहरचन्द्रलेखोत्कण्ठाकृष्टां इन्दुमूर्तिमिव
हर्भोत्तमभयकृतत्रिनयनशरणागमनामैरावतदेहच्छविमिव गजाजिनावगुण्ठनोत्कण्ठितशिति
कण्ठचित्तेनापन्नां पशुपतिदक्षिणश्रवणहासच्छविमिव निर्गत्य कृतावस्थानां शारीरीणामिव
रुद्रोद्धूलनभूमिमाविर्भूतां ज्योत्स्नामिव हरकण्ठान्धकारविघटनोद्यमप्राप्तां गौरीतपःसिद्धि
मिव कृतदेहपरिग्रहां कार्तिकेयकौमारव्रतक्रियामिव मूर्तिमतीं गिरिशवृषभदेहकान्तिमिव
पृथगवस्थितां आयतनतरुकुसुमसमृद्धिमिव शङ्कराभ्यर्चनाय स्वयमुद्यतां पितामहतपःसि
द्धिमिव महीतलमवतीर्णां आदियुगप्रजापतिकीर्तिमिव सप्तलोकभ्रमणखेदविश्रान्तां त्रयीम
यीमिव कलियुगध्वस्तधर्मशोकगृहीतवनवासां आगामिकृतयुगबीजकामिव प्रमदारूपेणावस्थि

तां देहवतीमिव मुनिजनध्यानसम्पदं अमरराजवीथीमिवाभ्रगङ्गाभ्यागमवेगपतितां कैलास
श्रियमिव दशमुखोन्मूलनक्षोभनिपतितां श्वेतद्वीपलक्ष्मीमिवान्यद्वीपान्तरावलोकनकुतूह
लागतां काशकुसुमविकासकान्तिमिव शरत्समयप्रतीक्षमाणां शेषशरीरच्छायामिव रसा
तलमपहाय निर्गतां मुसलायुधदेहप्रभामिव मधुमदविघूर्णनायासविगलितां शुक्लपक्ष
परम्परामिव पुञ्जीकृतां सर्वहंसैरिव धवलतया कृतसंविभागां धर्महृदयादिवोत्कीर्णां मुक्ता
फलादिवाकृष्टां मृणालैरिव विरचितावयवां दन्तदलैरिव घटितां इन्दुकरकूर्चकैरिव प्रक्षालितां
वर्णकसुधाच्छटाभिरिव च्छुरितां अमृतफेनपिण्डैरिव पाण्डुरीकृतां पारदरसधाराभिरिव धौतां रज
तद्रवेणेव निर्मृष्टां चन्द्रमण्डलादिवोत्कीर्णां कुटजकुन्दसिन्धुवारकुसुमच्छविभिरिवोल्लासितां
इयत्तामिव धवलिम्नः स्कन्धावलम्बिनीभिरुदयतटगतादर्कबिम्बादुद्गतबालरश्मिभिरिव नि
र्गताभिः कपिलतडित्तरलतेजसाम्राभिः रचितस्थानावस्थितानाविरलवारिकणतया प्रणमलयपशु
पतिचरणभस्मचूर्णाभिरिव जटाभिरुद्भासितशिरोभागां जटापाशग्रथितअक्षमाङ्कन मणिमयं
नामाङ्कं ईश्वरचरणद्वयप्रभृतिहस्तां रविरथतुरगखुरखण्डनवनोदविषदेन भस्मनाकृतलला
टपट्टिकां शिखरशिलाश्लिष्टपाशाङ्कुरकलामिव शैलराजमेखलां अतलभक्तिप्रसादनयाहस्ता

का॰
दे॰
७६

76

लक्ष्मीकृतालिङ्गनया द्वितीययेव पुण्डरीकमालया हृदयमाभावयन्ती भूतनाथमवनतगीर्वाणप
तिस्फारितनाथपृष्ठवशादतिशुचिभिः शुद्धहृदयमणिमयूखैरिव गीतगणैरिव स्वरैरिव स्तुतिवर्णै
रिव मूर्तिमद्भिः शङ्खादिव निष्पतद्भिर्दशनांशुभिः पुनरिव स्नपयन्ती गौरीपतिं प्रतिबिम्बमलैर्वेदार्थैरिव
ग्रथ्यमानपुण्यपरागैः श्रीनारायणनाभिपुण्डरीकबीजैरिवोद्भूतैः सप्तर्षिभिर्विकरस्पर्शेष्टनमात्मान
मिच्छद्भिः तारकारूपेणागतैः आमलकीफलस्थूलैः अक्षफलैरुपचितेनाक्षवलयेनाधिष्ठितक
ण्ठभागां परिवेशपरिगतचन्द्रमण्डलामिव पौर्णमासीं निशामथो पृथुवंशाधारैः कपालमण्ड
लाकारेण मोक्षद्वारकलशकान्तिना स्तनयुगलेनैव ब्रह्मसमीपस्थमनाथामिव स्थितगङ्गां गौरी
शिखरमठामयेनेव चामरकर्णचिराक्रान्तिना स्तनयुगलमध्यनिबद्धग्रन्थिना कल्पतरुलतावल्क
लेन कृतोत्तरीयकृत्यां प्रत्यग्रमलोचनसकाशमनादलब्धेन चूडामणिचन्द्रमयूखेनेव मण्डलीकृ
तेन ब्रह्मसूत्रेण पवित्रीकृतकायां आषाढीनेन स्वभावसितेनापि भस्मासनबद्धोत्तानचरणत
लप्रभापरिष्वङ्गाल्लोहितायमानेन दुकूलपटेन प्रावृतनितम्बां यौवनेनापि स्वकालोपसर्पिणा
निर्विकारविनीतेन शिष्येणेवोपास्यमानां लावण्येनापि कृतप्रणयेनेव स्वच्छात्मना परिरक्षितां
रूपेणापि कर्णचिरलोचनेनेव रुचिरचापलेनायतनसङ्गेणेव सेवितां । उत्सङ्गगतानामिव स्व

श्रीं॰
७६

स्तम्भशङ्खवलयिकाङ्गुलीयप्रतिनाङ्गुलिना त्रिगुणाङ्गिकावशेषभस्मपाण्डुरेण प्रकोष्ठबद्धशङ्खव
लयेन नखमयूखैर्दन्तुरितयार्ष्टीनदन्तकोणेनैव दन्तमयीं दक्षिणकरेण वीणामास्फाल
यन्ती प्रत्यक्षामिव गान्धर्वविद्यां मणिमण्डपिकास्तम्भलग्नाभिर्विवात्मान्तर्बहुपाभिः सहचरीभि
रिव सखीजनाभिः प्रतिमाभिरुपेतां स्नपनार्थलिङ्गसंक्रान्तप्रतिबिम्बतया मतिबलया भक्त्या रा
थितस्य हृदयमिव प्रविष्टां हरस्य ह्रादलेखयेव प्रासकमण्डयोगयायर्ष्पितेषु बन्धुबद्धया क्षान्त्येव
व रत्नमुखवर्णया मन्त्रयेव हूंकाराङ्गितनमाङ्गलया मीमांसयेवानेकभावाङ्गविज्ञया गीतयादेव वि
तृपाल्लमुपवीणयन्ती प्रतिमधुरगीताकृष्टैर्ध्यानमिवाभ्यस्यद्भिर्निश्चलकर्णपुटैः स्तिमितगवाक्ष
वानरशरभसिंहप्रमुखैर्निभृतचरितैरावद्धमण्डलैरारण्यमानगीतानुविद्धविपञ्चीघोषां घन
गामिनीमिव नभसोवनीतां दीक्षितवाचमिव ब्रह्माहुतां त्रिपुरारातिगौरमालाकामिव तेजोमयी
पीताम्बरतामिव विगलत्क्ष्मां ईश्वरशिवशालिकलामिवान्तःप्रजानरागां धर्ममथितोदधिजलम
ध्यादिमिवाङ्गःप्रसन्नां धर्ममरतलप्रदीप्तमिवाङ्गतां बौद्धबुद्धिमिव निरालम्बनां वैदेहीमिव प्राप्त
ज्योतिष्प्रवेशां चूतकलाङ्कुरमालामिव वशीकृतानाहृदयां महीमिव जलभृतवेष्टां हिमसमय ११
दिनमुखलक्ष्मीमिव पार्श्वर्पितभास्करातपां छायामिव सम्पादयन्ति गमनोचितमात्रां आलिखितं

का॰ दे॰

मिवाचलावस्थितां शंखमयीमिव तच्छायालिप्तभूतलां निर्मलतां निरहङ्कारां निर्मत्सराममानुषाकृ
तिं दिव्यत्वादपरिज्ञायमानवयः प्रमाणामष्टादशवर्षदेशीयामिवोपलक्ष्यमाणां प्रतिपन्नपाशुपत
व्रतां कन्यकां ददर्श ॥ ततोऽवतीर्य तस्य शाखायां बद्धान्तरगमुपसृत्य भगवते भक्त्या प्रणम्य त्रिलो
चनाय तामेव दिव्ययोषितमनिमिषपक्ष्मणा निश्चलनिबद्धलक्ष्येण चक्षुषा पुनर्निरूपयामास ।
उत्पादिताभ्यस्य तस्या रूपसम्पदा कान्त्या प्रशान्त्या चाविर्भूतविस्मयस्य मनसि अहो जगति जन्तूनां
असमर्थितोपनतान्यापतन्ति वृत्तान्तराणि । तथा हि मया मृगयायामिहेच्छया निरर्थकमनुबध्नता
तुरगमुखमिथुनमयमतिमनोहरो मानवानामगम्यो दिव्यजनसञ्चरणोचितः प्रदेशो वीक्षितः
अत्र च सलिलमन्वेषमाणेन हृदयहारि सिद्धजनोपस्पृष्टजलं सरो दृष्टं तत्तीरे च विश्रान्तेनामान्
षं गीतमाकर्णितं तच्चानुसरता मानुषदुर्लभदर्शना दिव्यकन्यकेयमालोकिता नहि मे संशीतिर
स्या दिव्यतायां आकृतिरेवात्रमापयत्यमानुषतां कुतश्च मर्त्यलोके संभूतिरेवंविधानां गन्धर्वैध
नैर्विशेषाणां तद्यदि मे सहसा दर्शनपथात् नापयाति नारोहति वा कैलासशिखरं नोत्पतति वा ग
गनतलं ततः कात्वं किमभिधाना किमर्थं वा प्रथमे वयसि प्रतिपन्नाव्रतमिति सर्वमेतदेनामुपसृत्य प्र
क्ष्यामि । इति मनसा तत्समवकाशा आश्चर्याणामित्यवधार्य तस्यामेव स्फटिकमण्डपिकायामन्यत

११

मं स्तंभं आश्रित्य मञ्जुपविष्टो गीतसमाप्त्यवसरं प्रतीक्षमाणस्तस्थौ । अथ गीतावसाने मूकीभूतवीणाप्र
शान्तमधुकरमधुरस्वनेव कुमुदिनी सा कन्यका समुत्थाय प्रदक्षिणीकृत्य कृतहरप्रणामा परिवृत्य स्व
भावधवलया तपःप्रभावप्रगल्भया दृष्ट्या समाश्वासयन्तीव पुण्यैरिव स्पृशन्ती तीर्थजलैरिव प्रक्षा
लयन्ती तपोभिरिव पावयन्ती शुद्धिमिव कुर्वाणा वरप्रदानमिवोपपादयन्ती पवित्रतामिव नयन्ती चन्द्रा
ब. पीडमाभाषे । स्वागतमतिथये । किमिमां भूमिमनुप्राप्तो महाभागः तदुत्तिष्ठागम्यतामनुभूय
तामतिथिसत्कार इति एवमुक्तस्तु तया सम्भाषणमात्रेणैवानुगृहीतमात्मानं मन्यमानः उत्था
य भक्त्या कृतप्रणामो भगवति यथाज्ञापयसीति अभिधाय दर्शितविनयः शिष्य इव तां व्रजन्तीमनु
वव्राज । व्रजंश्च समर्थयामास हन्त नावश्यमियं मां दृष्ट्वा तिरोभूता कृतेऽस्मिन् कुतूहलेन प्रश्नावकाशाया
हृदि पदं यथा चेयमस्यास्तपस्विजनदुर्लभदिव्यरूपाया अपि दाक्षिण्यातिशयमतिपवित्रमभिज्ञाता
विभाव्यते तथा सम्भावयामि नियतमियमखिलमात्मोदन्तं समभ्यर्थ्यमाना मया कथयिष्यतीति
कृतमतिः पदशतमात्रमिव गत्वा निरन्तरैर्दिवापि रजनीसमयमिव दर्शयद्भिस्तमालकचिभिरु
न्धकारितप्रदेशभागां उत्फुल्लकुसुमेषु लतानिकुञ्जेषु कूजतो मन्दं मन्दं मदमत्तमधुलिहो विकसित
मुखरीकृतपर्यन्तामतिहृद्यमानिनीनां च धवलशिलातलप्रतिघातोत्पतनफेनिलानामपां प्रस्रव

णोत्कोटिग्रावविटङ्कविपाट्यमानैरुच्चण्डनिर्झरवशीर्यमाणानुधारशिशिरशीकरासारैराबध्यमान-
नीहारहिममहाहारहरहासधवलैश्चोभयतः स्रवद्भिर्निर्झरैर्धारावलम्बितचलच्चामरकलापामिवोप-
लक्ष्यमाणामन्तःस्थापितकमण्डलुमण्डलां एकान्तावलम्बितयोगपट्टिकां विशाखिकाशिखरान्त-
बद्धनारिकेलीफलवल्कलमयधौतपानघटगोपेतां शर्वशीर्णाङ्गभस्मधूसरवल्कलशयनीयसना-
थैकदेशामिन्दुमण्डलेनेव टङ्कोत्कीर्णेन शाङ्खमयेन भिक्षाकपालेनाधिष्ठितां सन्निहितभस्मालाबु-
कां गुहामद्राक्षीत् ॥ तस्याश्च द्वारशिलातले समुपविष्टा वल्कलशयनीयशिरोभागविन्यस्त-
वीणा ततः पर्णपुटेन निर्झरादागृहीतमर्घ्यसलिलमादाय तां कन्यां समुपस्थितामलमतियन्त्रणया
कृतमतिप्रसादेन भगवति प्रसीद विमुच्यतामयमत्यादरः त्वदीयमालोकनमपि सर्वपापप्रशमन-
मघमर्षणमिव पवित्रीकरणायालमस्माकमित्यब्रवीत् । अनुबध्यमानश्च तया तां सर्वामतिथिसप-
र्यामतिहृष्टावनतेन शिरसा समस्तां प्रतिजग्राह । कृतातिथ्यया च तया द्वितीयशिलातलोपविष्टया तू-
ष्णीमिव तूष्णीं स्थित्वा क्रमेण परिपृष्टो दिग्विजयात्प्रभृति किन्नरमिथुनानुप्रसङ्गेनागमनमात्मनः सर्व-
माचचक्षे । विदितसर्ववृत्तान्ता चोत्थाय सा कन्यका भिक्षाकपालमादाय तेषामादाय तत्तरूणां तलेषु
विचचार । अचिरेण तस्याः स्वयंपतितैः फलैरापूर्यत भिक्षाकपालमागत्य च तेषां फलानामुपभोगाय

नियुक्तवतीचन्द्रापीडं आसीच्चास्य चेतसि नास्ति खल्वसाध्यंनाम तपसां किमतःपरमाश्चर्यं य
दपगतचेतनाः सचेतना इवास्यै भगवत्यै समभिसृजन्ति फलान्यात्मानुग्रहमुपपादयन्ति वनस्प
तयः चित्रमिदमालोकितमस्माभिरदृष्टपूर्वमित्यधिकतरोपजातविस्मयश्चान्यायतनमेव प्रदेशा
मिन्द्रायुधमानीय व्यपनीतपर्याणं नातिदूरे संयम्य निर्झरजलनिर्वर्तितस्नानविधिस्तान्यमृ
तस्वादून्युपयुज्य फलानि पीत्वा च तद्धाराशिशिरमस्रवणजलमुपस्पृश्य चैकान्ते तावद्वनस्थ
यावत्तयापि कृतो जलफलमूलेष्वाहारस्तु प्रणयइति परिसमापिताहारो निर्वर्तितसन्ध्योचिता
चारो शिलातले विस्रब्धमुपविष्टामनिभृतमुपसृत्य नातिदूरे समुपविश्य मुहूर्तमिव स्थित्वा चन्द्रा
पीडः सविनयमवादीत् । भगवति त्वत्प्रसादप्राप्तिप्रोत्साहितेन कुतूहलेनाकुलीक्रियमाणो मात्र
घनाम्लोभोलघिमा बलादनिच्छन्तमपि मां प्रश्नकर्मणि नियोजयति जनयति हि प्रभुप्रसादलवोपि
प्रागल्भ्यमधीरप्रकृतेः स्वल्पाप्येकदेशावस्थानकालकलपरिचयमुत्पादयति प्रणयमुपचारप
रिग्रहः प्रणयमारोपयति उष्यदिनानि खेदकारणमिव ततः कथनेनानुगृह्यमात्मानमिच्छामि यतिम
हत्कुतूहलं प्रभवद्दर्शनात्प्रभृति कोऽन्वकमस्मिन्विषये कतरस्य मरुतामृषीणां गन्धर्वाणां गुह्यकानाम
प्सरसां वा कुलमनुगृहीतं भगवत्या जन्मना । किमर्थं वास्मिन्कुसुमसुकुमारे वयसि व्रतग्रह

ण्ये क्वेदं वयः क्वेयमाकृतिः क्व चायं लावण्यातिशयः क्वेयमिन्द्रियाणामुपशान्तिः तदद्भुतमिव प्रति-
भाति किंनिमित्तमनेकसिद्धसाध्यसंबाधानि स्वर्लोकसुभगान्यपहाय दिव्याश्रमपदान्येकाकिनी
वनमिदममानुष्यमधिवससि। कश्चायं प्रकारो यत्त्वेवं पञ्चभिर्महाभूतैरारब्धमीदृशा धवलताधेन
शरीरं नेदमस्माभिरन्यत्र दृष्टं श्रुतं वा। तदपनयतु नः कौतुकं आवेदयतु भवती सर्वमिदमित्येवम-
भिहिता सा किमप्यन्तर्ध्यायन्ती तूष्णीं मुहूर्तमेव स्थित्वा निःश्वस्य स्थूलस्थूलैरन्तर्गतं हृदयशुद्धिमि-
वादाय निर्गच्छद्भिरिन्द्रियप्रसादमिव द्रवीकृत्य पातयद्भिरच्छाच्छैरमलकपोलस्थलस्खलितैरव-
कीर्णहारमुक्तामुक्ताफलतरलपातैरश्रुबिन्दुभिः वल्कलावृतकुचांशावरजर्जरितशीकरैरश्रु-
भिरामीलितलोचना निःशब्दं रोदितुमारेभे। तां च प्ररुदितां दृष्ट्वा चन्द्रापीडस्तत्क्षणमचिन्तयत्
अहो दुर्निवारतव्यसनोपनिपातानां यदीदृशीमप्याकृतिमनभिभवनीयामात्मीकुर्वन्ति सर्वथा के-
चन न स्पृशन्ति शरीरधर्माणामुपतापाः बलवती हि द्वन्द्वानां प्रवृत्तिः इदमपरमधिकतरमुपजनितं
मद्भ्यमनसि मे कौतुकमस्या बाष्पसलिलनिपातेन न स्वल्पीयसा शोककारणेन धीरीकुर्वन्त्येवं-
विधा मूर्तयः नहि क्षुद्रनिर्घातपातिभिश्चलन्ति वसुधेति संवर्धितकुतूहलश्च शोकस्मरणा-
द्धेतामुपगते उपाधिनिमित्तमिवात्मानमवगच्छन्नुत्थाय प्रस्रवणादञ्जलिना मुखप्रक्षालनोदकमुप

तिन्ये सा तत्तदत्रबोधादवाप्तिवबाष्पजलधारासन्तानापिहितकपोलायतने प्रक्षाल्यलोचने व
ल्कलोपान्तेन वदनमुपमृज्य दीर्घमुष्णं च निःश्वस्य शनैः प्रतिवादीत् राजपुत्र किमनेनातिनिष्ठुरे
या मम मन्दभाग्याया आजन्मनः प्रभृति वैराग्यवृत्तान्तेन श्रवणीयेन श्रुतेन तथापि यद्यस्ति कुतूहल
न्तत्कथयामि श्रूयतां । प्रायेणाकल्याणाभिनिवेशिनः श्रुतिविषयमापतितमेव यथा विबुधस
द्मनि अप्सरसो नाम कन्यकाः सन्तीति तासां च चतुर्दशकुलानि एकं भगवतः कमलयोनेर्मनसः स
मुत्पन्नं अन्यद्वेदेभ्यः सम्भूतं अन्यदग्नेः संभूतं अन्यत्पवनात्प्रसूतं अन्यदमृतान्मथ्यमानादुत्पति
तं अन्यज्जलाज्जातं अन्यदर्ककिरणेभ्यो निर्गतं अन्यत्सौदामिनीभ्यः प्रवृत्तं अन्यत्सोमरश्मिभ्यो निष्प
तितं अन्यद्भूमेरुद्भूतं अन्यन्मृत्युना निर्मितं अन्यन्मकरकेतुना समुत्पादितं अन्यद्दक्षस्य प्रजापते
रिति प्रसूतानां सुतानां द्वे सुते मुनिररिष्टा च बभूवतुः ताभ्यां गन्धर्वैः सह कुलद्वयं जातं एवमेता
न्येकत्र चतुर्दशकुलानि गन्धर्वाणां मातृजाद्वितीयसंभवं तत्तदेवकुलद्वयं जातं अत्र मुनेस्तनय
श्चित्रसेनादीनां पञ्चदशानां भ्रातॄणामधिको गुणैः षोडशश्चित्ररथो नाम समुत्पन्नः सकलत्रि
भुवनप्रख्यातपराक्रमो भगवता समस्तसुरमौलिमालालालितचरणतलिनेनाखण्डलेन सखहृद्वे
हृतोपबृंहितप्रभावः सर्वेषां गन्धर्वाणामाधिपत्यमसिलताभरीचिनिचयमेचकितेन बाहुना समु

का॰ टी॰ ८०

पार्जितेनाशेषमवाप्तवान् इतस्तु नातिदूरे तस्माद्भारतवर्षादुत्तरेणानन्तरे किंपुरुषनाम्नि वर्षे वर्षपर्वते
हेमकूटो नाम निवासः तत्र च तद्भुजपरिपालितान्यनेकानि गन्धर्वशतसहस्राणि निवसन्ति तेनैव
चेदं चैत्ररथं नामातिमनोहरं काननं निर्मितं इदं चाच्छोदाभिधानं अतिमहत्सरः खानितं अयं च भगवान्
भवानीपतिः स्वयं रचितः अरिष्टायास्तु पुत्रस्तुम्बुरुप्रभृतीनां षण्णां सोदर्याणां ज्येष्ठो हंसो नाम जगद्वि
दितो गन्धर्वः तस्मिन्द्वितीये गन्धर्वकुले गन्धर्वराजेन चित्ररथेनैवाभिषिक्तो बाल एव राज्यपदमासा
दितवान्। अपरिमितगन्धर्वबलपरिवारस्य तस्यापि स एव गिरिरधिवासः यत्तत्सोममयूखसंभूतं
मप्सरसां कुलं तस्मात्किरणजालान्तर्मार्गगलितेन सकलेनेव रजनिकरकलापलावण्येन निर्मिता
त्रिभुवननयनाभिरामा द्वितीयेव गौरी गौरीति नाम्ना हिमकरकिरणावदातवर्णा कन्या प्रसूता तां च
द्वितीयगन्धर्वकुलाधिपतिर्मन्दाकिनीमिव क्षीरसागरः प्रणयिनीमकरोत्। सा तु भगवता मकरके
तनेनेव रतिः शारत्समयेनेव कमलिनी हंसेन योजिता सदृशसमागमोपजनितामतिमहतीमुपगता
वती निखिलान्तःपुरस्वामिनी च तस्याभवत्। तयोस्तु तादृशयोर्महात्मरूपयोरहमीदृशी विगतल
क्षणा शोकायैव केवलमनेकदुःखसहस्रभाजनमेकैवात्मजा समुत्पन्ना तातस्त्वनपत्यतया सुतज
न्मातिरिक्तेन महतोत्सवेन मज्जन्माभिनन्दितवान् अवाप्ते च दशमेऽहनि कृतयथोचितसमाचारो महा

शे॰ ८०

क्षेनेतियथार्थमेवमेनामकृतवान् साहंपितृभवनेबालतयाकलमधुरप्रलापिनीवीणेव गन्धर्वा
णामङ्कादङ्कं सञ्चरन्ती अविदितशोकायासमनोहरं शैशवमतिनीतवती क्रमेणचकृतमेव
प्रविवेशवसन्तइवमधुमासेनमधुमासइवनवपल्लवेननवपल्लवइव कुसुमेनकुसुमइवमधुकरेणम
धुकरइवमदेनमदइवमदनेननवयौवनेनपदं । अथविजृम्भमाणनवनलिनवनेषुकण्टकितनकलि
काकलापस्थगितकाननप्रकोष्ठकलिकेषु कोमलमलयमारुतावतारतरङ्गितानङ्गध्वजांशुकेषु मदक
लितकामिनीगण्डूषसीधुसेकपुलकितबकुलेषु मधुकरकुलकलङ्ककालेयकुसुमकुड्मले
षु अशोकतरुताडनरणितरमणीमणिनूपुरझङ्कारसहस्रमुखरेषु विकसत्कुसुमपरिमल
पुञ्जितालिजालमञ्जुशिञ्जितसुभगसहकारेषु अविरलकुसुमधूलिवालुकापुलकितधरात
लेषु मधुमदविडम्बितमधुकरीकदम्बकसेव्यमानलतादोलेषु उत्फुल्लवल्लीपल्लवलीयमा
नमत्तकोकिलोल्लासितमधुकरशीकरोदयमत्तदिनेषु प्रोषितजनजायाजीवापहृत्सु मन्मथेषु मन्म
थास्फालितचापरवभयस्फुरितपथिकहृदयसाधिवारितमार्गेष्विव किंशुकसमाकीर्णमार्गेषु अ
विरतपतत्कुसुमपरागपवनचित्रपत्रशीत्कारबधिरीकृतदिङ्मुखेषु दिवापिमदनानलमदनरागाभिसा
रिकासार्थसङ्कुलेषु उद्वेलरतिरससागरसंप्लावितेषु सकलजीवलोकहृदयानन्ददायकेषु म

मधुमासदिवसेषु एकदाहमम्बया सह मधुमासविस्तारितशोभं प्रोत्फुल्लनवनलिनकुमुदकुवलय
कह्लारमिदमच्छोदं सरः स्नातुमभ्यागमं ॥ अत्र च स्नानार्थमागतया भगवत्या पार्वत्या तटशिला
तलेषु विलिखितानि सभृङ्गिरिटीनि पांशुतिमग्नकुशापदमाङ्गलाङ्गमितशुनिजनप्रणामप्रदक्षि
णानि त्र्यम्बकप्रतिबिम्बानि वन्दमाना भ्रमरभरभुग्नगर्भकेसरजर्जरकुसुमोपहारवन्ध्यो येन लताम
ण्डपः परभृतनखकोटिपाटितकुड्मलनालविवरविगलितमधुनिकरधारः सम्प्राप्सितोयं सह
कारतरुः उन्मदमयूरकुलकलकलभीतभुजङ्गमुक्तलतासिशिशिरेयं चन्दनवनवीथिका विकच
कुसुमगुच्छपानमत्तवनदेवतामेङ्खोलनशोभनेयं लतादोला बहलकुसुमरजःपटलमसृण
कलहंसपदलेखमतिरमणीयमिदं तीरनलिनतालमिति स्निग्धमनोहरोद्देशदर्शनलोभाद्विम
हृदया सह सखीजनेन व्यचरं । एकस्मिंश्च प्रदेशे कुसुमितकुन्तानिलोपनीतं निर्भरविकसितेऽपि का
नने विभूतान्यकुसुमपरिमले विसर्पन्तमिति सुरभितयाञ्जलिग्राह्यमिव तर्पयन्तमिव सुरयन्तमिव
घ्राणेन्द्रियमहमहमिकया मधुकरकुलैरनुबध्यमानमनाघ्रातपूर्वं ममात्रच्छलोकोचितं कुसुमग
न्धमजिघ्रं । कुतोऽयमित्युपारूढकुतूहला मुकुलितलोचना तेन कुसुमगन्धेन मधुकरीवाकृ।
ष्टमाणाकौतुककतरलाभ्यधिकतरोपजातनूपुररवमणितमाकुलिताष्टपदः कलहंसानिकतिचित्पदा

निर्गत्वाह्रवकुनाशानेन्धीकृतमदनशोकविधुरं वसन्तमिव तपस्यन्तमविरलमाउल्लश्रास्पष्टंमी
शानशिरः शशाङ्कमिव धृतव्रतं श्रवणरमलोचनेवशीकर्तुकामं काममिव सातिशयमतितेज
स्वितयाप्रचलितेनतडिल्लतापञ्जरमध्यगतमिव ग्रीष्मदिवसदिवसकरमण्डलोदरप्रविष्टमि
व ज्वलनज्वालाकलापमध्यस्थितमिव विभाव्यमानं उन्मिषच्छायाबकुलबकुलयादीपिकालो
कपिङ्गलया देहप्रभया कपिलीकृतकाननं कनकमयमिव तं प्रदेशं कुर्वाणं लोचनारसल
लितप्रतिसरसमानसुकुमारपिङ्गलजटं प्रणयपताकायमानया सरस्वतीसमागमोत्कण्ठा
कृतचन्दनलेखयेव भस्मललाटिकया बालपुलिनलेखयेव गङ्गाप्रवाहप्रञ्जासमानमनेक
पापभवनभङ्गकुटिलोरगेण मूलनाह्वयेन विराजितमत्यायततया लोचनमयीं मालामिव
ग्रथितामकण्ठकहृत्रं सर्वहरिणैरिव दत्तलोचनशोभासंविभागमायतनोत्तुङ्गघ्राणवंशमप्राप्तहृदय
प्रवेशेन नवयौवनरागेणेव सर्वात्मना पाटलीकृताधरसचकं श्रवणाङ्गिरमश्रुराजित्वादना
मादिनमथकरावलिवलयपरित्रेयविलासमिव बालकमलसमानमाननं दधानमनङ्गध्वं
सकगुणेनेव कुण्डलीकृतेनेनतपस्तडाककमलिनीमृणालेनेव यज्ञोपवीतेनालङ्कृतं एकेन
सनालबकुलफलाकारकमण्डलु अपरेणामकारकेशविनाशशोकसंदिनायारे नेकिववाष्य

का॰ दे॰ ८८

जलबिन्दुभिरारचितां स्फटिकगुलिकाक्षमालिकां करेण कलयन्तमनेकविद्यापगासङ्गमावर्तेनि
भयानामिश्रद्वयोपशोभमानमज्ञानेनानिराकृतस्य मोहान्धकारस्यापयानपदवीमिवाञ्जनरजे
लेखाश्यामलां रोमराजिमुदरेण तनीयसा बिभ्राणमात्मतेजसा विजित्य सवितारमाहृतेन
परिवेशमण्डलेनेव मौञ्जमेखलागुणेन परिच्छिन्नजघनभागमभ्रगङ्गास्रोतोजलप्रक्षालि
तेन रजस्वकोरलोचनपुटपटलकान्तिना मन्दारवल्कलेन उपपादिताम्बरप्रयोजनमलङ्कार
मिव ब्रह्मचर्यस्य यौवनमिव धर्मस्य विलासमिव सरस्वत्याः स्वयंवरपतिमिव सर्वविद्यानां
सङ्केतस्थानमिव सर्वश्रुतीनां निदाघकालमिव साषाढं हिमसमयकाननमिव स्फुटितप्रि
यङ्गुमञ्जरीगौरं मधुमासमिव कुसुमधवलतिलकमूर्तिभूषितमुखमात्मानुरूपेण सवयसा
शिवपरेण देवार्चनकुसुमान्युच्चिन्वता तापसकुमारेणानुगतं अतिमनोहरं स्नानार्थमागतमति
कुमारकमपश्यम् ॥ तेन च कर्णावतंसीकृतां वसन्तदर्शनानन्दितायाः स्मितप्रभामिव वनश्रियं
मलयमारुतागमनार्घलाजाञ्जलिमिव मधुमासस्य यौवनलीलामिव कुसुमलक्ष्म्याः सुरत
परिश्रमस्वेदजलकणजालकावलीमिव रतेर्ध्वजचिह्नचामरपिञ्छिकामिव मनोभवराजस्य
मधुकरकामुकाभिसारिकां कान्तिकासारास्तवकाग्रकारिणीममृतबिन्दुनिष्यन्दिनीमहरह

शे॰ ८८

वी कुसुममञ्जरीमुपजातं । अस्याः परिभूतान्यकुसुमामोदेन त्वयं परिमल इति मनसा निश्चित्य
तपोधनकुमारमीक्षमाणाहमचिन्तयं अहो रूपातिशयनिष्पादनोपकरणकोशस्याक्षीणता वि-
धातुः यत्त्रिभुवनाद्भुतसम्भारे भगवत्यनङ्गे कुसुमायुधमुत्पाद्य तदाकारातिरिक्तरूपातिशयराशि-
रयमपरोऽमुनिमायामयो मकरकेतुरुत्पादितः मन्ये च । सकलजगन्नयनानन्दकरं शशिबि-
म्बं विरचयता श्रीलक्ष्मीलीलावासभवनानि सृजता कमलवनानि प्रजापतिना प्रथममेत-
दाननाकारकरणकौशलाभ्यासमुपकृतं अन्यथा किमिव हि सदृशवस्तुविरचनायोकरणे
अलीकं चेदं यथा किल सकलाः कलावतो बहुलपक्षे क्षीयमाणस्य सुषुम्नाना मना नाड्या रविरा-
पिबतीति ताः खल्वस्य गभस्तयः समस्तवपुराविशन्तीति कुतोऽन्यथा रूपापहारिणि क्लेशबहु-
ले तपस्यवर्तमानस्येदं लावण्यमिति विचिन्तयन्तीमेव मामविरचिततगुणदोषो रूपैकपक्षपा-
ती नवयौवनसुलभः कुसुमायुधः कुसुमसमयमद इव मधुकरीपरवशामकरोत् । उच्छ्वसि-
तैः सह विस्मृतनिमेषेण किञ्चिदाकुञ्चितपक्ष्मणा जिह्मिततरलतारकापाङ्गदेशेनादक्षिणे-
न चक्षुषा समुत्सुकमापिबन्तीव सर्वात्मनात्र प्रविशन्तीवोन्मत्तनामिव गत्वा मोहमालाम मनोभवा-
भिभूता त्रायस्वेति शरणमिवोपयान्ती देहि हृदयेऽवकाशमित्यर्थिनीमिव दर्शयन्ती हा हा किं

का॰ दे॰ पत्र
83

मिदमसाम्प्रतमतिक्षेपणमकुलजकुमारीजनोचितमिदं मया प्रस्तुतमिति जानानाप्यप्रभवन्ती करणानां
स्तम्भितेव लिखितेवोत्कीर्णेव संयतेव मूर्छितेव केनापि विधृतेव निस्पन्दसकलावयवा तत्कालावि
र्भूतेनावष्टम्भेनाकथितशिक्षितेन नानाध्यायेन स्वसंवेद्येन केवलं न विभाव्यते किं तद्रूपसम्पदा किं
मनसा किं मनसिजेन किमभिनवयौवनेन किमनुरागेणोपदिश्यमाना किमन्येनैव केनापि प्रका
रेणाहमपि न जानामि कथं कथमिति तमतिचिरं व्यलोकयम् । उत्क्षिप्यनीयमानेव तत्समीपमि
न्द्रियैः प्रसभादाकृष्यमाणेव हृदयेन पुरः प्रेर्यमाणेव पुष्पधन्वना कथमपि प्रयत्नमात्मान
मधारयम् । अनन्तरं च मेऽत्र मदनेनैवकाशमिव दातुमाहितमन्तरान्निर्ययौ श्वाससमाकृतः साभिलं
षं हृदयमाप्यायितकाममिव स्फुरितमुखमस्पृशत्कुचयुगलं । स्वेदसलिललवलेखावालालितेवाग
लल्लज्जा मकरध्वजनिशितशरनिकरनिपातत्रस्तेवाकम्पत गात्रयष्टिः तद्रूपातिशयस्पृष्टमिवङ्ग
न्तुहलादालिङ्गनलालसेभ्योऽङ्गेभ्यो निरगाद्रोमाञ्चजालकं अशोषितः स्वेदोम्भसा धौतश्चरणाक
गलादिव हृदयमविशद्रागः आसीच्च मम मनसि यात्रान्मतिरूढीकृतसुरतव्यतिकरेऽस्मिञ्जने मानि
क्षिपना किमिदमनार्येण सहसामारब्धं मनसिजेन । एवं नामातिमृदूकृतं हृदयमनङ्गेनाजनस्य यद
न्तरागविषययोग्यतामपि विचारयितुं नालं क्वेदमतिभास्वरधाम तेजसां तपसां च क्व च प्राकृतज

गे॰
पत्र

नाभिनन्दितानि मन्मथपरिस्पन्दितानि नियतमयं मामेव मकरलाञ्छनेन विडम्ब्यमानामुपहसति म
नसा चिन्तयेच्चेद् यदहमेवमवगच्छन्त्यपि न शक्नोम्यात्मनो विकारमुपसंहर्तुं । अन्याश्चापि कन्यकास्त्र
पामपहाय स्वयमुपयाताः पतीन् अन्या अप्यनेनैव विनीतेन मन्मथेनात्मसंत्रां नीता नार्यो न च
नवाहमेका यथा कथमनेन क्षणेनाकारमात्रालोकनाज्जलीभूतमेवमस्वतन्त्रतामुपनीतास्म्यत्रः करणा
कालेहि गुणाश्चित्तनिवारतामारोपयन्ति मदनस्य सर्वथा यावदेवमचेतनास्मि यावदेव च न परि
स्फुटमनेन विभाव्यते मदनदुश्चेष्टितलाघवमेतत्तावदेवास्मात्प्रदेशादपसर्पणं श्रेयः कदाचि
दनभिमतस्मरविकारदर्शनकुपितोयं प्रणामाभिज्ञां करोति मामु । अहह कोपा हि मुनिजनप्रकृति
रित्यवधार्योपसर्पणाभिलाषिण्यहमभवं अशेषजनवन्दनीया चेयं जातिरिति कृत्वा तद्वदना
कृष्टदृष्टिप्रसरमदलितपद्ममालमदृष्टभूतलमीषदुल्लसितकर्णपल्लवोन्मुखकपोलमण्डल
मालोलालकलतालसत्कुसुमावतंसं समासदेशादालोयतमाणिकुण्डलमस्मै प्रणाममकरवं
अथ कृतप्रणामायां मयि दुर्लङ्घ्यशासनतया भगवतो मनोभवो मदजननतया मधुमासस्याभिर
मणीयतनतया च तस्य प्रदेशस्याविनयबहुलतया चाभिनवयौवनस्य चञ्चलप्रकृतितया चेन्द्रि
याणां दुर्निवारतया च मनोवृत्तेः तथाभवितव्यतया च तस्य वस्तुनः किंबहुना मम मन्दभाग्याये

का॰ दू॰ ८४
84

दीर्घत्वादस्य चेह शापस्यान्ते ऽस्य विहितत्वात्तमपि मद्विकारदर्शनापहृतधैर्यं प्रदीपमिव पवनस्तर
लतामनयदनङ्गः । तदा तस्यापि अभिनवागतेन मदनेन प्रस्थितस्येव रोमोद्गमः प्रादुरभूत् मत्समका
लमभिप्रस्थितस्य मनसो मार्गमिवोपदिशद्भिः प्रवः प्रवृत्तश्वासैः वेपथुरगृहीताव्रतभङ्गभीतेवाक
म्पतकरतलगताक्षमाला द्वितीयेव कर्णोत्सङ्गकुसुममञ्जरी कपोलतलासङ्गिनी मम हर्षपरस्वेद
सलिलशीकरजालिका महर्षीनप्रीतिविस्तारितस्य चोत्तानतारकस्य पुण्डरीकमयमिव तत्क्षण
मुपदर्शयतो लोचनयुगलस्य विसर्पिभिरंशुसन्तानैरेह ज्योत्स्नयाच्छोदसलिलमपहाय विकचकुव
लयवनैरिव गगनतलमस्त्यानितैरस्य धवलदशादिशः । तयातत्स्यातिप्रकटया विकृत्या द्विगुणी
कृतमदनावेशानन्तरमहमवर्णनीयां कामप्यवस्थामन्वभवं इदं च मनस्यकरवं अनेकस्वरनस
मागमललास्यलीलोपदेशोपाध्यायो मकरकेतुरेव विलासानुपदिशति अन्यथा विविधरसमासङ्कुल
लितेष्वीदृशोऽपृष्टव्युत्पत्तिकोऽस्य प्रविष्टबुद्धेरस्य जनस्य कुत इयमनभ्यस्ता रतिरसनिष्यन्दमिव तन्त्री
ग्रहनामिव वर्षन्ती मदपङ्कलितेव खेदालसेव निद्राजडेवानन्दभरमन्थरतरलतलसञ्चारिणी
अनिभृतभ्रूलतालासिनी दृष्टिः कृतस्वेदमतिनैपुण्येन च तद्दृष्टवानन्तरमेवानुगतोऽस्य हृदयाभिला
षः कथ्यते । यामप्रसराचोपसृत्यानद्वितीयमस्य सहचरमनिबालकं प्रणामपूर्वकमपृच्छम् ।

गे॰ ८४

भगवन्किमभिधानः कस्य चायं तपोधनस्य क्व वा किंनाम्नस्तरोरियमनेनावतंसीकृता कुसुममञ्जरी
जनयति हि मे मनसि महत्कौतुकमस्याः सगुन्धस्य साधारणसौरभोयं अनाघ्रातपूर्वो गन्ध इति स तु
मामीषद्विहस्याब्रवीत् बाले किमनेन पृष्टेन प्रयोजनं अथ कौतुकमावेदयामि श्रूयतां। अस्ति दे
व सकलत्रिभुवनप्रख्यातकीर्तिरत्युदारतया सिद्धवृन्दवन्दितचरणयुगलो महामुनिर्दिव्यलोक
निवासी श्वेतकेतुर्नाम तस्य भगवतः सुरासुरसुन्दरीहृदयानन्दकरमशेषत्रिभुवनसुन्दरमतिशा
यितनलकूबरं रूपमासीत् । स कदाचिद्देवतार्चनकमलान्युद्धर्तुं नामैरावतमदजलबिन्दुबद्धचन्द्र
कमानत्वचितजलां हरहासितसितस्रोतसं मन्दाकिनीमवततार । अवतरन्तं च तं तदा कमलवनेषु
सहस्रनमसन्निहिता विकचसहस्रपत्रपुण्डरीकोपविष्टा देवी लक्ष्मीर्ददर्श तस्यास्तु तमवलोकयन्त्याः
प्रेममन्दमुकुलितेनानन्दबाष्पभरतरङ्गतरलतारेण लोचनयुगलेन रूपमास्वादयन्त्या जृम्भिका
रम्भमन्थरमुखविविन्यस्तहस्तपल्लवाया मन्मथविकृतमनस आसीत् आलोकमात्रेणैव समासादित
सुरतावसानसुखाया स्तस्मिन्नेवासनीकृते पुण्डरीकोत्कृतार्थेनासीत् तस्माच्च कुमारः समुत्पादि
ततः समुत्सङ्गेनादाय सा भगवन्दृष्टेन तवायमात्मज इत्युक्त्वा तस्मै श्वेतकेतवे ददौ। असावपि बाल
जनोचिताः क्रियाः कृत्वा तस्य पुण्डरीकसम्भवतया पुण्डरीक इति नाम चक्रे प्रतिपादितव्रतं च तमा

गृहीतसकलविद्याकलापमकार्षीत् सोयं। इयं च सुरासुरैर्मथ्यमानक्षीरसागरादुद्भूतः पारिजाततना
मा पादपः तस्य मञ्जरी यथा चैषा श्रवणसंसर्गमासादितवती तदपि कथयामि। अ
द्य चतुर्दशीति भगवन्तं चाम्बिकापतिं कैलासगतमुपासितुं सममरलोकान्मया सह नन्दनवनसमीपे
नायमत्रसमरन्निर्गत्य मात्तान्मधुमासलक्ष्मीदत्तललितहस्तावलम्बया बकुलमालिकामेखलत
या कुसुमपल्लवग्रथिताभिः आजानुलम्बिनीभिः कण्ठमालिकाभिर्निरन्तराच्छादितविग्रहया नवचू
ताङ्कुरकर्णपूरया प्रथमासवपानमत्तया नन्दनवनदेवतया पारिजातकुसुममञ्जरीमिमामादाय
प्रणम्याभिहितः। भगवन्सकलत्रिभुवनदर्शनाभिरामाया स्त्वाकृतेरस्याः सदृशोयमलङ्कारः।
प्रसादीक्रियतामियमवतंसविलासकुतूहलिना समारोप्यतां श्रवणशिखरे व्रजतु सफलतां जन्म पा
रिजातस्य एवमभिदधानो चायमात्मस्तुतिवादत्रपानमितलोचनस्तामनादृत्यैव गन्तुं प्रवृत्तः।
मयानुयातामनुयात्रीमालोक्य को दोषः सावीक्रियतामस्याः प्रणयपरिग्रह इत्यभिधाय बलादियमसि
च्छतोप्यस्य कर्णपूरीकृता तदेतत्कारणं येनायमियं याचेयं यथा चास्य श्रवणशिखरे समारूढा तत्सर्वमा
वेदितमित्युक्तवति तस्मिन्स्तपोधनयुवा किञ्चिदुपदर्शितस्मितो मामवादीत्। अयि कुतूहलि
नि किमनेन प्रश्नायासेन यदि रुचितस्याभिपरिमलाघ्राणाभिलाषस्तत्काममुपहृत्यात्मीयाच्छ्रवणाद

पनीयकालैरलिकुलझंकारिणैः आरब्धरतिसमागमप्रार्थनामिव मदीये श्रवणपुटे तामकरोत् । मम तु
तत्कपोलस्पर्शलोभेन तत्क्षणमपरमिव पारिजातकुसुममवतंसस्थाने हृदयमासीत् स च मत्क
पोलस्पर्शसुखेन तरलीकृताङ्गुलिजालकात्करतलादक्षमालां लज्जया सह गलितामपि नज्ञासीत्
अथाहं तामप्राप्तामेव भूतलमक्षमालां गृहीत्वा सलिलनंकुजपापासन्यानितकण्ठग्रहसुखमनु
भवन्तीं दर्शितापूर्वहारलीलां कण्ठाभरणतामनयं । इत्थंभूते च व्यतिकरे छत्रग्राहिणी मामवोचत्
भर्तृदारिके स्नाता देवी प्रत्यासीदति गृहगमनकालः तत्क्रियतां मज्जनविधिरिति ग्रहं तु तस्या वचने
न नवग्रहाकारिणीव प्रथमाङ्कुशपातेनानिच्छयाकथं कथमपि समाकृष्यमाणा तन्मुखलावण्यास्रुत
पङ्कमग्नामिव कपोलपुलककण्टकजालकमग्नामिव मदनशरशलाकाकीलितामिव सौभाग्यगु
ण स्यूतामिवातिकृच्छ्रेणाहं दृष्टिमाकृष्य स्नातुमुदचले । उच्चलितायां च मयि द्वितीयोऽपि दारकस्तथा
विधं तस्य धार्यं स्खलितमालोक्य किंचित्प्रकटितप्रणयकोप इवावादीत् सखे पुण्डरीक नैतदनु
रूपं भवतः क्षुद्रजनक्षुण्णः एष मार्गः धैर्यधना हि साधवः किं यः कश्चित्प्राकृत इव विक्लवीभवन्तमा
त्मानं न रुणत्सि क्व तत्तवापूर्वोऽयं प्रत्येन्द्रियोपप्लवः येनास्येवं कृतः क्व ते तद्धैर्यं क्वासाविन्द्रियजयः
क्व तद्वशित्वं चेतसः क्व सा प्रशान्तिः क्व तत्कुलक्रमागतं ब्रह्मचर्यं क्व सा सर्वविषयनिःस्पृहता क्व ते

का॰
पू॰
८६

गुरूपदेशाः क्व तानि निःशान्तानि क्व ता वैराग्यप्रवृत्तयः क्व तदक्षयाभिनिवेशः क्व तदुपभोगविद्वेषित्वं क्व सा स्व
विषयपराङ्मुखता क्व वा भोगानामुपर्यरुचिः क्व तद्यौवनानुशासनं सर्वथा निष्फला प्रज्ञा निर्गुणो धर्मशा
स्त्राभ्यासः निरर्थकः संस्कारः निरुपकारो गुरूपदेशविवेकः निष्प्रयोजना प्रबुद्धता निष्कारणं ज्ञानं
यदत्र भवादृशा अपि रागाभिषङ्गैः कलुषीक्रियन्ते प्रमादैरभिभूयन्ते कथं करतलात्स्खलितामपहृता
मक्षमालामपि न लक्षयसि अहो विगतचेतनत्वं अपहृतानामेव इदमपि नावह्रियमाणमनार्यया
निवार्यतां हृदयमिति एवमभिधीयमानश्च तेन यत्किञ्चिदुपजातलज्ज इवावादीत् सखे कपिञ्जल
किं मामन्यथा सम्भावयसि नाहमेवमस्या दुर्विनीतकन्यकायाः मर्षयाम्यक्षमालाग्रहणापराधमि
त्यभिधाय अलीककोपकान्तेन प्रयत्नविरचितभीषणभ्रूकुटिमुखेन चुम्बनाभिलाषस्फुरिताधरेण
मुखेन्दुना मामवादीत् चपले पदे पदादस्मादहिमामक्षमालामिति मन्मथावासक्तहृष्टैः शून्यहृदयया
स्य प्रसारिते पाणौ निधाय स्वेदसलिलस्नाता ततः पुनः स्नातमभवत्। उत्थाय च कथमपि प्रयत्नेन निम्न
गेव प्रतीपं नीयमाना सखीजनेन बलादम्बया सह तमेव चिन्तयन्ती स्वभवनमयासिषं गत्वा च प्रविश्य
कन्यकान्तःपुरं ततः प्रभृति तद्विरहविधुरा किमागतास्मि किं न तत्रैवास्थितास्मि किमेकाकिन्यस्मि
किं परावृतास्मि किं तत्रैवास्थितास्मि किं प्रमत्तालापास्मि किं जागर्मि किं रोदिमि किं न रोदिमि किं

ग्रं॰
८६

दुःखमिदं किमन्तकागमोऽयं किं व्याधिरयं किं व्यसनमिदं किमुत्सवोऽयं किं दिवसः पक्षः किं निशेयं कानि
रम्याणि कान्यरम्याणि इति सर्वेणैवावगच्छम्। अविज्ञातमदनवृत्तान्ता च क्व गच्छामि किं करोमि किं शृणो
मि किं पश्यामि किमालपामि कस्य कथयामि कोऽस्य प्रतीकार इति सर्वेणैवाज्ञासिषं केवलमारुह्य क
न्यान्तःपुरप्रासादं विसर्ज्य च सखीजनं द्वारि निवारिताशेषपरिजनप्रवेशा सर्वव्यापारानुत्सृज्य एका
किनी मणिजालगवाक्षनिहितमुखी तामेव दिशं तस्य नाथतया प्रसाधितामिव कुसुमितामिव महा
रत्ननिधानाधिष्ठितामिव अमृतरससागरपूरप्लावितामिव पूर्णचन्द्रोदयालंकृतामिव दर्शनसुभ
गामीक्षमाणा तस्माद्दिगन्तरादागच्छन्तमनिलमपि वनकुसुमपरिमलमपि शकुनिध्वनिमपि त
द्वार्तां प्रष्टुमनाः तदुपलम्भतया तपः परिक्लिष्टतया स्पृहयन्ती तस्यैत्येव गृहीतमौनव्रता स्मरजनित
पक्षपाता च तत्परिग्रहात्कृतनिवेशस्याग्राम्यतां तदास्पदतया च यौवनस्य चारुतां तच्छ्रवणसम्पर्कात्
विज्ञानकुसुमस्य मनोहरतां तन्निवासात्सुरलोकस्य रम्यतां तद्रूपसम्पर्कात्त्यागिविज्ञानकुसुमस्य कुसु
माकृथस्य दुर्जयतामारोपयन्ती हरस्यस्यापि कामलिनीव सवितुः सागरवेलेव चन्द्रमसः मयूरीव
जलधरस्य तस्यैवाभिमुखी तथैव तां तद्विरहात्तरजीवितोऽक्रमरक्षामिवावावली कोटे तोहहुन्ती तथै
व वचनतया प्रसृतनतद्विरहालापयेव कर्णालग्नया पारिजातमञ्जर्या तथैव चन्द्रेन उत्कवनलस्पर्शजन्मना।

कदम्बमञ्जरीकर्णपूरायमाणेन रोमाञ्चजालकेन कण्टकितैककपोलका निस्पन्दमतिष्ठं । अथता
म्बूलकरङ्कवाहिनी मदीया तरलिका नाम मयैव सहागता स्नातुमासीत् साच पश्चाच्चिरादिवागत्य त
थावस्थां मां पार्श्वेवादीत् । भर्तृदारिके यौ तौ नातिपमन्यमानौ दिव्याकारावस्माभिरच्छोदसरस्तटे दृष्टौ
तयोरेकोयेन भर्तृदारिकेयमवतंसीकृता सुरतरुकुसुममञ्जरी स तस्मान्निवृत्यात्मनो दर्शनम
तिनिभृतपदः कुसुमसनाथलतागहनान्तरेणोपसृत्य मां गच्छन्तीं दृष्ट्वा एतन्नो भर्तृदारिकामुद्दिश्यापृ
च्छीत् । बालिके केयं कन्यका कस्य वापत्यं किमभिधाना क्व गच्छतीति मयोक्तं । एषा खलु भगवतः श्वे
तभानोरंशसंभूतायामप्सरसि गौर्यां समुत्पन्ना देवस्य सकलगन्धर्वचूडामणिशिलाकाशिखरोल्लेख
मसृणितचरणनखचक्रस्य प्रणयप्रवृत्तगन्धर्वकामिनीकपोलपत्रलतालाञ्छितभुजशिखर
स्य पादपीठीकृतलक्ष्मीकरकमलस्य गन्धर्वाधिपतेर्हंसस्य दुहिता महाश्वेता नाम गन्धर्वाधिवासं
हेमकूटाचलमभिप्रस्थितेयं इति कथिते च मया किमपि चिन्तयन्मुहूर्तमिव तूष्णीं स्थित्वा विगतनिमे
षेण चक्षुषा चिरमभिवीक्षमाणो मां सानुनयमर्थितामिव दर्शयन्पुनराह । बालिके कल्याणिनी त
वाविसंवादिनी प्रचलाबालभावेप्याकृतिरियं तत्करोमि मे वचनमेकमभ्यर्थ्यमानेति ततो मयास
विनयमुपरचिताञ्जलिपुटयादर्शितादरमभिहितो भगवान् । कस्मादेवमभिधत्से काहमात्मनः

सकलत्रिभुवनपूजनीयाभ्यामहंशाः प्रणयैर्विना निखिलकल्मषापहारिणीमस्माद्दिथग्रहहिमिमपि

नयानयात्र किं प्रनगतां तद्विस्वबुमाद्विषयतो कर्त्तव्यं प्रत्रप्रयुस्य नामयं जनइति एवमुक्तस्तु मया

सस्नेहया सखीमिवोपकारिणीमिव प्राणप्रदामिव हस्ताममभिनन्द्य निकटवर्त्तिनस्तमालपा

दपात्पल्लवमादाय निष्पीड्य शिलातलेतेन गन्धगजमदसुरभिपरिमलेन रसेनोत्तरीयवल्कलै

कदेशाद्विपाट्य पट्टिकां स्वहस्तकमलकनिष्ठिकानखशिखरेणाभिलिख्येयं पत्रिकात्वयातस्यै

कन्यकायै प्रच्छन्नमेकाकिन्यै देयमित्यभिधायार्पितवान् । इत्युक्त्वाचसातां तांबूलभाजनादाकृष्य

मामदर्शयत् अहं तु तेन तत्संबन्धिनालापेन साहसमयेनापि स्पर्शसुखमिवाङ्गजनयता श्रोत्रविषये

णापि रोमोद्गमात्रामितमर्वाङ्गान्तःप्रवेशेन मदनावेशमन्त्रेणेवावेश्यमानानस्याः करतलादादायतां

वल्कलपत्रिकां तस्यामिमामभिलिखितामार्यामपश्यम् । दूरं मुक्तालतया बिससितया विप्रलो

भ्यमानोमे हंस इव दर्शिताशो मानसजन्मात्वयानीतः अनया च मे दृष्ट्या दिग्मोहभ्रान्त्येवमणप्र

वर्त्मनो बहुलविशयेवान्धस्य जिह्वोच्छित्येव मूकस्येन्द्रजालिकपिच्छयेवानत्वदर्शिनः ज्वरप्र

लापकृत्येवासम्बन्धभाषिणः कुहूनिद्रयेव विषविक्लवस्य लोकायतिकविद्ययेवाधर्मरुचेः मदि

रयेवोन्मत्तस्य ग्रहावेशक्रिययेव पिशाचगृहस्य दोषविकारोपचयः कृतनामाक्रियतः स्मरानलस्य मम

का॰ दं॰ ७७

नमः॰ येनाञ्जलीक्रियमाणा सखीभिरिव प्रणामो विकल्पनामभ्यागमय । नाचक्षितीयदर्शनेन न स्पृहा न महा
प्रणामिवात्र भूतन स्वर्लोकवासामिव देवताधिष्ठितामिव लब्धवरामिव पीतामृतामिव समासादितत्रै
लोक्यराज्याभिषेकामिव मान्यमाना सततसन्निहितामपि दुर्लभदर्शनामिव परिचितामप्यपूर्वामिव
सादरमाभाष्यमाणा पार्श्वावस्थितामपि सर्वलोकस्योपरिव्यवस्थितामिव पश्यन्ती कपोलयोरलक
लताभङ्गेषु च सोपग्रहं स्पृशन्ती विपरीतमिव परिजनस्वामिसम्बन्धमुपदर्शयन्ती नरपालिके कथय
कथमस्त्वयाहदृष्टः किमभिहितास्मि तेन कियन्तं कालमभिहितास्मि तत्र कियदत्र स्थितं तस्मान मावाग
तः इति निपुणतः पर्यपृच्छत् । अनयैव च कथया तया सह तस्मिन्नेव प्रासादे तथैव च प्रतिषिद्धाशेषपरिज
नप्रवेशा दिवसमत्यवाहयत् । अथ मदीयेनैव हृदयेन कृतरागसंविभागो लोहितायति गगनतलाभो
गावलम्बिनि रविबिम्बे सरागादिव सकलदर्शनानुरक्तायां कान्तकमलशयनायां अनङ्गार्तायामि
व पाण्डुतां व्रजन्त्यामातपलक्ष्म्यां गैरिकगिरिसलिलप्रतापपाटलेषु कमलवनेभ्यः समुत्थाय व
नगजयूथेष्विव पिञ्जरीभवत्सु भास्करकिरणेषु गगनावतारविश्रामलालसानां रविरथवाजिनां हृष्ट
हेषारवमतिशयाहूतेन सह विशन्ति मेरुगिरिगह्वरं वासरे स्रञ्जलिनरञ्जपंकजपदप्रविष्टमधुकरा
वलीषु रविविरहमूर्च्छान्धकारितहृदयास्विव मारब्धनिमीलनासु पद्मिनीषु ग्रासीकृतसामान्य

उ॰ ७७

मृणाललताविवरसङ्क्रामिणा नीवपरम्परहृदयान्यादाय विहरमानेषु यथाङ्गनाम्नांकगलेषु सान्ध्यत्रयं
ह्रिणीमामागत्याकथयत् भर्तृदारिके तयोर्मुनिकुमारयोरन्यतरो द्वारे तिष्ठति कथयति च । अहमा
लामुपयाचितुमागतोस्मि । अहं तु मुनिकुमारनामग्रहणादेवस्यानपेक्षितापि गतेनैव द्वारदेशं समुपजा
तमदागमनाशङ्कासमाहूयान्यतमं कञ्चुकिनं गच्छ प्रवेशयैनमित्यादिश्य प्राहिणवं । अथ मुहूर्ता
दिव ननंनस्यरूपस्येव यौवनं यौवनस्येव मकरकेतनं मकरकेतनस्येव वसन्तसमयं वसन्तसमयस्येव
दक्षिणानिलमनुरूपं सखायमृषिकुमारकं कपिञ्जलनामानं जराधवलस्य कञ्चुकिनोऽनुमार्गे
ण चन्द्रातपस्येव बालातपमागच्छन्तमपश्यं । अन्तिकमुपगतस्य चास्य पर्याकुलमिव सविषादमिव
शून्यमिवार्थिनमिवान्तर्गतेन प्रयोजनेनाक्रान्तमाकारमलक्षं उत्थाय च कृतप्रणामासादरं स्वयमासनमु
पाहरं । उपविष्टस्य बलादनिच्छतोऽपि प्रक्षाल्य चरणौ उपमृज्य चोत्तरीयांशुकपल्लवेनाव्यवधानायां
भूमावेव तस्यान्तिके समुपाविशं । अथ मुहूर्तमिव स्थित्वा किमपि विवक्षुरिव सतस्यां मत्समीपोप
विष्टायां तरलिकायां चक्षुरपातयत् अहं तु विदिताभिप्राया दृष्ट्वैव भगवन्नव्यतिरिक्तेयमस्मच्छरीरा
दशङ्कितमभिधीयतामित्यवोचम् एवमुक्तश्च मया कपिञ्जलः प्रत्यवादीत् राजपुत्रि किं ब्रवीमि
वागेव मे नाभिधेयविषयमवतरति त्रपया कन्दमूलफलादौ शान्तो वननिवासी तोऽस्ति जनः क्वायम

का॰ दं॰ ८१

उपशान्तजनो विजनो विषयोपभोगाभिलाषकलङ्को मन्मथविविधविलाससङ्कटो रागप्रायः प्रपञ्चः ।
सर्वमेवात्रोपपन्नमालोकय किमारब्धं दैवेन प्रयत्नेनैव विलोपहासास्पदतामीश्वरो नयति जनं न जाने
किमिदं वल्कलानां सदृशं उताहो जटानां समुचितं किं तपसोऽनुरूपं आहोस्विद्धर्मोपदेशाङ्गमिदम्
अपूर्वैषा विडम्बना केवलमवश्यकथनीयमिदं अपर उपायो न दृश्यते अन्या प्रतिक्रिया नोपलभ्यते
अन्यच्छरणं नालोक्यते अन्या गतिर्नास्ति अकथ्यमाने च महाननर्थोऽपि निपतितो जायते प्राणपरित्यागो
नापि रक्षणीयाः सुहृदः सर्वा इति कथयामि अस्ति भवत्या समक्षमेव समया निष्ठुरमुपदर्शितकोपेना
भिहितः तथा चाभिधाय परित्यज्यते तेन स्मात्प्रदेशादुपजातमन्युः तत्क्षणात्कुसुमावचयोऽन्यमेव प्रदेशा
मगमम् । अथ यातायां च भवत्यां मुहूर्त्तमिव स्थित्वा एकाकी किमयमिदानीमाचरतीति सञ्जातवितर्कः
प्रतिनिवृत्य विटपान्तरितविग्रहस्तं प्रदेशं व्यलोकयं यावत्तत्र तं नाद्राक्षम् आसीच्च मे मनस्येव किन्तु
मदनपरायत्तचित्तः नामैवात्र स्मरन्तानो भवेत् ततो गतायां तस्यां लब्धचेतनो लज्जमानो न शक्नोति मे दर्श
नपथमुपगन्तुं आहोस्वित्कुपितः परित्यज्य मां गतः उतान्वेष्यमाणो मामेव प्रदेशमन्यमित स्ममाश्रि
त्य स्यादिति । एवं विकल्पयन्कांचित्कालमतिष्ठं तेन जन्मनः प्रभृत्यनभ्यस्तेन तस्य क्षणमपि अदर्श
नेन हूयमानः पुनरचिन्तयम् सकदाचिद्धैर्यस्खलनविलक्षः कंचिदनिष्टमपि समाचरेत् नहि किंचि

शे॰ ८१

त्क्रियतेऽस्मिया नत्वयकञ्जमेतमेकाकिनं कृतमित्यवधार्यान्वेष्टुमादरमकरवं अन्वेषमाणश्च यथाय
था नापश्यं तथा तथा सुहृत्स्नेहकातरेण मनसानन्तदशोभनमाशङ्कमानः नलिनलतागहनानि चन्द
नवीथिकाः लतामण्डपान् सरः कूलानि च वीक्षमाणो निपुणमितस्ततो दत्तदृष्टिः सुचिरमचरं अथै
कस्मिन्सरः समीपवर्तिनि निरन्तरतया कुसुममयमिव मधुकरमयमिव परभृतमयमिव मयूरमय
इवातिमनोहरे वसन्तजन्मभूमितले लतागहने ऽवस्थानमन्तः सकलव्यापारशून्यं लिखितमिवोत्की
र्णमिव स्तम्भितमिव उपरतमिव प्रसुप्तमिव योगसमाधिस्थितमिव निश्चलमपि स्वधर्माच्चलितमे
काकिनमपि मन्मथाधिष्ठितं सानुरागमपि पाण्डुतामावहन्तं शून्यान्तःकरणमपि हृदयनिवासिदयि
तं तूष्णीकमपि कथितमदनवेदनातिशयं शिलातलोपविष्टमपि मरणे व्यवसितं शापप्रदानभयादि
व दत्तदर्शनेन कुसुमायुधेन सन्तप्यमानं प्रतिनिस्पन्दतया हृदयनिवासिनीं प्रियामिवेक्षमाणं अन्तःप्रवि
ष्टप्रियावासस्य सन्तापसंक्रामभयलीनेनेव मनः क्षोभमकुर्पितैरिवोन्मुच्यमानैरिन्द्रियैः शून्यीकृतशरीर
निस्पन्दमीलितेनान्तर्ज्वलन्मदनदहनधूमाकुलितेनाभ्यन्तरेणैव पक्ष्मान्तरविवरस्रावेण कथारमन
वरतमीक्षणाध्यगलेन बाष्पजलदुर्दिनमुत्सृजता मालोहितनीमधरप्रभामनङ्गाग्नेः प्रदहतो हृदय(
मूर्धं समर्पयन्तीं शिखामिवादाय निष्क्रान्तेन दीर्घनिःश्वासेन स्तबकितां तामतिलतां कुसुमकेसरं वामकपोल

शायनीकृतकरतलतया समुत्सर्पद्भिरमलैर्नेत्राम्बुभिर्विसरलीकृतगण्डाग्रं चन्दनरसरचितललाटि
कमिव ललाटदेशाग्रहस्तेन अविरतमपनीतपारिजातकुसुमकर्णपूरतया सरोषपरिमलामोदलोभो
पसर्पिणा कलविरुतमञ्जुलेन मदनसम्मोहनमन्त्रमिव जपता मधुकरकुलेन सनीलोत्पलमिव सत
मालपल्लवमिव श्रवणदेशं दधाने उत्कण्ठज्वररोमाञ्चव्याजेन प्रतिरोमकूपमनिपतितानां मदनश
राणां कुसुमकेसरशल्यशकलनिकरमिवाङ्गलग्नं बिभ्राणे दक्षिणकरेण च स्फुरितनखकिरणनिकरां
करतलस्पर्शसुखकण्टकिनामिव मुक्तावलीमाविनयपताकां स्मरसिंधारयन्ते मदनवशीकरण
चूर्णेनेव कुसुमरेणुनानवरतमभिहन्यमाने आत्मरागमिव सङ्क्रामयद्भिरामन्त्ररनिलचलितैरशोकप
ल्लवैः स्पृश्यमाने स्मरनामाभिषेकसलिलैरिव अभिनवपुष्प स्तवकमधुशीकरैर्वनश्रियाभिषिच्य
माने अनिलनिवहनिपीयमानपरिमलैः फणिपरितनद्भिश्चम्पककुड्मलैस्तम शरशल्यकैरिव सम्भ्रमैः कु
सुमशरेणताड्यमाने अतिबहलवनामोदमत्तमधुकरानिकरझङ्कारनिःस्वनैर्झङ्कारैरिव दक्षिणा
निलेन निर्भर्त्स्यमाने मदकलकोकिलकोलाहलैः वसन्तजयघोषकलकलैरिव मधुमासेनाकु
लीक्रियमाणे प्रभातचन्द्रमिव पाण्डुरतया गृहीते निदाघगङ्गाप्रवाहमिव क्षीयमानमागते अन्तर्ग
तानले चन्दनविटपमिव म्लायति अन्यामिव अदृष्टपूर्वामिव अपरिचितमिव जन्मान्तरमिवोपगते हृदा

त्तरेणेव परिगृहीतमाविष्टमिव महाभूताधिष्ठितमिव ग्रहगृहीतमिव उन्मत्तमिव छलितमिव
अन्धमिव बधिरमिव मूकमिव विलासमयमिव पराधीनचित्तवृत्तिं परां कोटिमधिरूढं मन्मथावेशा
स्यानभिज्ञेय एवंविधाकारेण महत्समज्ञानेन । अपगतनिमेषेण च चक्षुषा तदवस्थं चिरमुद्वीक्ष्य समुपजातवि
षादो वेपमानेन हृदयेनाचिन्तयं एवं नामायमतिदुर्विषहो मकरकेतुर्येनानेन क्षणेनायमीदृ
शमवस्थान्तरमप्रतीकारमुपनीतः । कथमेवमेकपदे व्यर्थीभवेदेवंविधो ज्ञानराशिः अहो बत महत्
चित्रं तथा नामायमाशैशवाद्धीरप्रकृतिरस्खलितवृत्तिः मम चेन्येषां च प्रतिकुमारकाणां स्पृहणी
यचरित आसीत् अद्य त्वितर इव परिभूय ज्ञानमवगणय्य तपःप्रभावमुन्मूल्य गाम्भीर्यं मन्मथेन ज
डीकृतः सर्वथा दुर्लभं यौवनमस्खलितमित्युपसृत्य च तस्मिन्नेव शिलातलैकपार्श्वे समुपविश्यां
सदेशावसक्तपाणिस्तमुन्मीलितलोचनमेव सखे पुण्डरीक कथय किमिदमित्यपृच्छं । अथ स
चिरप्रसुप्तोन्मीलनालसमिव कथमपि प्रयत्नेनानवरतरोदनवशादुपजाताक्षिभावमस्रजलपट
लप्लावितमुत्कूपितमिव सवेदनमिव स्वच्छाश्रुकान्तारितरक्तकमलवनच्छायं चक्षुरुन्मील्य
मन्थरमन्थरया दृष्ट्या सुचिरं विलोक्य मामायततमं निःश्वस्य लज्जाविशीर्यमाणविरलाक्षरं सखे ।
कपिञ्जल विदितवृत्तान्तोऽपि किं मां पृच्छसीत्यभिधायातिकृच्छ्रेण शनैरवदत् । अहं तु तदाकर्ण्य त

दुरवस्थयैवमप्रतीकारविकारोयं तथापिसुहृदासुहृदुन्मार्गप्रवृत्तोयावच्छक्तितःसर्वात्मनानिवारणी
यइतिमनसावधार्याब्रुवं। सखेपुण्डरीक विदितमेवैतन्मम केवलमिदमेवपृच्छामि यदेतदारब्धं
किमिदंगुरुभिरुपदिष्टं उतधर्मशास्त्रेषुपठितं उतधर्मार्जनोपायः उतापरस्तपसांप्रकारः उतस्वर्ग
गमनमार्गोयं उतव्रतरहस्यमिदं उतमोक्षप्राप्तियुक्तिरियं आहोस्विदन्योनियमप्रकारः कथ
मेतद्युक्तंभवतोमनसापिचिन्तयितुं किंपुनराख्यातुमीक्षितुंवा किमप्रबुद्धइवानेनमन्मथहतके
नोपहास्यतांनीयमानमात्मानंनावबुध्यसे मूढोहिमदनेनायास्यते कावासुखाशासाधुजन
निन्दितेष्वेवंविधेषु प्राकृतजनबहुमतेषु विषयेषुभवतः सखलुधर्मबुद्ध्याविषलतावनंसिञ्चति
कृष्णागुरुधूमलेखेति कृष्णसर्पमवगूहते रत्नमितिज्वलन्तमङ्गारमभिस्पृशति मृणालमितिदुष्ट
वारणदन्तमुसलमुन्मूलयति मूढोविषयोपभोगेष्वनिष्टानुबन्धिषु यःसुखबुद्धिमारोपयति अधि
गतविषयतत्त्वोपिकस्मात्खद्योतइव ज्योतिर्निर्वीर्यमिदंज्ञानमुद्वहसि यतोनिवारयसिप्रचलद्रजः
प्रसरकलुषितानिस्रोतांसीवोन्मार्गप्रस्थितानीन्द्रियाणि ननियमयसिचक्षुभितंमनः कोयमनङ्गोना
म धैर्यमवलम्ब्यनिर्भर्त्सयनामायंदुराचारइत्येवंवदन्नेवमेवदनमाक्षिप्यप्रतिपन्नान्तरालप्रवृत्त
बाष्पवेगोपि प्रमृज्यचक्षुःकरतलेनपाणौमामवलम्ब्यावोचत्। सखेकिंबहुनोक्तेन स्वस्थोसि

आशीविषविषवेगविषमाणामेतेषां कुसुमचापबाणानां पतितोस्मि गोचरे स खलूपदिश्यते यस्य
चेन्द्रियाणि न सन्ति मनो वा विद्यते यः पश्यति वा शृणोति वा श्रुतमवधारयति वा यो वा शुभमिदमिति
न शुभमिदमिति विवेक्तुमलं स खलूपदेशमर्हति मम तु सर्वमेवेदं अतिदूरापेतं अवष्टम्भो ज्ञानं
धैर्यं प्रतिसंख्यानमित्यस्तमितैषा कथा कथमप्येवमेव यत्नविधृतास्तिष्ठन्त्यसवः अतीतः खलू
पदेशकालः समतिक्रान्तो धैर्यावसरः गता प्रतिसंख्यानवेला अतीतो ज्ञानावष्टम्भसमयः केन वान्य
नास्मिन्समये भवन्तमपहायोपदेष्टव्यमुन्मार्गप्रवृत्तिनिवारणं करणीयं कस्यान्यस्य वा वचसि मया
स्थातव्यमात्मानं इयमनेनैव क्षणेन भवता दृष्टावस्था न कृतमिदानीमुपदेशकालो यावत्प्राणिमि ता
वदस्य कल्याणाद्दितद्वादशादिनकरकिरणातपतीव्रस्य मदनसन्तापस्य प्रतिक्रियमाणमिच्छामि
पच्यन्त इव मेङ्गानि उन्मथ्यत इव मे हृदयं प्लुष्यत इव दृष्टिः ज्वलतीव शरीरं अत्र यत्प्राप्तकालं तत्क
रोतु भवानित्यभिधाय तूष्णीमभवत् । एवमुक्तोप्यहमेनं प्राबोधयं पुनः पुनरर्थदाशास्त्रोपदेशवि
शेषैः सनिदर्शनैः सेतिहासैश्च वचोभिः सानुनयं सोपग्रहं चाभिधीयमानोपि नाकरोत्कर्णे तदाह
मचिन्तयं । अतिभूमिमयं गतो न शक्यते निवर्तयितुमिति इदानीं निरर्थकाः खलूपदेशाः तत्प्रा
णपरिरक्षणेपि तावदस्य यत्नमाचरामीति कृतमतिरुत्थाय गत्वा तस्मात्सरसः सरसां मृणालिका

समुद्धृत्य कमलिनीपलाशानि सलिललवलाञ्छितान्यादाय गर्भधूलिकषायपरिमलमनोहराणि च
कुमुदकुवलयकमलानि गृहीत्वा गत्वा तस्मिन्नेव लतागृहशिलातले शयनमस्याः कल्पयं । तत्र च सुख
निषण्णस्य प्रत्यासन्नवर्तिनो चन्दनविटपिनां समाहृतकुसुमकिसलयानि निष्पीड्य तेन स्वभावसुरभि
णा तुषारशिशिरेण रसेन ललाटिकामस्य कल्पयम् । आचरणतलादङ्गचर्चां चारचयं अभ्यर्णपादप
स्फुटितवल्कलविवरशीर्णेन च करसंघृष्टेन च कर्पूररेणुना स्वेदप्रतीकारमकरवं ततो निहितच
न्दनद्रवार्द्रवल्कलस्य स्वच्छसलिलशीकरस्राविणा कदलीदलेन व्यजनक्रियामन्वतिष्ठम् । एवं
च मम कृते कुर्वतस्तन्नलिनीदलशयनमुपकल्पयतो मम कुसुमचन्दनचर्चामारचयतो मम कृतेऽङ्गस्य स्वेदप्रति
क्रियोद्यतस्य कदलीदलेन चानवरतं वीजयतः समुदभून्मे मनसि चिन्ता नास्त्यसाध्यं नाम
भगवतो मनोभवस्य क्वायं हरिणैः सह वनवासनिरतः स्वभावमुग्धो जनः क्व च विविधविलासरसरा
शिः गन्धर्वराजपुत्री महाश्वेता सर्वथा न हि किञ्चिदस्य दुर्घटं दुष्करमनायत्तं अकर्तव्यं वा जगति
दुरुपपादेष्वप्यर्थेष्वयमवज्ञया विचरति नचायं केनापि प्रतिकूलयितुं शक्यते का वा गणना सचेत
नेष्वपगतचेतनान्यपि सङ्घटयितुमलं । यद्यस्मै रोचते तत्कुमुदिन्यपि दिनकरकरानुरागिणी भ
वति कमलिन्यपि शशि किरणद्वेषमुत्सृजति निशापि वासरेण सह मिश्रतामेति ज्योत्स्नाप्यन्धका

रमनुवर्त्तने छायापि प्रदीपाभिमुखमभितिष्ठति नडिदपि जलदेषु स्थिरतां व्रजति जन्मापि यौवनेन
सह सञ्चारिणी भवति किं वा तस्याङ्गः साधनमपरं एवंविधो येनायमगाधगाम्भीर्यसागरः क्षण
लवलघुतामुपनीतः क्व तत्तपः क्वेयमवस्था सर्वथा निष्प्रतीकारेयमापदुपस्थिता किमिदा
नीं कर्त्तव्यं किं वा चेष्टितव्यं किं देशं प्रतिगन्तव्यं किं वा शरणं क उपायः कः सहायः कः प्रकारः
का युक्तिः कः समाश्रयः येनास्यासवः सन्धार्यन्ते केन वा कौशलेन कतमया वा प्रज्ञया केन वा प्र
कारेण केन वा ष्टम्भेन कया वा प्रत्याशया कतमेन वा समाश्वासेनायं जीवेदिति एतैश्चान्यैश्च मे विषम
हृदयस्य सङ्कल्पाः प्रादुरासन् । पुनश्चाचिन्तयं किमनयान्याप्यनया चिन्तया प्राणास्तावदस्य येन
केनचिदुपायेन शुभेनाशुभेन वा रक्षणीयाः तेषां च तत्समागममपहाय नान्यः परः संरक्षणोपा
यः बालस्वभावादप्रगल्भतया तपोविरुद्धमत्रपितोपि नायं तस्याः स्वयमभिगमनेन सूचयति
मनोरथमकालान्तरक्षमश्चायमस्य मदनविकारः सततमतिगर्हितेनाप्यकृत्येनापरं रक्षणीयान्य
न्यत्र सुहृदसून् साधवः तदतिकृपणमकर्त्तव्यमप्येतदस्माकमवश्यकर्त्तव्यतामापतितं किं वा
न्यत्क्रियते किं वान्या गतिः सर्वथा प्रयामि तस्याः सकाशं श्रावयाम्येनामवस्थामिति चिन्तयि
त्वा च कदाचिदनुचितव्यापारप्रवृत्तं मां विज्ञाय सञ्जातलज्जो निवारयेदित्यनिवेद्यैव तस्मै तत्प्रदे

का०
पू०
९२
93

प्राप्तव्याजमनुयाय गतोऽहम् । तदेवमवस्थिते यदत्रावसरप्राप्तमसमीदृशस्य चानुरागस्य सदृशमस(
स्यदागमनस्य चानुरूपमात्मनो वा समुचितं तत्र भवति भवतीत्यभिधाय किमियं वक्ष्यतीति म
न्मुखासक्तदृष्टिस्तूष्णीमभवत् । अहं तु तदाकर्ण्य सुखामृतमये ह्रद इव निमग्ना रतिरसमयमु
दधिमिवावतीर्णा सर्वानन्दानामुपरि वर्तमाना सर्वमनोरथानामग्रमिवाधिरूढा सर्वोत्सवानाम
तिभूमिमिवाधिशयाना तत्कालोपजातया लज्जया किञ्चिदवनम्यमानवदनत्वादस्पृष्टकपोलो
दरे ग्रथिते निवोपर्यकपरिपतनानुबन्धमालादर्शितमालाक्रमे रभसप्रत्यग्रसंश्लेषतयोपजातमथि
मभरे कमले रानन्दजलबाष्पबिन्दुभिः स्नपयद्भिरावेद्यमानप्रहर्षप्रसरा तत्क्षणमचिन्तयं । दिष्ट्या
तावदयमनङ्गो मामिव तमप्यनुबध्नाति यत्सत्यमनेन मे सन्तापयता कियता पुण्येन दर्शितानुकू
लता यदि च सत्यमेव तस्येदृशी दशा वर्तते ततः किमिव नोपकृतमनेन किं वा नोपपादितं कि
वानेनापरं समाने कथं वा कपिञ्जलस्य स्वप्नेऽपि वितथा भारती मया चात्राकालेऽस्मद्वदनान्निष्क्रा
मति इत्यनुभूते च किं मयापि प्रतिपत्तव्यमस्य पुनः किमभिधातव्यमित्येवं विचारयन्त्यामेव प्रवि(
श्य ससंभ्रमा प्रतीहारी मामकथयत् । भर्तृदारिके त्वमस्वस्थशरीरेति परिजनादुपलभ्य महा
देवी प्राप्तेति । तच्च श्रुत्वा कपिञ्जलो महाजनसंमर्दभीतः सत्वरमुत्थाय राजपुत्रि महानयमुप

शे०
९२

स्थितः कालातिपातो भगवांश्च त्रिभुवनचूडामणिरस्तमुपगच्छति दिवसकरः तद्गच्छामि सर्वथाभिम
तसुहृज्जनाणरञ्जनार्थमयमप्रतीक्ष्यैव प्रत्यायितनाम्बायाः प्रविशता कनकवेत्रलताकरेण प्रतीहा
रीजनेन कञ्चुकिलोकेन च गृहीतताम्बूलपटवासाङ्गरागेण चामरग्राहिणीना कुब्जाकिरातबधिरबर्बर
कमलमूकलाङ्गयानेन परिजनेन सर्वतः संरुद्धेद्धारदेशे कथमप्यवामनिर्गमः मयचो प्रत्यागतमत्स
मीपमागत्य स्वचिरं स्थित्वा स्वभवनमयासीत् तयात तत्रागत्य किं कृतं किमभिहितं किं वा चेष्टि
तं इति स्मृत्यहृदया सर्वेनालब्धयम् । गतायां च तस्यां प्रस्तमुपगते च भगवति हारीतहरितवाजि
नि सरोजिनीजीवितेश्वरे चक्रवाकसुहृदि सवितरि ह्रोलिलायमाने पश्चिमाशामुखे हृदिनायमाने
मुच कमलिनीवनेषु नीलायमाने पूर्वदिग्भागे पातालपङ्ककल्पषेण महामलयजलनिधिपयः
पूरणेनैव तिमिरेणावष्टभ्यमाने जीवलोके किं कर्तव्यतामूढानामेव तरलिकामपश्यम् । अयि
तरलिके कथं न पश्यसि हृतमाकुलं मे हृदयं अप्रतिपत्तिविक्लवानि चेन्द्रियाणि तत्स्वयमेवापि
कर्तव्यमलमस्मिन्ज्ञाने उपदिशतु मे भवती यदत्र साम्प्रतमयमेवं त्वत्समक्षमेवाभिधाय गतः ।
कपिञ्जलो यदि नावदित रकन्यकेव विहाय लज्जामुत्सृज्य धैर्यं प्रवमुच्याविनयमिति चिन्तयि
त्वा जनापवादं प्रतिक्रम्य सदाचारमुल्लङ्घ्य शीलं प्रवगणय्य कुलं प्रङ्गीकृत्याय शोगान्धर्वहृति

का॰
पू॰
९४
95

राज्ञापितनापित्रा प्रत्रमोदिता मात्रा स्वयमुपगम्य ग्राहयामि पाणिं मे गुरुजनातिक्रमादधर्मो महान्
अथ धर्मानुरोधादितरपक्षावलम्बनेन हावेण मृत्युमङ्गीकरोमि एवमपि प्रथममेतावत्तावदयमुपगत-
स्य प्रथमप्रणयिनस्तत्रभवतः कपिञ्जलस्य प्रणयप्रसङ्गभङ्गः । पुनरपरं यदि कदाचिन्मम जनस्य
मत्कृतात्प्रणयभङ्गात्प्राणविपत्तिरुपजायते तदपि मुनिजनवधविहितमहदेनो भवेत् इत्येवमुच्चा-
वचन्त्यामेव मयि नवचन्द्रोदयजन्मना विरलविरलेनालोकेन वमन्नवनराजिरिव कुसुमरजसा-
धूसरतां वासवी दिगयासीत् । ततः शिशिरकरकेसरिकरविदीर्यमाणतमःकरिकुम्भसम्भवेन
मुक्ताफलत्वोदेन धवलतामुपनीयमानमुदयगिरिसिद्धसुन्दरीकुचमुखेनेव चन्दनचूर्णराशिनेव
पाण्डुरीक्रियमाणं चलति जलधिजलकल्लोलानिलोल्लासितेन वेलापुलिनसिकतोत्क्रमेनेव पा-
ण्डुरतामुत्थाप्यमाने पश्चिमेतरसिन्धुधाम्नादिगन्तरमद्युतत् । शनैः शनैश्चन्द्रदर्शनान्मन्दमन्द-
स्मितानादधानमभेव ज्योत्स्नानिष्यन्दिनी निशामुखशोभामकरोत् तदनु रसातलादवनीमवधार्य
उद्धतशेषफणामण्डलेनेव रजनिकरबिम्बेनाराजत रजनी क्रमेण च सकलजीवलोकानन्दकेन
कामिनीजनवल्लभेन किञ्चिदुन्मुक्तबालभावेन मकरध्वजबन्धुभूतेन समुपारूढरागेण स्फुरतो-
त्सवोपभोगैकयोग्येनामृतमयेन यौवनेनारोहता शशिना रमणीयतामनीयत यामिनी । प्रथमतम

पु॰
९४

त्वासन्नसमुद्रविद्रुमलताप्रभापटलितमिवोदयगिरिसिंहकारतलाहतनिजहरिणशोणितशोणी
कृतमिवातिकलङ्करूपितरोहिणीचरणालक्तकरसालाञ्छितमिवाभिनवोदयरागलोहितं रजनि
करमुदितं विलोक्यात्रं ज्वलितमदनलान्धकारितहृदयानरालिकोन्मत्तः विधुतशरीरापि मन्मथहस्त
वर्तिनी चन्द्रागतनयनापि सुहृत्तममालोकयन्ती तल्लक्षणमचिन्तयं । एकत्रएव नूतमदनमथ्यमासमल
यमानननप्रभृतयः समस्ताः एकत्र चायं पापकारी चन्द्रहतकोन शक्यते सोढुम् इदमतिदुर्विषह्य
मदनवेदनातुरं मे हृदयं अस्य चोद्गमनमिदं सदाहज्वरग्रस्तस्याङ्गारवर्षः प्रीतानां तस्य तद्धारया
तो विस्फोटस्तुल्लितस्य क्षतसर्पदंश इत्येवं चिन्तयन्तीमेव चन्द्रोदयोपनीताकमलवनम्लानिनीति
द्भव मूर्च्छानिमीलितलोचनामाकार्षीत् । प्रविवेश च समश्वासन्नरालिकेपनीताभिश्चन्दनचर्चाभि
स्तालवृन्तानिलैश्चोपलब्धसंज्ञानामेवाकुलालां सूतेनैवाधिष्ठिता विषादेन महल्लाटविधूतस्वच्छ
न्दकान्तमणिशलाकामविच्छिन्नवाष्पजलधारान्धकारितमुखीं सदन्तीं नरालिकामपश्यं उन्मीलि
तलोचनां च कृतप्रणामामानन्दपङ्कोद्रेण करयुगलेन बद्धाञ्जलिरवादीत् । भर्तृदारिके किं ल
ज्जया गुरुजनापेक्षया वा प्रसीद प्रेषय मां आनयामि ते हृदयदयितं जनं उत्तिष्ठ स्वयं वा तत्र गम्य
तां अतः परमसमर्थास्मि सोढुमिमं प्रबलचन्द्रोदयाविजृम्भमाणोत्कलिकासनस्मृदधिमिव मकर

का॰ हे॰ ५५

95

विघ्नमित्येवंवादिनीं तामहमवोचं उन्मत्ते किमनेनैवमुक्ते सर्वे विकल्पानपाहृत्यस्तोपायदर्शनान्तु
त्मारयन्त्सर्वांस्त्वरयन्त्सर्वाः शंकास्तिरस्कृत्य लज्जामन्तर्गलयन्त्वयमभिरामनलाघवदोषमाहृ एव
न्कालातिपातेन परिहृतरत्रागत एव मृत्योस्तस्यैव वासकामानीताः कुमुदबान्धवः तन्दृन्निह यथाक
थञ्चित्कुपगतजीवितां संभावयामि हृदयदयितमायासकारिणं जनमित्यभिदधाना मदनमहो
हितविलीनकनकशृङ्खलायोगेनेवयतामुन्मुग्रनतीवेन्द्रायकथेपत्रलेखा निवेदितचन्द्रा
पीडगमना चन्द्रोदयोह्लंवसिनी वेलेव महोदधेः मकरध्वजाध्यासीकृत्य महाश्वेतादर्शनमा
नापित्रोः पुनः प्रतिपन्नस्पृक्कारवेशाभरणारणानूपुरेण प्रवरमेखलाकलापेन रम्योज्ज्व।
लाकलापेन विकसितानङ्गबलविभ्रमेन घ्राणहृतसुरभिमाल्यानुलेपनपटवासाद्यु।
पकरणेन नातिबहुना मम परिजनेनानुगम्यमाना पुनः केयूरकेणोपदिश्यमानमार्गा पत्रले
खाहस्तावलम्बिनी मदलेखया सह कृतालापा मदलेखे पत्रलेखा कथयतीत्यन्यदेहे तन्न
स्यैकान्तनिष्ठुरहृदयस्य प्राणमनेनिर्घृणस्यागमनमेव नश्चहृथे किंन स्मरसि तत्तदस्य मद
वस्याम गृह्दानस्य हिमगृहके मुहित्वसम्भाय तु विदग्धग्रदवैकान्तभाषितं यत्र सास्मिनमा
लोकितया त्वयैवास्मै स्तनतामेव सम्प्रायकारिमन्त्र दत्तं नदसौ मरणेपि मेघदात्यवमाम

वस्यां । अन्यच्च यदिदमदर्थे दुःखमियमत्रभवती त्येतदस्य चैनस्य भविष्यन्न दातयागमनमेव ना।
कारिष्यत् तदागतोऽप्यसौ यत्किमपि वक्तव्यं तत्त्वयैव मयापुनर्हृदयेनापि नलपितव्यो नोपालब्धव्यो
नचरणपतितस्याप्यनुनयो ग्राह्यः नाहं प्रियसख्या प्रसादनीयेत्यभिदधानैवा चेति नागमनखे
दाकादम्बरी चन्द्रापीडदर्शनायोन्नामयता चेन साजगाम । आगत्य चोद्धृतामृतमिव रत्नाकर
मिन्दुविहितमिव निशाप्रबन्धमस्तमिततारागणमपचितफलकुसुमशोभामिवोपवनमुत्तवा
नकर्णिकामिव कमलमुत्तरवाङ्कुरमिव मृणालमवलूनतरलमणिमिव च हारमुन्मुक्त
जीवितं च चन्द्रापीडमद्राक्षीत् । दृष्ट्वा च सहसा किमेतदिति उथ्याथवतलमायान्ती कथंकथ
मपि मुक्ताक्रन्दया मदलेखया धार्यत पत्रलेखयाप्यनुकम्प्य कादम्बरी तथैव मूर्छेव निस्त्र
लस्तब्धदृष्टिराविष्टेव स्तम्भितेव निष्प्रयत्ना निःश्वसितमपि विस्मृतेवान्नमन्दभागा निस्पन्देव
चन्द्रापीडवदनमन्दानिलताडी यथामाकृष्यमाणनना यदृहापरक्तेन्दुबिम्बेव पौर्णमासीनिशानिशान
परशुपातोत्कम्पिनीलतेव वेपिताधरा किसलया बालालिलिखितेव स्त्रीस्वभावविक्लवेन चेतसा
तस्थौ । यथास्थितान्ता नाम्नुक्रान्तेनादासमपादपतनं मदलेखाब्रवीत् । प्रियसखि प्रसी
दोत्सहजे मे मन्दसभाग्यायादिव बाष्पमोक्षणे क्रियमाणे नियतमतिभरोन्मीडितेन शोकामि

व सरसमङ्ग सहस्रधा स्फुटति ते हृदयमिदं अपेक्ष्य देवीं मदिरां देवं च चित्ररथं त्वया विना ।
कुलहृदयमपि तन्नास्तीत्युक्तवती मदलेखा विहस्याब्रवीत् । अप्युक्तमत्र केऽजतोसि मेवञ्च सा
रकाठिनस्य हृदयहृन्तकस्य स्फुटनमालोक्यैव यन्न सहस्रधा स्फुटितं । अपि च । या जीवति
तस्याः सर्वमिदं माता पिता बन्धुरात्मा सखी परिजन इति मयाऽप्यनिन्द्यमाणाया कथं कथम
पि समाश्वासितं प्रियशरीरं यज्जीवदजीवद्वा सम्भोगेनात्र मरणेव वाञ्छितापि सर्वदुःखानामु
पशान्तये न त्विति देवेनागच्छता मदर्थं प्राणात्रसृजता हृदयमारोपितं अस्मृताचनीत मा
त्मानमस्त्रपानमात्रेण लघुह्वानत्ययानयामि कथं च स्वगमनेनान्यस्य देवस्य तद्दिने नामङ्गलं
करोमि कथं वा पादधूलिरिव पादावपगम्य रचयता हर्षस्थाने रोदिमि किं मे दुःखमिदमेव
विधे अधन्ना मे सर्वाणेव दुःखानि दूरीभूतानि किमपि कथ्यते यत्प्रियदर्शनं कलङ्कमोनाराणा
नः नापेक्षिताः गुरवः धर्मो नात्रसृष्टः जनवादान्न भीतं लज्जा परित्यक्ता मदनोपचारैः सखी
जनं वेदितं दुःखिना मे प्रियसखी महाश्वेतानातस्याः कृते मया निज्ञानमन्यथा मयैवान्यैनदपि चे
तस्मिन्कृते तस्मिन्मदर्थमेवोक्तं न प्राणे प्राणेश्वरी प्राणान्यत्र पालयन्ती त्वयैव किमुक्तम
स्मिन्नसमये मरणमेव सर्वप्रकारेण लज्जाकरं जीवितं अन्नमरणमेव न यदि मम मोपरि स्नेहः

का॰
द्वे॰
१८८
188

करोषि वा मत्प्रियेष्वाहितं च नदात्मनि स्नेहमारोप्य तथा करिष्यसि यथा न तातो ऽम्बा च न महाशोका
दात्मानं परित्यजतः यथा च मया वाञ्छितं मनोरथं त्वयि स्थरयतः येन परलोकगताया ऽपि मे
जलाञ्जलिदायी पुत्रको भविष्यति यथा च मे सखीजनः परिजनो वा न स्मरति वा शून्यं वा मद्भ
वनमालोक्य न दिशो ऽश्रूणि तथा करिष्यसि पुत्रीकृतस्य मे ऽङ्गनसहकारपोतकस्य तया माद्वि
त्रिनयैव माधवीलतया सहोद्वाहमङ्गलं स्वयमेव निर्वर्तनीयं मच्चरणतललालितस्य बाला
शोकविटपस्य कर्णपूरार्थमपि न पल्लवः खण्डनीयाः हस्तसंवर्धिताया मे मालत्याः कुसुमा
नि देवार्चनायैवोच्चेयानि वासभवने मे शिरोभागे निहितः कामदेवपटः पटनीयः स्वयं स्वयं रो
पिताश्च मे चूतलिका यथा फलं बध्नन्ति तथा संवर्धनीयाः पञ्जरबन्धदुःखाद्वराकी कालिन्दी शा
रिकाश्च कश्च परिहासोऽद्यापि मोक्तव्यौ । मदङ्कशायिनी नकुलिका स्वाङ्क एव शाययितव्या
पुत्रको मे बालहरिणकस्तरलः कञ्चित्तपोवने समर्पणीयः पाणिद्वयसंवर्धितं मे जीवञ्जीवक
मिथुनमनाथं यथा क्रीडापर्वतकेन विपद्यते पादसंचारी हंसमिथुनो यथा न हन्यते केनचिद्
परिचितेह वसति एवमेव तपस्विनी बलाद्धिधृता वनमानुषिका वन एवोत्स्रष्टव्या क्रीडापर्व
तकः कस्मैचित्प्रशान्ताय तपस्विने प्रतिपादयितव्यः शरीरोपकरणानि च मे ब्राह्मणसात्कर्त

श्रे॰
१८८

यानि वीणापुनरात्मन एवाङ्कः प्रणयिनी कार्या परमपि यत्नेरोचनेन तदपि स्वीकर्तव्यं ग्रहं पुन।
रिमं ग्रन्थनाकिरणरश्मिभिः स्नानपानचन्दनचर्चाभिरनवरतधारागृहासारसेकैरेकमत्रान।
नह्निनकरनिकरनारकिननारद्वारार्पणैः मणिदर्पणप्रणयनेन मलयजजलार्द्रपद्मिनीपत्रा
स्तरणेन मरसकिसलयप्रस्तरैरकठोरमृणालनालतल्पकल्पनयोद्दिकास कमलकुम्
दकुवलयशायनैस्तुदग्य शोषप्रज्वलेचिताज्वालामालिनि देवस्य कण्ठलग्ना निर्वापयाम्या
त्मानमित्यभिदधानैव कृतविधारणाग्रबन्धान्मदलेखामवष्टभ्योपसृत्य महाश्वेताकण्ठे
गृहीत्वा निर्विकारवदनैव पुनरवादीत् । प्रियसखि कोहमपि न वास्मि प्रत्याशायथात्रराग
परवशा पुनः समागमाकाङ्क्षिणी तृणेतृणे मरणाभ्यधिकानि दुःखान्यनुभवन्ती जीवितम
लज्जाकरमशोच्यमनुपहसनीयमवश्यं धारयामि । मम पुनः सर्वतोहताशायाः सा नास्ति
नदामेत्रये प्रियसखी पुनर्जन्मान्तरसमागमायेत्यभिधायोत्सृज्यमानपुलककेसरोद्भासित्य
सममसाधु मानिलोल्कम्पोत्तरं चोत्पद्यमानानन्दवाष्पवेगोत्तरलासङ्गच्छत्स्वेदमकरन्दबिन्दु
विष्यन्दिनी मुकुलायमाननयनकुमुदाकुमुदिनीव चन्द्रापीडचन्द्रास्तमयविषण्णानदवस्येपि
हृदयेवल्लभसमागमसुखमिवानुभवन्ती सरभसमुपरिपर्यस्ताविजगद्दृस्ताद्धात्रेक्कसमति

का॰
दे॰
१८९
189

वहेन मूर्ध्नि चुम्बयित्वा चन्द्रापीडचरणौ स्रवन्त्येवामृतमिव वार्द्राभ्यां पाणिभ्यामालिङ्ग्याङ्केन धृत
वती । अथ तत्करस्पर्शेनोच्छ्वसितमिव चन्द्रापीडदेहतो उद्गतं तुहिनमयमिव सकलमे
वनप्रदेशमूर्ध्वदृश्यमानरूपं किमपि चन्द्रधवलं ज्योतिर्दिवमुज्जगाम । अनन्तरं चान्तरिक्षादुत्त
द्रीवामृतमयशरीरा वागश्रूयत वत्से महाश्वेते पुनरपि त्वं मयैव समाश्वासितासि तेन तत्पुण्डरीक
शरीरं मल्लोके मत्तेजसाप्यायमानमविनाशमेव त्वत्समागमाय तिष्ठत्येवेदं अपरं मत्तेजो
मयं स्वत एवाविनाशविशेषतो मनाकादम्बरीकरस्पर्शेनाप्यायमानं चन्द्रापीडशरीरं शाप
दोषाद्वियुक्तमात्मना कृतशरीरसंक्रान्तेर्योगिन इव शरीरमत्रैव भवत्योः सम्प्राप्तिपर्यन्तं मास्म
परित्याजयतां नैतदग्निना संस्कर्तव्यं नोदकेन वा क्षेप्तव्यं नोत्सृष्टव्यं वा यत्नेन परिपाल
नीयमासमागमप्राप्तेरिति । तां श्रुत्वा तु किमेतदिति विस्मयाक्षिप्तहृदयाः सर्व एव गगन
तलनिवेशितनिर्निमेषदृष्टयो लिखिता इव पत्रलेखावर्जमतिष्ठन् । पत्रलेखा तु तेन तस्य
ज्योतिषः स्पर्शेन शीतलेनाह्लादहेतुना स्पर्शेनालब्धसंज्ञा सत्वराया आविष्टेव वेगाद्धावित्वा परिव
धकहस्तादाक्षिप्य इन्द्रायुधमस्मात् स्थितासनात् यथावस्थानमेव प्रनवेवमेकाकिनी विना
वाहनेन हरं प्रस्थिते देवे त्वरमाणा माऽपि तिष्ठन्तमसत्याभिधाय तेनैव सहात्मनमच्छोदसरसि

गो॰
१८९

द्विपत् । अथ तयोर्निर्मज्जनसमयानन्तरमेव तस्मात्सरःसलिलात्क्षेवालोत्करमिव शिरसि
लग्नं गलज्जलबिन्दुसन्दोहमयथालम्बिदीर्घशिखावशेषपरिपरम्परामज्जरसंस्कारमलिनत
याचोपस्थितचिरोर्ध्वबन्धजटाकलापमग्रहस्तलग्नलाइदेहासनेन बिसतन्तुसञ्चयेनेव
वक्षस्थलेणोद्भासमानोऽस्त्रमालामरबिन्दिनी पलाशाषष्टमाएष्टुना जीर्णमन्दारवल्कलेनाबद्ध
परिकरः करेणाननावबोधिनी जटाः सशस्त्रसारयन्नस्तसलिलेनाच्छोदसरःसलिलमिवा।
न्नः प्रविशमानान्नायतनाभ्यां लोचनाभ्यामुद्धहन्नपि विग्रहकृतितप्तायसम्भ्रमारकः सहृत्सेवोद
तिष्ठत् । उत्थाय च हस्तेनपवोद्भासमवाष्पजलयाम्याबद्धलग्नया दृष्ट्या विलोकयन्ती महाश्वे
तानस्त्रुपसृत्य शोकगद्गदमवादीत् भगवन्कपिञ्जल वे वियात्वद्गुमण्डपसुमवती यात्वया।
घ्यात्मनः कारणादेव सम्भाविता अथवा कान्तेवेयमीदृशी मयानान्मज्ञायो सम्भावनाया
हमेकाकिन एव व्यामोहहृता स्वर्गेऽपि च देवे पुण्डरीके जीवामि तत्कथयके नाऽसाबुत्ति
प्तनीतः किमर्थं वा किं वा तस्य वृत्तं क्व वा वर्तते किं वा तवोपजातं येनैतावता कालेन वा नाम
पि न दत्तवानसि उतो वा त्वमेकाकी देवेन विना ह्यागतोऽसि इति । सत्वेवं पृष्टो महाश्वेतया
विस्मयोत्फुल्लेनकादम्बरीपरिजनेन चन्द्रापीडानुगामिना राजपुत्रलोकेनोपर्युपरि पतिताऽवी।

का॰ दं॰ १९॰

190

दृश्यमानः प्रत्यावदीत् । गन्धर्वराजपुत्रि श्रूयतां । अहं हि तनयाह्यनार्त्तप्रलापामपि त्वामीकाकिनी
मन्तर्हृदयव्यथस्य स्नेहादाबद्धपरिकरः क्व मे प्रियसुहृदमपहृत्य गच्छसीत्यभिधाय तेनाहमनुब
भ्नन्जवेनोत्पतते । सततमेव प्रतिवचनमदत्त्वैव गीर्वाणवर्त्मनि विस्मयोत्फुल्लदृष्टिभिः अवलोक्य
मानो वैमानिकैरेव गृहीतस्त्रीभिरभिसारिकाभिरलोलतारकेक्षणाभिर्वितन्यमानः प्रणम्यमान
स्तारकाभिरम्बरसरः कुमुदाकरेणाराणामतिक्रम्य चन्द्राभिरामसकललोकं चन्द्रलोकमगा
त् ॥ तत्र च महोदयाख्यायां सभायां चन्द्रकान्तमये महति पर्यङ्के तत्पुण्डरीकमवरोप्यायमयि
त्वा मामवादीत् । कपिञ्जल जानीहि मां चन्द्रमसमहं एवमूर्ध्वदयतो जगदनुग्रहाय स्वव्यापा
रमनुतिष्ठन्ननेन ते प्रियवयस्येन कामापराधाज्जीवितमुत्सृजतानिरपराधः शप्तः । दुरात्म
न्निन्दुहतक यथाहं त्वया करैः संताप्योत्पन्नानुरागः सन्नप्राप्तहृदयवल्लभासमागमः प्राणैर्वियो
जितः तथा त्वमपि कर्मभूमिगतोऽस्मिन्भारते वर्षे जन्मनि जन्मन्येवमेवोत्पन्नानुरागोऽप्राप्तसमाग
मस्त्वमीक्षन्ततीव्रहृदयवेदनो अनुभूय जीवितमुत्स्रक्ष्यसीति । अहं तु तेनास्य शापेनाकुलभुजा
ङ्गिगास्त्रदीपित इव निवसन्निकमर्थमनेनात्मदोषान्धेन निर्विवेकबुद्धिना शप्तोऽस्मीत्युत्पन्नकोप
स्त्वमपि मत्तुल्यसुखदुःखो भविष्यसीति प्रतिशापमस्मै प्रायच्छं । अपगतामर्षस्तु विवेकमारा

मो॰ १९॰

तया ब्रह्मा विसृष्टा तन्महाश्वेता मन्मथस्य सम्भवादप्सरसः कुलाल्लब्धजन्मनि गौर्यामुत्पन्ना तथा चा
येस्त्वयेद्य्यन्नोनेन सम्प्राप्तिस्त्वयैक्तदादेवशापदोषान्मया सह मर्त्यलोके वासेद्ध्यमेव सम्प्रत्यत्र
व्यमन्यथाजन्मान्तिजन्मनीत्येषा वीक्ष्यैव चाविनार्थाय न भवति तदयं यावच्छापदोषो व्यपैति ताव
दस्यात्मना विरहितस्य शरीरस्य मा विनाशोऽभूदिति मयेदमत्र निक्षिप्तानीतं । वत्साच महाश्वेता
समाश्वासिता तदिदमत्र मन्त्रैर्जप्याप्यायमानमाशापदघातिन्यं तमथ कन्यातां गत्वा तस्य देहस्ता
न्वेष्टेन केन वे निवेदय महाप्रभावोऽसौ कदाचिदत्र प्रतिक्रियामपि कांचित्करिष्यति इत्युक्त्वा
माविसर्जयत् । ग्रहत्तविनाहृतनोवयस्येन शोकवेगान्धा गीर्वाणावर्त्मना थावत्तन्यत्तममति
कोथन वैमानिकमलङ्घयम् सत्तमां निर्दहत्विव रोषकृत भ्रजाभ्रकुटिविकरालेन चक्षुषा नि
रीक्ष्यब्रवीत् । दुरात्मन् मिथ्यातपोबलगर्वितैर्विमानितिवितीर्णोऽपि गगनमार्गोपधत्त्वयस्मै उद्दा
मचारिणा त्वया मेनैवोल्लङ्घितस्तस्मात्त्वरगाप्यवभूत्वा मर्त्यलोके वहेति ग्रहत्तनसन्ध्याप्युपक्षा
कृताञ्जलिरवद । भगवन् वयस्यशोकान्धेन तत्त्वमयोपलक्षितो नावज्ञाता तत्प्रसीदः
पसंहरमेशापमिति सत्तमांऽपुनरवादीत् । दत्तापघसम्प्राप्ति मयानान्यथाभवितमर्हति
तदेतत्तत्करोमि कियत्तमपि कालं यस्यैव वाहनत्वमुपयास्यसि तस्यैवावसाने स्नात्वा वि

गन्तव्यायोर्भविष्यसीत्येवमुक्तः स पुनरवदत् । भगवन्यद्येवं ततो विज्ञापयामि तेनापि मे प्रियव
यस्येन चन्द्रमसा सहप्रणयदोषान्मर्त्यलोक एवोत्पत्तव्यं इत्येतावन्मपि भगवान्प्रसादं करो
तु मे दिव्येन चक्षुषावलोक्य यथा तुरगत्वेपि मे तेनैवमह्वायोगेन सह समायोगो भूयादिति ।
स त्वेवमुक्तोऽनुकम्पमान इव ध्यात्वा पुनर्मामवादीत् अनया स्नेहललनया तेन ममार्द्रीभूतहृदयेन दाः
लोचितं मया उज्जयिन्याममयमप्यहं तोक्तस्यैव तारापीडनाम्नो राज्ञः सुतनिर्दर्शनेन चन्द्रमसा तनयत्व
मुपगतेऽथ वयस्येनापि ते शुकनासेन तन्मात्रिण एव शुकनासस्य तनयस्येव परमोपकारिणा स्व
ह्यात्मनो राजपुत्रस्य वाहनतामुपयास्यसीति । अहं तु तद्वचनानन्तरमेवाधः स्थितेन महोदधौ न्य
पतम् । तस्माच्च तुरगीभूत एवोदपतं संज्ञातमेतत्तुरगत्वेपि नापनीयाता येनायमयास्यार्थस्य
कृते किन्नरमिथुनानुसारी भूमिमेतामुपनीतः तदेष चन्द्रमसोऽवतारश्चन्द्रापीडः योऽप्यसौ प्रा
द्युनादेवानुरागसंस्कारादभिलषन्त्वाजानन्त्या त्वया पापया शापेनानिर्दग्धः सोऽपि मे वयस्यः पुण्डरीक
स्यावतार इत्येतावच्छ्रुत्वा देवपुण्डरीकजन्मान्तरेऽप्यविस्मृतमदनुरागमस्यानिबद्धजीवितं म
च्छरणमनुस्मृत्यावलोकिन्नन्मय सकलजीवलोककण्ठं लोकान्तरगतस्यापि तेऽहमेव राक्षसीवि
नाशायोपजाता दग्धप्रजापतेरियदेवनिर्माणे दीर्घजीवितप्रदाने च प्रयोजनं निष्पन्नं यत्पुनः

प्रनस्तेव्यापादनेस्वयंकृत्वाचपापकारिणीकस्त्रपलाभे किंब्रवीमि कस्मैकथयामि कमाक्रन्दा
मि कमुपयामि शरणंकोवाकरोतु मयिदयां याहमधन्यात्मनैवदेवप्रसीदत्वं तदयां देहिम
तिवचनं इत्येतानन्यत्तराण्युच्चारयन्ती अपिनमन्येतज्ञेच नवापिचोत्पन्नमेव मन्दभाग्यायां म
यिवैराग्यं येनैवमापिविलपन्त्याः प्रतिवचनोददासि हृतास्यनेनैवात्मनोजीवितस्योपक्रंप
येनिर्वेदेनेस्त्रन्मुक्तार्तनादाश्चेरस्ताडनमवनावात्मानमपातयत् । कपिञ्जलस्तु तथाकृत
प्रलापांतामवादीत् गन्धर्वराजपुत्रिकस्तवात्रदोषोयेनैवमनिन्दनीयमात्मानं निन्दावादे
योजयसि । कोवाधन्यास्त्वेवमात्रकेत्रिभुवनेयेदुःखस्यावसरोयदेवेश्वचात्मानंव्यापादय
सि यदस्मसंनत्त्वयानिसृष्टं हर्षोत्कानहृदययावयस्यस्यैव समागममनुपाश्रयायथाच मा
पदोषादिदमुपनतं द्वयोरपिभवत्योःदुःखमेवमयाकथितं । अपिच चन्द्रमसोपिभारतीभव
तीभ्यांस्कृतेवतन्मयाचना आत्मनोवयस्यस्यचाश्रेयस्करोयपोकाङ्क्षबडः द्वयोरपिश्रेयसे
यदेवभवत्यङ्गीकृतं तदेवात्रबध्यतां व्रतपरिग्रहोचिततपः तपसोहिसम्यक्कृतस्यनास्तिसा
ध्यंनामकिञ्चित् । देव्यास्तुगौर्यास्तपःप्रभावादेवातिदूरासदस्मरादेरपि यावदिदंदेहा
र्थेममामादिनपदनत्वमापि नचिरात्रैवैव वयस्यस्यमेकृते निजतपःप्रभावात्पदमाप्स्यसीति

का॰
द॰
१९२

192

महाश्वेतांपर्यबोधयत् । उपशान्तमन्युवेगायांच महाश्वेतायां विषमदीनमुखी कादम्बरी कपि
ञ्जलमवादीत् भगवन्पत्रलेखया सख्यात्वया सहास्मिन्सरसि जलप्रवेशः कृतः तत्किंतस्याः
वृत्तमित्यावेदनेन प्रसादं करोतु भगवानिति । सतु प्रत्यवादीत् । भगवति सलिलपातादनन्तर
न कश्चिदपि न वृत्तान्तो ज्ञातः तदधुनाह्वा चन्द्रात्मकस्य चन्द्रापीडस्यात्मा कपुण्डरीकात्मकस्य
वैशम्पायनस्य पत्रलेखायावृत्तान्तमिति सर्वस्यैव वृत्तान्तस्यावगमनाय गतोऽहं मर्त्यलोक
त्रयस्य ज्ञानस्य श्वेतकेतोः पादमूलमित्यभिदधान एव गगनमुदपतत् । उत्पतितेचतस्मि
न्विस्मयानुवृत्तिशोकवृत्तावपि चन्द्रापीडमालोक्यालोक्य गलितनयनपयसि यथावस्थान॰
मपहृत्यास्थितवति सपरिजने राजपुत्रलोके कादम्बरी महाश्वेतामवादीत् । प्रियसखि
तुल्यदुःखतानेन यातनाचिरात्त्वल्लब्धस्नेहस्यापिनाम्नाभिभवता विधात्राशरीरः सन्त्यादि
तं श्रद्धयावदनेनेदर्शीयन्ती प्रियसखीतिभाषमाणा नलज्जेनवाप्यद्यैवाहं प्रियसखीजनालास
म्प्रतिमरणे जीवितं च न दुःखायमेतत्कोपरः प्रष्टव्यो मया केनवापरेणोपदेष्टव्यं तेनैवंगता
यायत्करणीयं तदुपदिशतु प्रियसखी नाहमात्मना किञ्चिद्वेद्मि किं कृत्वा श्रेयस्तस्कुर्व
ती कादम्बरी महाश्वेताप्रत्यवादीत् । प्रियसखि किमत्र प्रश्नेनोपदेशेन वा यदेवेयमनतिक्र

गं॰
१९२

मरणीयाप्रियतमसमागमनप्रत्याशा कारयति तदेव करणीयं प्रणडरीकहस्तात्रस्यापकपिञ्जले
न स्फुटीकृतः तदत्र वागाश्वासकेनैव समाश्वासितया मयानपारितमन्यत्किञ्चिदपि कर्तुं त्वम
न्यत्करोषि यस्मात् मन्ये यस्यानमिदं चन्द्रापीडशरीरमङ्क्षु पवासते । तदन्यथात्वस्य करणीया
विज्ञायावदिदमविनाशितिष्ठति तावद्देवनवज्ञस्यात्र वृत्तिश्रुत्वा किमन्यत्करणीय । अ
प्रत्यत्वाण्ण हि देवतानां सुदृषमकाष्ठादिमय्यः प्रतिमाः श्रेयसे पूजापुरस्कारेणोपचर्यन्ते
किं पुनरियं प्रत्यक्षादेवस्य चन्द्रापीडनाम्नारिनस्य चन्द्रमसो मूर्तिरनाराधितमसत्रेस्तुक
वत्याता महाश्वेतनायाताम्मीमेवोत्थाय तरलिकयामदलेखयाच सहोत्थापिताम वेदाहृत्य च
न्द्रापीडतत्रमन्यस्मिन् शीतवातातपवर्षादिसर्वदोषस्तृन्ये शिलातलेशानैरवेदयन्नोत्स्याप
यित्वा अपनीतसूक्ष्मावशेषाग्रहणामेसगलमात्रकावस्थापितैककरशोभाभूषणा स्नाता अ
चिरंभुत्वा परिधायधौतश्राचीनांशुकूले मन्दालयपुनः पुनर्गाढलग्नमथवाकेसलय [illegible] ।८
[illegible] वाष्पधारातरलिततलोचना अन्यदेवाकिमप्यचिन्तितमत्रमन्त्रावितमनभ्यु
सिमनगापतनसूपबलाहालाविलोमप्रकृतिनालीक पाण्डुतेनदग्धवेधसा कार्यमाणयान्ये
वमङ्गविभ्रमसमधूपाल्लेपनानि मुरतोपभोगायानीतानि नैवेद्य देवतार्चनासपर्याचित्ते समुपाय

का०
द०
१९३
193

चन्द्रापीडमूर्तौ मूर्तिमतीव शोकवृत्तिरात्तरूपा रूपान्तरमिव तत्क्षणेनैवोपगता गतजीवितेव सुस्तना
मुखोन्मुखावलोकिनी चन्द्रापीडस्य पीडास्योडीकृतहृदयापि दूरवर्त्ती बाष्पमोक्षमहामहत्तेः शो
कादपि मरणादपि च कष्टतरामवस्थामनुभवन्ती तथैवाङ्के समारोपितचन्द्रापीडचरणद्वया
हृदयान्नमनागपि विचलितेनापि भ्रूभृकुटितेनापि श्रमनिपन्नस्नानभोजनेन मुक्तात्मना राजपुत्रलोकेन तस्य
परिजनेन सह निराहारैव तं दिवसमशेषमनयत् । यथैव च तं दिवसमशेषं तथैव तां गम्भी
रमेघघोषरोधभीमामनवरतगर्जितधानकम्पितहृदयबन्धामाबद्धकलकलकलापिकुलके
काकोलाहलाकुलितचेतोहृत्प्रहासमनुरागरहितविधवितस्रोत्रेन्द्रियानुदर्शननवतताडि
तस्मयानपीडितहृदयमशानिनिर्ह्रादनर्जिनापादितभुवनज्वरां ज्वलत्खद्योतनिकरजर्जरितनव
हलतमः प्रसरभीषणतमां तमस्विनीमपि हरीकृत्य बलाबलात्सहस्रभुवं भीतिमपवित्य च चन्द्रा
पीडचरणकमलाचेतितस्वशरीरावेदाजागरती समपविष्टेव क्षणमिव क्षपितवती । प्रातश्च
तदुन्मीलिते चित्रमिव चन्द्रापीडशरीरमालोक्य शनैः शनैः पाणिना स्पृशन्ती पार्श्वस्थितां म
दलेखामवादीत् । मदलेखे न वेत्सि किं सचेव शान्ततनिर्विकारतयैवेत्यन्ततनाहृशीमेवेर
मीतत्त्वमावलयामि तत्क्षमपि तावदादरतो विलोकयेत्यस्त्वा तमदलेखानामन्यवादीत् ।

गे०
१९३

प्रियसखि किमत्रानिरूपणीयं अनुगतात्मनो विरहव्यापारमात्रकमस्यापहृतमन्यत्तादृशमेवे
दमशेषं कपोलाद्याकारसौन्दर्यं स्निग्धावर्तं यथा तथैवायं वदनाश्रयभागः स्निग्धकुन्तलकलापः त
थैवेयमिन्दुशकलाकारिणी कान्तिर्ललाटस्य तथैवेदमाकुञ्चितनीलोत्पलयुगलमिव
कर्णान्तायतं लोचनद्वयं तथैव चेदमाबद्धमनोऽपि मद्दृष्टिमिनाविवोल्लासितकपोलमूलो ह्याधि
माद्रौ तादृशापवचायमम्लानकिसलयच्छविरधरस्तथैवेदं विद्रुमलोहितनखाङ्कुलित
लं पाणिपादं तदेवेदमविगलितसहजलावण्यसौकुमार्यं गात्राणां सौष्ठवं तदस्त्यासा
भावती कापिञ्जलोऽस्य शापहृतात्रस्थेति सम्भावयामीत्युक्तवत्या मदलेखया मानेदं निभ
रा महाश्वेतायै दर्शयित्वा चन्द्रापीडस्य चरणतलनिबद्धजीवितनाय राजपुत्रलोकायापि दर्शितं
वती सत्त्वविस्मयोत्फुल्ललोचनः सर्वएवावनितलनिवेशितशिराः प्रणम्य चन्द्रापीडचरणौ
स्थित्वा कादम्बरीमज्ञापयत् । देवि त्वत्प्रभावोऽयं देवमस्मान् प्रापितः परित्यज्य हृद्गते
स्यापि देवस्य तादृशमेव प्रसन्नमिन्दुमण्डलयुक्तनिद्राविवदनमीक्ष्यते । तथैवेदं चरणाक्र
गलमविकारि प्रणम्यते तथैव च मनःप्रसादोऽत्रभवमत्यापालालसं हृदयमन्यदेव तन्मा
त्रकेषु केन कदाचिदाहृष्ट स्फुतमत्र भूतं वा यदस्माभिर्निर्जीवस्य देहस्य सजीवलिङ्गानि दृश्य

भिहितवति राजपुत्रलोके ससखीजना सपरिवारा च कादम्बरी स्वयमेवोत्थितानांचेन क्रमसमास्त्वं
त्वा निर्वर्तितचन्द्रापीडचरणस्नानसंस्कारा शरीरस्थितिकरणायादिदेश सकलमेव राजलोकं
निर्वर्तितस्नानाशने च तस्मिन्नात्मनापि महाश्वेतोपनीतानि तथैव सपरिकराफलान्युपयाते
वती कृताहारा च पुनस्तथैव चन्द्रापीडचरणावङ्के नोद्वहन्ती तमपि दिवसमनयत् । अन्ये
द्युश्चोपजातहृज्जनरमत्यथा चन्द्रापीडशरीराविनाशप्रतिमदलेखामवादीत् प्रियसखि देव
स्य शरीरमिदं सम्यगुपचरन्तीभिरवश्यं शापापगमयावत्स्थातव्यं । तदिदमस्मद्वृत्तं त्वत्रा
त्रैतानयाम्बयैव च गत्वा निवेदय येनान्यथा मा न सम्भावयतः दुःखमदर्शनेन तिष्ठतः यथा वा
मामेवंविधां दुःखभागिनीमागत्य न पश्यतः तथा करिष्यसि न शक्नोम्यहं तातानम्बां च द्रष्टुं
शोकावेगं धारयितुं यथा चोपवनमपि देवमालोक्य न कुथितं सा किमर्थमथत्ना निःसमायित
जीवितव्ये देवे प्रतिपन्ननियमा रोदिमीत्यभिधाय च तं विसर्जयत् । गतागतयाचनया प्रियस
खि सिद्धं तेभिवाञ्छितमेव सन्दिष्टं तातेन चित्ररथेनाम्बया वा मदिरया गाढं गाढं पुनरालिं
ग्य शिरस्युपाघ्राय च वक्तव्या वयोवचनाद्वत्सा । कालमेतावन्तं मनस्येव नैतदावयोरा
सीद्यथा जामातृरहितावत्सा द्रक्ष्यतीति । तदद्यमेवावयोः परमश्चानन्दो यद्वत्सायाः स्वयं ज्ञा

तावृतः तत्रापि अवसरे भगवतो लोकपालस्य चन्द्रमसोऽवतारः तद्दर्शनादेव शापावसाने जा
मात्रैव महानन्दबाष्पनिर्भरमाननारविन्दं द्वयावप्यावेदिते निहितेनान्तरात्मना देवेन व
द्यपचरन्तीं तं चन्द्रापीडशरीरमतिष्ठत् । अथापगतवति जलदसमये वननिरोधाद्वन्त्यादि
व निश्शङ्के जीवलोके प्रसरन्तीषु शरत्सु फलभारावनम्रकमलवनपिञ्जरासु ग्रामसीमा
स्वङ्काशधवलास्वरण्यस्थलीषु सेव्यतामुपगतेषु वप्रपादतलेषु कल्हारहारिषु जरस
मामोदपीनलासु यामवतीषु शेफालीपरिमलवाहिषु निशावसानमारुतेषु सहचन्द्रप
ह्लमानेषु नमेषु हासप्रफुल्लेन्दीवररजोवाससुरभिषु सलिलापसरणाक्रमनवेगमानेषु पाण्डुर
षु स्फुरमारुतीरसेकतन देवाम्रवल्लीच्छन्नानामापन्नास्वापगासु पङ्कपरिहरणाक्षेषु तिसृ
ष्वापक्छन्नेषु मन्दायमानकर्दमोद्धियमानाभिनवपदवीकेषु पुनरपि पान्थलोकेन प्रवर्तित
नेषु प्राग्जलवर्त्मसु जम्बालविरामात्सर्वतस्तरङ्गाढ्ये सहृद्यासु सज्जानासु भूमिषु कदाच
न्द्रापीडचरणमूलोपविष्टां कादम्बरीमुपसृत्य मेघनादो व्यज्ञापयत् । देवि देवीयुवराज
स्त्रियसन्तोत्सवनाम्ना देवदेवेन तारापीडेन देव्या विलासवत्या शुकनासेन च वार्त्ताःप्र
प्रेषिताः ते च देव्याः प्रवत्ते शोकमाल्यं वहन्तो परिहरन्ति यथावृत्तं सर्वमाख्यायास्माभिर्विभ

का॰
उ॰
१९५
195

हितः भवन्तं च प्रहिण्वता देवेन चन्द्रापीडेन न किञ्चिदपि सन्दिष्टं नापि देव्याः कादम्बर्या नन्दकेन
विलम्बाय प्रगल्भा हृद्रामखिललोकार्तिहरावनिततलक्ष्ये देवदेवाय नारायणाय यावेदयन्त्य
भिहिता स्तने अस्मानमनुनिर्भर्ताः प्रत्यवदन् यथा भवद्भिः कथितं तत्र यातिष्ठत तावत् क्र
मागतस्नेहो भक्तिरनुवृत्तिर्वा कार्यगौरवं कृत्वाज्ञातकुलमेव देवाय लोकनं प्रतिबलात्कारय
त्यस्मान् । यदि च भवतामपि वार्तामात्रकोपलभ्यप्रवायमर्थः ततो कथ्यतेस्माकं भवद्भिः
समुपलभ्य प्रतिनिगमनमथ चोत्तरयनविषयगामी तदा वयमपि तेनाहृष्याप्रवके ष्वणपकर्मा
णोद्येन प्रसाद्य देवं अस्माभिरपि चिरन्तनं चरणपरिचर्या देवस्य पवित्रितप्रवात्मा अस्माक
मपि सर्वदा दर्शनगोचरावस्थानेन प्रसादं कृतवानेव देवः किमद्य ज्ञातेनैव देवस्य पादार
विन्दवन्दनाप्रसादेन संविभज्य विसृज्यामहे तएव वयं पादलग्नाः स्वावरणैरेव तद्विज्ञाप्य
देवीं देवस्य कथं राज्ञस्य पादप्रणामेनास्माकं सफलयतु भवानागमनपरिश्रमं । अन्य
थाभ्रमिमेतावतीमागत्य सम्भवे सत्यप्रत्यादिष्टकवराजशरीराः सन्तो देवदेवेन तारापीडेने
व सृष्टाः वयं किमस्माभिर्देवो विज्ञापित इत्यावेदिते देवीप्रमाणमिति विज्ञाप्य तूष्णींस्थि
तवति मेघनादेन कालसमुचितेनानाश्वासमश्रुजलवेल्लव्या विनीयमानेव सख्या अत्र:

गे॰
१९५

मञ्चितं वाष्पं आकुलनयनतारकाभ्यामापिबन्तीव विलोचनाभ्यामक्रन्दन्दिकारणमाणकण्ठी क
थंकथमपि कादम्बरी चिरात्तस्त्ववाच । अस्थान एव ह्रिणैर्गमनमङ्गीकृतमनालोक्य देवमेव
मेव यातः सत्त्वः किमुच्यन्ताम् । अपि च वृत्तान्तमेवायमेवं विधो लोकातीतो यत्रावलोकने
नापि न सम्प्रत्यय उत्पद्यते किं पुनरालोकनेन परं चैकेनैव मात्रकोपदर्शितफलाभावो वल्लभत
मञ्जीवितावयमपि तावत्त्यपयामः तदनयोर्हितप्राणहृत्तयः स्नेहस्य भाविताः समुत्थानय
स्यन्तीत्यघटमानमिदं । तदपरिलम्बितं प्रवेष्टव्याः पश्यन्तु देवं सफलयन्त्वागमनम विश्रमेण
साधं लोचने तावत्तन्तोयास्यन्तीति आख्यातानन्तरं मेव नातेन प्रवेशितानन्तरमेव समं वाष्पपातेन
पञ्चाङ्गालिङ्गितमहीतला चन्द्रापीडवदनविनिहितोन्मन्मान्तिभूतदृष्टौ ध्यानन्त्यहृषीश्चि
त्रमिवालोक्य कादम्बरी स्वयमेवाभाष्यत । भद्रास्त्वं परित्यज्य नामयक्रमागतः स्नेहस्य
वस्तलभः शोकावेगोयत्त्वल्वनालोचितावधि दुःखावसानमेव दुःखं तत्स्मरणभीतो भवत्त्वाम्
शोकावेगामयस्तनः सखोदकेन तस्तनः स्थितया सखे प्रत्याशयातिर्तितात् नापनान्निहृदये नदेव
वृत्तान्तं एवं विधोनकेवलमत्र निरवकाशमया शोकस्य प्रस्तूनस्य हृदभिन्न हृत्तो विस्मयस्यावसरः
किं वात्र परिबोधनादन्यत्रदृष्टं च पुनरेवानन्ततनो देवस्य वदनसम्भावनापि यादेवाह्निनानस

का॰ उ॰ १९६

म्भवति सापि सम्भाविनैव तत्कस्यनामधनावानौत्सुकमनेदेवस्यपादमूलं नचायंप्रत्यवहर्षे
प्युपरतमार्योराविनाशाद्भाग्यः प्रकाशनीयः इहप्योस्माभिरव्योदमवसि निष्टुन्नित्येनावदेवावेदनी
यं । कारणान्तरमपरतिः खल्वविनाभाविनी प्राणानांनकथञ्चिदपि प्रत्ययमुत्पादयति शरीर
विनाशः पुनः प्राणैर्विनाकृतानां दृश्यमानोप्यश्रद्धेय एवतदस्यावेदनेनहृदयस्यतमपि गुरु
जनं मरणसमये निष्प्रवर्तमाने प्रयोजनमेवनास्ति प्रत्यागतजीवितेस्वे स्वयमेवायम(
स्तुनभूतोयोगुरुजनेप्रकटीभविष्यतीति । एवमादिष्टास्ततेव्यज्ञापयन् देवकिंविज्ञापया
मो ह्वाभ्यामेवापरिज्ञानमस्यवस्तुनः सम्भवेद्गमनेनवास्मदीयेन कथनेनवा नदस्माकंतु ह
स्तेहृदयमप्येतन्नास्ति एवंराजवैशम्पायनयोर्वार्त्ताविनादुःखदुःखेननिष्ठुरता देवेनतारापी
डेन देव्याविलासवत्याशुकनासेनच संभाव्यप्रोषितानामनागमनेनहृदयेन गत्वापि चेतोद
यितंतमननयवानाश्रवणाल्लालसस्य राज्ञोदेव्याश्चायंशुकनासस्यवदुःखस्तनाडीपुत्रहीदय
वदनानिनिर्विकारवदनानामप्यवस्थानुमशाक्यमेवेति विज्ञापितेतैरेवमतादिस्वयन्त्रकाकादम्ब
रीमेघनादमवादीत् । हे मेघनाद किंनवेत्सिसंस्तुतजनस्नेहनदन्तरविनाशमिति तथापिग्रहणम
वेक्षमाणयामयैतदभिहितं इतरदपिनावत्दुःखमायाते कीदृशोभवति किंपुनरिदंमहाव

गो॰ १९६

ज्वमानसहस्रं नदेनावदयितावज्रवत्पत्रैः सहायपरः कश्चिदाज्ञेयवचः प्रत्यक्षीकृतसकल
वृत्तान्तः समग्रस्यापनायव्रजत्विति । एवमादिश्य मेघनादो व्याज्ञापयत् देवि राजलोके त्वका
कथा भृत्यवर्गोपि सकल एवायं कन्दमूलफलाशीनिस्स्वयं हत्वा स्थितो यथास्माकं मध्यादेके
नापि देवाद्विना नयनीयं गन्तव्यमिति भृत्या अपि त एव ये सम्पन्नोच विपन्नौ वा विशेषसेवन्ते स
मुन्नम्यमानाः स्तनरामवनमान्ति उपालभ्यमाना अपि न समानालापा जायन्ते स्तूयमाना नो
त्साद्यन्ते क्षिप्यमाणा नापरागे दृष्टानि उत्पद्यमाना न प्रभाष्यन्ते दृष्टाः प्रियाहिते विज्ञापय
न्ति अनादिष्टाः कुर्वन्ति कृत्वा न जल्पन्ति पराक्रम्य न विकत्थन्ते कथ्यमानेन्येनापि लज्जामुद्व
हन्ति महाहवेष्वग्रतो ध्वजमूलाल ढपन्ते जीवनाद्गुरोमरणमभिवाञ्छन्ति गृहात्स्वामिपाद
मूलेस्वर्गेवतिष्ठन्ति येषां चतस्मात्र चरणपरिचर्यायां प्रमत्तो मोहहृदयाराधने व्यसनमानताव
लोकेनवाचालता गुणग्रहणे कार्पण्यमपरित्यागे भर्तृ ये च विद्यमानेपि स्वात्मनि अस्वाधीन
सकलेन्द्रियवृत्तयः पश्यन्तोप्यन्धा इव शृण्वन्तोपि बधिरा इव वाग्मिनोपि मूका इव जानन्तोपि
जडा इव अनुपहतकरचरणा अपि कुणपा इव पङ्गव इव क्लीबा इव चाकिञ्चित्कराः स्वात्मनार्थ
मिचिंतादर्शनेन प्रतिबिंबवद्वर्तन्ते तत्सर्वमेवायमेवं स्थितो भृत्यलोकः देवस्य च स्थाने देवीवर्तन्ते

तदाज्ञापितेन क्षणमवधारयन्तु देवीत्यत्रान्तरे मेघनादस्वामिनिकानामानं कुमारसेवकमाहूय तैः सह त्वा
मर्जयत् । स्वल्पैरेव दिवसैरागमेव वार्त्तया विनोदितो स्यहं देवी चन्द्रापीडस्यैवागमनायोपयाचितकं कर्त्तु
मवन्तिनगरीदेवतानामवन्ति मातृगणमायतनानि निर्गता विलासवती देवि दिष्ट्या वर्धसे प्रसन्नास्ते
वन्तिमातरः परागतो लेखवाहकः वार्त्तेति सह सैव च सम्भ्रमप्रधाविता परिजनेन उपसृत्या मन्दवा
ष्पजलप्लवितयाञ्जलाइन्दीवरदलस्रजेव विलोचनदीर्घेन रया दृष्ट्वा चेयन्नीव चिरदृष्टः कञ्जभोग्य
दर्भनेव परिभ्रष्टबालपोतापोत्क्षिप्तमाक्षते वात्सल्येनेदं मेमन्ते वाञ्छा लादृष्टं कस्मात्क
स्यास्मिन्जनेजाना केन दृष्टः क्व वा दृष्टः कियद्दूरे वर्त्तते किं वा तेन कथितं कुशलमेव तस्य
तिष्ठत्वन्येवाश्वासितो दिनस्तनः । यथाऽदर्शनेन सङ्कुलाः प्रधावितेन नवपतिबद्धेन चोज्जयिनी
वासिना जनेनायातो लेखवाहः कियद्दूरे पवित्यक्तो भवद्भिर्दिवसैरेष क्व वा वर्त्तते क्व वा भव
द्भिर्याता दृष्टः क्व वानिकष्टेनेनातिवाहितः वाहनमात्रसाधनेन थाराथरागमः मन्ये तत्र गृह
ष्टगतस्य वहति पवासानि क्रान्तः त्वरितकपनहोत्रि किमनेन निवेदनेनापि पतत्कथय य
दर्थं मयेक्षेमाः कृतो लेखवाहेन सह सप्तोवैशम्पायनः प्रत्यानीतिवा मिलितो वास्य पत्रलेखया
सहितो मेघनादो दत्तः कथं कश्चिद्दापि सन्देशो देशवर्धनेन मेन मे मित्रमेवासावद्याप्यागमि ।

कतयैव मे विनाशाम्बलाढुलाह्नतस्य बालचापल्याद्विभेम्येव वार्त्तां प्रष्टुं जीवत्यस्तावस्यवाजिवरोऽश्व
राजेन प्रसादीकृतः प्रसीदप्रसादितानां प्रथमस्य पृथ्वीवर्मणो मातुलस्य मे वार्त्तां कथयेऽस्मभ्ये ज्ञास्यामहे ।
महानसवारैरन्नभृतः क्वचिद्रातिजपाले महाश्वपतेरश्वसेनस्य सम्यग्रोमावस्थाकां विस्मयःकृतो
स्मात्पात्रायघृष्टिनाकमपि भवता हृतेनाकिञ्चित्प्राहितमाहितभारद्रव्यवासौ एकवराजभवने दृष्टोऽभ
वद्भिः श्रीनामे भवन्तसेनः सपरिजनस्य भद्रसेनापतेर्भद्रसेनस्य सेवाव्यसनी सन्नग्नैमेस्नकमात
वर्मा नत्रैवावगलति बलाधिकृतस्य कावार्त्ता वाग्निषेणस्य रोषितस्तेनासी ज्ञासी राष्ट्रे एकवरा
जः राजकुले कः प्रसादविघ्नो वर्तमाने मान्यते वा केन वा किं लब्धमेतावद्भिर्दिवसै राजा वनक
बहवः खेल्वभिनवसेवकायाताः यात्वतावत्सर्वमेवान्यत् । येन हृष्टः सकथयन्तु शार्वसेन
सूनो वीरसेनस्य का वार्त्ता पितृकपरते प्राथम्येनेव प्रविष्टो याज्ञामात्रास्यनङ्कुःखोद्भावितप्रत्य
ग्रपातिमरणशोकया शरीरक्रियैव परित्यक्ता न वेद्म एव कथं सा जीवत्येतानि चान्यानि च प्रति
पदं पृच्छ्यमाना तान्यपदं न प्रतिवचसो नाम्ना प्रश्नयिनमस्य गर्भहृष्टीनाविष्टानि वाष्पगमनतिः
सह्याङ्गानपि पदाहृष्टि संभावितो द्यमायासितया गत्यागच्छतोच्छानमलिनतवपटस्थवाह्या
दिना संस्कारमलिनकायान्धावनोद्धद्धाधूलिप्रकमम्हर्थजान्बुजानिवाधक्के मास्माश्रयाति

का० द० १९८

198

वश्रमस्यावासानिव प्रवासस्यपदन्यासानिव दौर्मनस्यस्य समारम्भानिव च दुःखानामप्रहृतनयव
समवेतानां स्तोकस्तोकाह्लेखहारकानालोक्य पवनस्पन्दमेव माल्यगृहप्राङ्गणे स्थिता तेषामागतानायादिदे
श । अनन्तरं चानतिकालापतितदर्शनोत्पादितहृदयानङ्गःखवेगाक्षिप्तानिवोन्मत्तानिवेन्द्रियैः
दारुमयानिव च शून्यशरीराणि निर्जीवानीवोपसर्पतः प्रवृत्तान्यनन्तमीव बाष्पान्धा साध्वसस्खलित
चरणानि पञ्चषाणि गत्वा पदानि सोत्कण्ठं दूरादेव तत्प्रणाममानेवावादीत् । भद्राः कथयतामे
अवन्तस्य वार्तामात्रेणेमिदमन्यथैव कथमपि करोति मे हृदयं प्रियतमेमेवनामोहष्टोवाभवद्भिरि
त्येवं पृष्टास्तेनेसहसागतं बाष्पवेगमवनितलनिवेशितलोचनमानुः प्रणाममात्रदेशोनोनहृत्पत्र
कादिवाभिप्रायसुखमन्नमितवदनाव्यज्ञापयन् । देवि दृष्टोस्माभिः शोषं त्वितनकएव निवेदयतीत्य
भिदधतएव तान्प्रवृत्ताबाष्पप्रसरस्तीमसुवाच किमपरमयं तव पत्री स्वैर्निवेदयति । इदतःप्रभृत्यप्रहर्षा
प्रसर्पणेन प्रतिलेखमालिकाश्रुभिः शिरोभिरिव विषमदीनैर्वानतैः प्रयत्नसंवर्धिताश्रुदुःखाः
स्थितनाभ्या लोचनाभ्यामश्रु खेदमवधारणेन च हृदयेदावेदितव्यं तद्भवद्भिरावेदितमेव । हाव
त्सजगदेक चन्द्रापीड चन्द्रमुखे चन्द्रानन चन्द्रशीतलस्वभाव चन्द्राभिराम ग्रणलोचनानामा
नन्दभूत किं स्तनयेननायातोऽसि तान चन्द्रापीड पीडितानाब्रवीमि नकोपाद्यापालभमानेनयका

गं० १९८

मेनत्तव अम्बपरिलम्बं मनागपि करोमीति मे पुत्र तः प्रत्यङ्गयान्यत्र क्वाप्येवं स्यात्तं वत्स गच्छन्नेव
नेमयानेस्यहृन्त हृदयस्याशाङ्कयेतज्ज्ञाने उक्ष्कं मे पुत्र नर्म्ब्रावावलोकनं वत्सस्येति बलाङ्कतोपि मे
किं करोमि कोवात्र दोषो वत्सस्य भन्दभागधाया ममैवाः पुत्र एव विलासिना त्येतानि भवत्पुत्र एव
त्वोपि लोकेन पुत्र नमेया सहृशी पापकारिणीयस्यात्स्वमेव मकाण्डप्रवाह्वि घक्कापिनीतो विप्र
लब्धास्मि दग्धवेधसा वत्स हृदङ्गतस्यापि नेपतामि पादयोः निवर्तस्वैकवारं अम्बेत्याल
पनस्तेवदनमालोकयितुं सपुत्रकोऽपि तेनेमे हृदय ज्ञातं दुर्लभनज्ञानात्स्यैव किमात्मजन्म
नः शोचावृतेस्तत्वां शोच्यामि ममात्मानमत्र शोच्यामि उन्नयौवनाभोगहारिणी रूपशोभाप
प्रपन्नाः हा स्विदवष्टम्भधीरा प्रत्येकेन्यात्स्वेन्द्र प्रभृतामित्येवं प्रलपन्ती मामालोक्य हृदयास्थि
तो मैवं कुथाश्चेतसि पुत्र यथा मया जीवन्त्येव विलासवतीति ज्ञातं त्वया विना जीवन्त्यापि तद्दे
व नेकथं मया वदनं दर्शितं न वेद्मि किमिति प्रियतयातेकि माह तेः प्रत्ययादुत्त स्त्रीजनसह
भवो मूकभावादेवेन्दुशापि मे हृदयमलिखं नेयेन सहस्रधा स्फुटति स्फुटीकतं नेवातांव
रितकाङ्क्षीत्येव नेच्छामि वरमनाकर्णितमवाश्रणीयस्य प्रवचनास्मि इति तात किं ब्रवीमि. तथापि
किमम्ब नास्त्येहं न चितेन लोकलज्जाकारणवैलक्ष्येनेति पश्चाद्यितास्मि वत्सवचनाहृतलोनरोदिमी

त्यभिदधानैवासन्नसखीजनावलम्बितशरीरा मोहमगात् । अथैकदेशत्यनेनेन सहसा ससंभ्रमेण प्रधाव
ता विलासवती परिजनेनावेदिते तस्मिन्वृत्तान्ते मन्दमन्दवास्फालनोद्वेल इव महोदधिरभ्यागन्स
त्वचेताः ससम्भ्रममुत्थाय शुकनासद्वितीयो यामवस्थितामज्जविनीं करेणुकामारुह्य त्वरया दापि
वन्निव प्रतोराजमार्गे किमेवमितस्ततक्रान्तेनादाकलकलेन सर्वतः प्रधावता जनपदौघेनाकर्ण्य
त्रिवावर्जयन्निव पर्याकुलयन्निव च पृष्ठतः सगोपुरगाहप्रकारभवनतोरणामुज्जयिनीं निर्जगाम नरप
तिः उपेत्य चावन्तिमातृगृहमवनीयं निर्याखिवषमोहाध्मातवदनेन मलयजजलैस्त्वमिञ्चता कदली
दलैस्त्ववीजयता जलार्द्रैः पाणिपल्लवैस्त्वसंवाहनं कुर्वता सखीजनेन कथं कथमप्येवनाप्रतिपद्य
मानामुन्मीलितलोचनामग्रतः कमलिनीमिव विलासवतीमपश्यत् ॥ दृष्ट्वा च सहसा प्रवृत्ते
न नेत्राम्भसामृत्तौ विशोषापनयनायेव सिञ्चन्नुपविश्य पार्श्वे स्पर्शामृतवर्षिणा करेणाललाटे
वक्षसि कपोलयोरास्ये बाहोश्च स्पृशन् शनैः शनैर्बाष्पगद्गदमवादीत् । देवि यदि सत्यमेवान्ये
दृष्टं किमपि वत्सस्य चन्द्रापीडस्य ततो जीवित एव किमस्थेमघवत्सस्य हाने सकललोकसाधा
रणेनामुनावैक्लव्योपगमनेनेनरुमहत्त्वमुत्रीयते इयन्ति शुभानुपात्राणि कर्माणि किमयाक्रियते
वात्तोधिकस्य सुखविभाजनवयमपात्रमपि हृदयताडनामपि कुर्वाणैरनम्बनयवात्मेच्छया

विधिनापरः कोप्यस्त्रातास्ते यत्र मे रोचते नत्वदोमिनासौ कस्यचिद्दायायत्रः एवंचापगतेन वत्सेनासर्व
स्मिन्वत्सेद्विवास्माभिर्लब्धं प्रथमं वत्सस्यातिदुर्लभो जन्मोत्सवः संभावितः प्रवृद्धः गतस्य मुखमवलो
कितं उत्तानशयस्योत्समाङ्के उच्चभ्रूप्राचरणो जानुसञ्चारिणो रेणुधूसरमार्गो वत्साङ्के उपलभतः स्व
स्पर्शमनुभूतमव्यक्तमनोहारिणि प्रथमजल्पितानि श्रोत्रेकृतानि विवेष्टमानस्य बालचाटवो
नुभूताहृष्टा गृहीतविद्यस्य गुणवर्णनयानन्दितं हृदयमुपारूढयौवनस्य मातुर्मे हृष्टशोभा
सक्तिरुपलक्षितायौवराज्येभिषिक्तस्य च मित्रैः समाख्यातं दिग्विजयगतस्य प्रणमनैः परिष्व
क्तान्यङ्गानि एतावदेव मनोरथशतानवाञ्छितं तस्य वत्सेनानेन मम यत्रेयच्छ्रद्धस्य मे तस्य निजपदमति
ष्ठापितानपोवनं गन्तुं सर्वाभिवाञ्छितमप्राप्तिमुपहतः प्राणपरार्थोः फलं प्रपरमपिकिंनिव
नेवत्समेव्यन्यथापि न परिस्फुटं केनचित्कथितमेव एतावत्तु मयाव्यक्तमेव नवैवपरिज्ञातं कथ
यतः कर्णीकृतं प्रसंमतव्यादिनेतेलेवहारकैः महापातोवत्सस्य मे बालसेवक एवैतिनकप्रायातः
सर्वेज्ञिसर्वेहृतात्रे सोपिमयानप्रष्टव्येतितत्तनावत्पृच्छामः ततोजीवितमरणयोरन्यतरमङ्गी
करिष्याम इत्येतदभिदधत्येव राजनि परिजनात्रितिमाहूय प्रतीहारस्तौवितकमारान्महीत
लनिवेशितोत्तमाङ्गः लोकयन्नदेवदृष्टदर्शितवान् राजाप्तनथातमालोक्य चन्द्रापीडस्ते हृदेसे

का॰
उ॰
२००
200

गृहीत्वा हृदयहस्तेनोत्तमाङ्गे स्पृष्टुमष्टवान् । भद्रक कथय किं वृत्तं वत्सस्य मे येनागमनाय मयात्र चालि
खितेऽपि नायातो नागमनकारणं वा किञ्चित्प्रतिलिखितवानिति । स त्वेवमादिष्टो राज्ञागमनतः
प्रभृति यथावृत्तं कथयितुमारेभे । राज्ञा तु चन्द्रापीडहृदयस्फुटनहेतुं ज्ञातुं यावदाकर्णितं त्वभिनवार्क
एवाक्रान्तिविह्वलः प्रसार्य करमात्तेस्वरत्वारेनकमवादीत् । भवतु विदितं मम सर्वमनिकथितं त्वया
कथनीयं मयापि श्रुतं श्रोतव्यं पूर्णो मे मनोरथो हृदो निवृत्तं श्रवणकौतुकं हृतनाथीहृतनाङ्गतिरान
न्दितं हृदयं गतमन्यनाप्रीतिः हा वत्स स्यापि लोऽस्मि हा वत्स कथं त्वयैकाकिना स्फुटितो हृदयस्यान्तः ।
भूतो वेदनावत्स निःकृपेणात्वयावेशमस्यायतस्योपरि प्रीतिः । वयं दुःखभागिनो निस्त्रिंशास्तु एतस्मा
येषां तवापि हृदयस्फुटने निर्विकारमेवेदं वज्रमारतोपि कठिनं हृदयमावयोर्न स्फुटितं न चा
पि मरणं दुःखभीरवो मे वत्स मनु गच्छन्ति प्राणाः । तत्तिष्ठ यावदेव नातिदूरं प्रयात्येकाकी वत्स
स्तावदेवानुगमनाय प्रयतामहे । सर्वथा कृतकृतनाम किमद्यापि स्वस्यायं लोकः । स्तेह स्य महाका
लायतनसमीपे समादिशाशु परिचारकान् चितारचनाय । रचयन्तु झटिति काष्ठानि काष्ठिकाः
किं तिष्ठत्येव संज्ञाचिनाः कञ्चुकिनो गत्वा निष्क्रामयन्तु जनाः सामवेशोपकरणानि निष्क्रमणाय

गे॰
४॰

दिनेन किमधुनाविलम्बाहिनामतिपादयाशेष द्विजेभ्यः कोशं कस्य कृते नयापि पाल्यते पालना

दिवंकरणीयमेवाधुना क्षीणं क्षीणप्रायस्य मे यानय यथाभूमिभूमिपनयो हृष्टाः स्युर्यथा च नाथै
वानाथता दुःखं जानन्ति प्रजाः तथा करिष्यथ कथावशेषीभूतो मे वत्सः कमुपदेशं विधापयामी
त्येवं मातृप्रलापिनं च तारापीडमवीतिनात्मयीरस्यां विलासवत्यैव क्षुतन्नाशरीरमानं तत्र दुःखदिन
कोव्यज्ञापयत् । देव यथास्फाटितोपि हृदये ध्रियते शरीरेण यक्षराजः पापदोषाहैरस्मा
घनस्य च यथा जन्मन यथानिरवशेषं क्षीणोऽत्र नाव हे वहति । तारापीडस्तु नदस्तुनमाकर्ण्य कौ
त्रकान्नरिन शोकावेगविगलितनिमेषेण चक्षुषा ध्याविष्टइव दत्वावधानस्तेन कथ्यमाने यथा
दृष्टं यथाश्रुतं यथाभूतं च निरवशेषं च तत्सर्वमशेषीत् । श्रुत्वा च तमनेकाविज्ञोत्पादितम
त्ययं चाश्रुद्धेयं च निरतिशयशोककारणं चाविस्मयास्पदभूतं च दुःखवचके अनेककारं च यक्ष
वराजानवैशम्पायनयोर्हृन्नात्रमीषदिव विवर्तितानननो विमर्षोत्तमिरतारकादृष्टिं निर्विशे
षावस्थे शुकनासमुखे विन्यस्यमानयत् । स्वहृदयस्तम्भयंतं दुःखविनात्रमिनिरुस्यात्म दुःखमस्युहृदुः
खोपनयनायेव यतनेयतः शुकनासस्तदवस्थोपि स्वस्थवदवनिपतिमुवाच । देव विदितेने
स्मिन्नसंसारे ससरत्नमखदुःखमोहमयेषु देवतिर्यग्योनिमानुषेषु त्रिगुणात्मनः प्रधानस्य
वापरिणामान्यरमाणवाद्देवं ब्रह्मादिपर्यन्तस्योत्पत्तिस्थितिलयकारणस्येश्वरस्येच्छया वा धर्मा

का॰ टी॰ ६२ ५५ २०१

धर्मसाधनानामिष्टानिष्टकर्तृफलसंबन्धकारिणां कर्मणां शुभाशुभानां विपाकात्स्वभावाद्वा स्वय-
मेवानेकप्रकारमुत्पद्यमानस्य निष्टतो विनश्यतश्चानियतहेतोः स्थावरजङ्गमस्य न कदाचिदवस्थे-
मायान संभवति तद्धेतोऽयं दैवस्यात्रवस्तूनि विमर्शो यदि फलानि विचारात्कियन्त्यत्र फलानि दृष्टि
नान्यागमप्रमाणाद्देवाभ्युपगतानि अविसंवादीनि दृश्यन्ते । अश्वबन्ध्यादानाद्वा विषप्रस्व-
मस्योत्थाने वा कीदृशी फलाशिः अथ यस्मात्तेन वायसः समाकर्षणे भ्रमणे वा मन्त्राणां वा वैदिका-
नां चानेकप्रकारेषु कर्मसु सिद्धौ नानाविधद्रव्यसंयोगानां वा मरणममाद्योत्पादनापहरणावि-
द्वेषणादिषु शान्तेः समुत्पादादन्येषां च बहुतराणामेवंविधानां तदत्र सर्वस्मिन्नेवागमः प्रमा-
णं । आगमेषु च सर्वेष्वेव पुराणश्रीरामायणमहाभारतादिषु सन्त्यनेकप्रकाराः शापवार्ताः
तद्यथा महेन्द्रपदवर्तिनो नहुषस्य राजर्षेरगस्त्यादजगरतां सौदासस्य च वसिष्ठशापान्मानुषा-
दत्वं अप्सरसो रम्भायाः शापाद्ययातेस्तारुण्यप्रवजराभङ्गः त्रिशङ्कोश्च वसिष्ठशापाच्चण्डालभा-
वः श्रूयते स्वर्गलोकवासी महाभिषो नाम राजास्मिंल्लोके शान्तनुत्वमुत्पन्नः तत्पत्नीत्वमप्यापारा-
तायाश्च गङ्गायाः शापदोषाद्वष्टानामपि वसूनां मनुष्यमुत्पत्तिः निष्टत्ववानावदन्य एवायम्
आदिदेवः श्रीभगवानजः स एव भगवतो जमदग्नेरात्मजतामुपागतः श्रूयते तथा च तद्धात्मा

टी॰ ६२

नं विभज्य राजर्षेर्दशरथस्य तनयैव प्रतमंथकरायां वसुदेवस्य तस्मान्मत्रश्छोभूतं देवानामत्यत्रिर्नैवास

स्माविनीन च सर्वे प्रकृतेभ्यो गुणैः परिहीयते देवो न चापि श्रीभगवतः कमलनाभेरतिर्विद्यते चन्द्रमाः

किमत्र संभावनीयं । अपि च । गर्भसंभवारम्भ एव देवेन देव्या वदने विशन्निव चन्द्रमा एव दृष्टः तथा

च ममापि पुण्डरीकस्यैव दर्शनमुपजातं तदन्यापित्रिप्रतीतिनयोर्नास्त्येव सन्देहः विनष्टयोः कथं च शरी

रस्याविनाशः कथं वा पुनर्जीवितप्रतिलम्भः इत्यत्रापि अखिललोकप्रख्यातप्रभावमस्मत्तमनेन का

रणमावेदितं तच्च चन्द्रमसि विद्यते इत्येषाप्यस्त्येव वार्तान्तं सर्वमेतद्देवमित्यवगम्यतां देवः । अन्यच्च ता

दृशस्याकारस्य कान्तेरखिललोकाह्लादकारित्वस्य चान्यत्र एव संभवो नास्ति न तत्कल्याणैर्विरच्छाया

वसाने निर्वर्तिते गन्धर्वसुतो ह्याहमङ्गलस्य गलत्त्रयनपयसो दर्शनेन तज्जन्मकृतमेव संनापत्यन्यति

देवः । तत्रैषामयं शापोऽस्माकं पुनर्वर एव तदवश्यं तेन मनागपि देवेन देव्या शोकः कार्यः मङ्ग

लान्यभिधेयान्यभिमतदेवताराधनेन धनानि सर्जनेन चान्यजन्मोपार्जितं कुशलमभिवर्धतताम् । अ

कुशलमपि यमनियमकष्टतनोपवासादिना तनुः परिक्षीणोऽनन्तकामानामुपनीयतां अपरमपि यद्येव

गते श्रेयस्करं श्रूयते ज्ञायते वा तदन्देवाप्यारभ्य क्रियतां कार्यं तेनाच किल नलिन वैदिकानामवैदिका

नां च कर्मणां मासमात्रेण नामकिञ्चित् । अपि चोन्यात्रिरापनयोः कुशलयोरहस्यैवं प्रकारे

णोपजातेस्मिन्नवृत्ते शुकनासे सशोक इव राजानमवादीत् । सर्वमेवैतद्यथार्थेनाभिहितं कोन्यो बुध्यते
केन वा परेण वयं परिबोधनीयाः कस्य वा परस्य वचनमस्माभिः करणीयं किन्तु नष्ट तस्य वैशम्पाय
नदुःखात्स्फुटद्धृदयस्याग्रतो हितोपि लग्नं सर्वमेवान्यदन्तरयति न देवं पश्यामि न देवं शृणोमि न देवं चो
त्प्रेक्षे नैतदप्रत्यक्षिते वत्सस्य वदने संस्तम्भमेवात्मनो न शक्नोमि कर्तुं यत्र च मामयमीदृशः प्रकारस्त
त्र देव्याः परिबोधनं दूरापेतमेव न तु गमनादृते अन्य उपाय एव नास्ति जीवितसन्धारणायेत्येवमवधा
र्य यदार्यः प्रमाणमित्युक्तवति तारापीडे चिरागमनपीडयापत्यस्नेहपरित्याजितालज्जा विलासवती कृ
ताञ्जलिरुद्वेगात् । आर्यपुत्र यद्येवं तथापि किमपरं विलम्बनं निर्गन्तुमेव युक्तं यत्र प्राणाः उत्ता
म्यति मे हृदयं वत्सस्य दर्शनाय यद्यपि दुःखापनोदार्थं स्फुटमेवास्याश्वासितं हृदयस्य तदपि सम्प्रति
दर्शनाकाङ्क्षिततया न रोचत एव जानामि च वरं दीर्घकालमपि दुःखान्यनुभवन्ती सकृदपि वत्सस्य दर्श
नाय जीवितास्मि न पुनरस्य दुःखोपशान्तये सम्प्रत्येव मृतास्मि इति तदस्य दुराशानिवर्तितसर्वा
न्यनिर्वाणोपायस्य वत्सानन्तालोकनोन्मुखस्य गमनमपि नावष्टिनो दमाद्यजीवितं वदन्तीमेव वि
लासवतीमन्यतम शुकनासवेश्मन्यासनमः परिणतवया मामसम्बद्धो नोपहन्य स्वास्तिस्थवेकं ख्यज्ञा
पयतु । देवि सर्वेणैव स्फुटेनाप्रनावानीकलेनाकुलितहृदया मनोरमा स्वयमेवधावन्त्यागत्य ।

राज्ञो लज्जमाना नोपगतास्थानमिदं । न देशमात्रं गृहस्यापृच्छतां ते इति पृच्छति च देवी किमेभिः
कथितैर्जीवति मे वत्सो वैशम्पायनः स्वस्थशरीरो वा कच्चित्किं नो वा पुनर्वैव राजस्यैव वावर्तते न वा
आगमिष्यति वा कियद्भिर्दिवसैरिति । राजा तु तत्पर्यवसितोपायैकस्तु तमसाकर्ण्य दीनं च वत्स
चास्य तद्गुणीभूतशोकोपस्तब्धां विलासवतीमवादीत् देवि न ज्ञातं किञ्चिदपि वत्सयोः क्षाते
प्रियमाख्याते प्रत्यन्तस्थ ज्ञात्वा कदाचिज्जीवितेनैव वियुज्यते उद्विग्नस्वयमेव धैर्यमवलम्ब्य
सर्वं हृन्नाज्ञात्र कथनेन स्थापय प्रियसखी । तया प्यार्य शुकनासेन सह गमनसंविधानमका
र्येत । अथ तया प्रस्थिते राजनि राजाज्ञया गाढं प्रत्यापीडस्नेहाच्च प्रार्थ्य दर्शनं च त्वत्कुलाच्च प्रथ
मगतपितृपुत्रभ्रातृमित्रसम्बन्धस्वजनदर्शनाय गृहं त्वलकवर्जं स्कन्धायितव्याः सकलएव लो
को गतमुद्दचलत् । राजा तु शीघ्रगमनहेतोः न्यसमामामान्येव निवर्तयन् त्यलक्ष्यपदिक्कः पिपत्ति
वयस्यानमेकदिवसेनैव प्रयाप्रयाति तमीहमानः स्तोकतया वाधतः प्रभृति उत्ताम्यता हृदयेन
कियत्यध्वन्यद्यापि वर्तते कियद्भिर्दिवसैः प्राप्स्याम इति च गुरुशोकः पुनस्तु वक्तुं माववोपि
तं त्वरितकमाहूय पृष्ट्वा तद्विज्ञैः प्रयाणकैर्बहुभिरेव दिवसैरामसमादाक्षोदम् । आसा
द्य च विकल्पमानो नेत्वाधिष्ठितेन त्रुशयितेनात्मना हृत्वतएव प्रथममासनमानस्कन्धावारान्

का॰
द॰
२०३

203

नोक्त्वैव प्रणयत्वरितकेनु सार्धं प्रस्थितवान् । अथ तैः सह गच्छद्भिरुज्झितात्मसंस्कारमलिनकृशशरीर
मवनितलनिवेशितोत्ताप्यदीनतरदृष्टिं जीवितलज्जया रसातलमिव प्रवेष्टुमीहमानमहमह
मिकाया परस्परावरणेनैवात्मवदनं दर्शनमभिलज्जमवनतमपिहृतमिव सपरिच्छदमपि सु
खिन्नमिव जीवितमपि मृतमिव संभ्रममकृतागमनमपि प्रतीपमाकृष्यमाणचरणमिवाङ्गै
रेव सह चलितेनोत्साहेनेव बाष्पेणेव सह प्रज्ञात्मानं कैवल्येन सह्योपसर्पन्तं मेघनादपुरःसरं स
कलमेव चन्द्रापीडचरणतलनिबद्धजीवितराजपुत्रलोकमालोक्य समुल्लोलितनयनशोको
र्मिवेगाक्रान्तोऽप्युच्छ्वसित इव हृष्टोऽभूत् चन्द्रापीडशरीराविनाशप्रत्ययोऽन्तरात्मना विहस्य सा च
रणपर्यन्तवर्तिनीं विलासवतीमवादीत् । देवि दिष्ट्या वर्धसे ध्रियते ते सत्यमेव शरीरेणावत्सो
येन सकलपतत्त्वरणाकमलानुजीवी राजपुत्रलोकस्तत्पादमूलादागत इति । सा तु तदाक
र्ण्य किञ्चिदात्मपाणिनेवोत्सारितावरणा निश्चलतया हृष्टा चिरमिवालोक्य तं तनयनिर्विशे
षं राजपुत्रलोकमविच्छिन्नास्रधारापिधीयमानमन्युच्चोच्चैरारटितवती । हा वत्स कथं सह पांसु
क्रीडितस्यैतावतो राजपुत्रलोकस्य मध्ये त्वमेवैको न दृश्यसे इति तथा रटन्तीं तां समाश्वास्य
राजा हतमेव समं सर्वलोकेनावनितलनिवेशितोत्तमाङ्गः मेघनादमितो ष्णोकस्वेन्यादिशत्

ग्रं॰
२३

वादीत् । मेघनादकथय कोऽहन्नाम्नो मेवत्सस्येति सत्त्वविज्ञापयत् । देवि चेतनाविरहाच्छ्वासमात्रक
मेवोपरतं शरीरे पुनर्दिवसे दिवसे भ्यधिका कापि कान्तिः समुपजायते इति राजा तच्छ्रुत्वा जी
वितप्रतिलम्भापि समुपजातप्रत्याशः कृतं देव्या मेघनादस्य वचनेन देहि विरास्त्वं नः कृतार्थया मे
दर्शनेनात्मा ते पश्यामो वत्सस्य वदनमित्यभिदधान एवाभिवर्धनगतिर्विशोषयाकरे गत्वा महाश्वे
ताश्रममगमत् । अथ महाश्वेवनच्चन्द्रापीडस्य जनागमनमाकर्ण्य पुनः प्रकीर्णितारपुत्रकाश्रुका
विनयनजलबिन्दुसन्दोहाहाहतासि मन्दपुण्या इदं वैकभागिनी नजानाम्येव विस्मृतमरणा ।
किमद्य यावदहमनेनानेकप्रकारसन्तवलोकारदानेकपीडितेन दग्धेव दग्धसावरदग्धव्यात्यभिद
धानेव धाविल्वा महाश्वेताङ्क्रियाग्रहाद्वरमविशात् । चित्ररथतनयापि सत्वरोपसृतमखीक
दम्बकावलितशरीरा तूष्णीमेव मोहान्धकारान्नविनानदवस्थैव नस्थौ । शुकनासावलम्बिता पु
नः प्रधाविनोपस्नतायतनतरलहृष्टिः कमेवन्माइति एव्वाहा विलासवती प्रविश्य च सहजयाका
न्तैवाविहितोपरतं सर्वप्रयत्नपुत्तमयामिव नेपुत्रवत्सलाश्रे च ननयमालोक्य यावन्नपतापतं
त्येव तावत्पीडलावहितलासवती विथावयन्नीमापि मनोरमामवदिष्य हृदनपवबाऊलनाहय
प्रमाथ्य रयोन्मक्रजर्जरितनाभिः नयनजलधाराभिः मस्नवेणाचासिञ्चन्नीमहीतलमोहमेजा

का॰ हृं॰
२४
२०५

नद्दलंभविदान्नहृष्टोसि देहि मे प्रतिवचनमालोकय सकृदपि मामनचिंतमवस्थानं नानैव त्वय्यायो
क्तोपगमनेन सम्पादयतनयोचितमनाकर्णितपूर्वं बाल्येपि तथा मद्वचनं । अद्य किमेवं विलपन्त्या
अपि न शृणोषि ज्ञानकेन रोषितोसि पश्चात्तापयामिव त्वत्पादयोर्निपत्य चन्द्रापीडप्रणाममनाव
त्मन्तु कस्य त्वत्स्नेहादेवमतिदूरमागतस्य पितुः पादौ क्व सा तेगतागस्तु भक्तिः क्व ते गुणाः क्व स्ने
हः क्व सा धर्मज्ञता क्व तत्पितृपक्षपातित्वं क्व सा बन्धुप्रीतिः क्व सा परिजनवत्सलता कथमभा
ग्ये मे एकपद एवोत्सृष्टैव मौढ्या मौनमवलम्ब्यास्थितोसि अथवा यथा तेमुखेन तथा निष्ठुवयेन त्व
मुदासीनहृदया त्वयीति कृतान्तप्रलापासमुपसृत्यागतः स्तनंगौ ज्ञमालिङ्ग्याङ्गानि शिरः समाघ्रा
य कपोलौ चुम्बित्वा चन्द्रापीडस्य चरणावुत्तमाङ्गे कृत्वा मुक्तकण्ठमरोदत् । तथा कदलीव
मनोरितनिज्ञपीडस्तारापीडश्चन्द्रापीडं परिष्वज्येव सर्वप्रजापीडापहरणक्षमाभ्यां भुजाभ्यामव
लम्ब्याब्रवीत् । देवि ययमावयोः सहूतेरपत्यतामुपगतात्तानयापि देवतामूर्तिरिव अयोवनी
यानन्मुच्यते अयं महालोकोचितः सोचितव्यस्त्रातः अस्मात्तु च शोकेहातेन च किञ्चिदपि भव
ति केवलं गलमेव स्फुटति रटतो न हृदयं निरर्थकं प्रलापितमेव निर्याति वेदनया न जीवितं निरासङ्कः
मेव नयनजलं पतति न शरीरं अपि च वत्सस्य दर्शनमात्रकमेव पीडाकरमावयोः तच्चैवमालोकयमा

गे॰
२५

नेत्रद्वयेस्य वत्सहृदयापेतमेव प्रपरमस्पर्शाभ्यां हिताभ्यामपि निःस्वावस्थान्तरमवष्टभ्य कृत्वा मनोरमाङ्क
कनामैतौ सन्धारणीयौ ययोर्लोकान्तरितो वैशम्पायनः निष्टप्तावं तावत्प्रियस्याः प्रभावात्तु नरप्य
नुभवनीयो वत्सस्य जीवितप्रतिलम्भाभ्युदयमहोत्सवः सैवेयं गान्धर्वराजतनया वधूस्ते प्र
स्मदागमनशोकोर्मिसमाक्रान्तिमूर्छासमानयहणाश्रुम्नक्राक्रन्दाभिः सखीभिर्याश्यमाना
पि संज्ञामद्यापि न प्रतिलभते तदेनां तावदुत्थाप्याङ्के कृत्वा चेतनालम्भयतेतां यथेच्छं रोदयिष्य
सि इत्यभिहिता राज्ञा विलासवती कृत्स्नामेव वत्सस्य जीवितनिबन्धनं वधूरित्यभिदधत्येव समस्त
म्भ्रमसमुपसृत्य प्रतिपन्नसंज्ञामेवाङ्केनादाय कादम्बरीं करेणास्याः कवरीं संस्थाप्य सहसोन्मी
लनाहितहिरण्यनरतनयमुखाभवदनमालोक्यानवरतनयनसलिलस्नानाङ्गं सिन्दूरणाकलशी
तलं स्वकपोलयोर्ललाटे लोचनयोश्च निवेशयन्ती चन्द्रापीडस्पर्शाभिमिरेण पाणिना हृदयेस्य
पात्री समाश्वासितहिमेवत्सेत्वयैव सन्धारितमेव वत्सस्य चन्द्रापीडस्य शरीरं यतस्त्वत्स्नेहनमयीजातं
येन पुनर्वत्सस्य वदनमालोकितमिति । कादम्बरी तु तेन चन्द्रापीडनामग्रहणेन तेन च तातिवे
गोपहृत्विना विलासवतीशरीरस्पर्शेनेन लब्धसंज्ञा लज्जावनम्रमुखी प्रतिपन्नमूर्छा मदले
खयाङ्कादवतार्य पादवन्द्येव च यथाक्रममकार्यतवन्दनाग्रहणाम् । प्राकर्षन्ति दीर्घकालम

का॰
द॰
२५

205

॰वितथा भवेति कृत्वा शीर्णापि च तैरस्याप्यनातिनिकटे विलासवत्याः ह्रदतः सम्प्रवेशयाधार्यत तथाप
न्यागतचेतनया तात चित्ररथतनयायां चन्द्रापीडमेवोज्जीवितं मन्यमानो राजा चिरमेवास्या मङ्गलमङ्ग-
मालिङ्ग्य चक्षुर्म्बेऽप्युपशयं स्थित्वा मदलेखामाहूयादिदेश । दर्शनसुखमात्रकमस्माकं विधीय
मानेन त्वयास्माभिरामादितं तथाहर्निशं नैवोपचारेणावनोदिवसमात्रमपि चिन्तवती वत्सस्य शरी
रे सपवोपचारो नास्मद्गृहमतोऽथालज्जयावामनागपि परिहासनीयः वयं निष्प्रयोजना इदृशाः केव
ले किमस्माभिर्विद्वेषियितैर्गतैर्वा यस्याः करस्पर्शेनाप्यायितमेतद्विनाशि सेव वत्साबधूः पार्श्वे स्यप
तिष्ठत्त्वियादिश्य निर्जगाम निर्गत्य चोपकल्पितं निजावासमगत्वैव तपस्विवासोचितेऽन्यतमस्मिन्ने
सत्रपवाश्रमस्य प्रविशालातलसनाथे नफलनामण्डपे समुपविश्य निर्विशेषदुःखं सकलमेव ।
राजचक्रमाहूय सबहुमानमवादीत् नभवद्भिरेवं मम नैव यथा यथा शोकावेशादेतदहमङ्गीकरोमि
इति एवं चिन्त्रयत्नितपवायममार्थः यथावत्समेतस्य चन्द्रापीडस्य वदनमालोक्य संक्रामितनि
जनिजभावेण मयाऽकचिदाश्रमपदे पश्चिमे वयः त्रपितव्यमिति सत्वायमे भगवता कृतान्तेन
प्रवत्कृतैरत्नद्रूपैः कर्मभिरेवमुपनमितः किमपरं क्रियते नातिक्रमणीया नियतिरुपापनीयं
नाग्रभूतं यचेष्टा कृतं वत्सस्य सखफलं भवद्भुजेष्वेव मन्त्रितेषु वाहितमस्त्येव अन्यथापि हि चेष्टे

शे॰
२५

मानेषु प्रथमस्मासु सर्वमेषैवावस्थितं । न दिक्षामि चिरकाङ्क्षितं मनोरथं पूरयितुं धन्यास्ते जरापीत१

मा तनन वस्तनयेषात्मभर मा भज्य लक्ष्मः शरीराः परलोकगमनं साधयन्ति । तत्त्व बलाङ्गले पादमाद

यानिच्छन्तोप्यार्च्छियन्त एव कृतान्तेन न यदि पात्रे वा चित्याय्यपयित्वा निजपदं जरापरिभग्नशेषेण नि

घायोजनांस्थितिना सर्वसुखवासेन मांसपिण्डेन परलोकसुखान्युपार्जितं लाभ एवायम् । तदस्य

वत्सनः कृते भवन्तो मया प्रार्थिता इत्स्वल्पास सन्निहितान्यपि परित्यज्य सुखान्यन्यचिन्तानि चाङ्गीकृत्य

दुःखानि तथा च हर्म्यपृष्ठेषु तल्पेषु मूलेषु तनः प्रस्तरशीलानि लतासु संसक्तजन्तु लेखैः हरिणेषु निवस

नरुचिं चीरवल्कलेषु अन्नलरचनाभियोगं जटासु ग्राह्याहारं हार्दे कन्दमूलेषु गार्हस्थ्यरणव्यसन

त्वमस्तूत्रे प्रजापरिपालनशक्तिं समित्कुशकुसुमेषु नमालापं धर्मसंहृतयासु समरवसस्त्रप्रश

मे जयेच्छां परत्रकोशस्पृहां तपसि प्रज्ञामोने सर्वोपभोगरागं चवैराग्ये ननयस्नेहान्मंस्कक्रमध्यान

ध्यानपरिस्विजनोचितान् क्रियाकर्वन्नान्यैवं लोकोचितानहहरहरुपचारान्कादम्बर्याकथमपि समस्तस्

हृल्लज्जया महाश्वेतया च क्रियमाणान् निजभिन्नविक्षेदात्मायं प्रातः स्नात्र भूत चन्द्रापीडदर्शनसु

खदुःखान्यगायन्नगणयन्नरपतिपरिवारः समं देव्या शुकनासेनैव च तत्रातिष्ठत् । इत्येवं कथयि

त्वा भगवान् जाबालिर्जराभिभवविज्ञाये स्मितं कृत्वा हारीतप्रमुखान्सर्वानेव तान् शोत्हृष्टमा

का॰
दू॰
२९

206

यस्माद्भिरिदमन्नः कारणज्ञाविणः कथारसमाक्षेपस्य मामर्थ्यं यत्कथितं प्रवृत्तोऽस्मि तत्परित्यज्यैव क
थारसात्कथयन्नतिहृदयमतिक्रान्तः स कामोपहतचेताः स्वयंकृतादेवाविनयाद्दिव्यलोकात्परिभ्र
ष्टः मर्त्यलोके वैशम्पायननामा शुकनामा समुत्पन्नः स एव पुनः स्वयंकृतेनाविनयेन कोपित
स्य पितुराक्रोशान्महाश्वेतायाश्च मर्त्याधिष्ठानाच्चास्माच्छुकजातौ पतित इत्येवं वदत्येव भगवति जा
बालौ बाल्येऽपि मे सुप्तप्रबुद्धस्येव जन्मान्तरोपात्ताः समस्ता एव विद्या जिह्वाग्रेऽभवन् सकलासु च
कलासु उपदेशकौशलमुपजातं मनुष्यस्येव चेयं विस्पष्टवर्णाभिधाना भारती संवृत्ता विज्ञाने च स
र्ववस्तुविषयं स्मरणं च किं बहुना मानुषशरीरादृते सर्वमन्यत्तत्क्षणमेव वैशम्पायनस्योपपन्नं
स एव चन्द्रापीडस्योपरि स्नेहः सैव कामपरता स एव महाश्वेतायामनुरागः सैव तद्वार्ताप्रवृत्त्युत्सुकता
केवलमेवासञ्जातपक्षतया मे नास्मिन्समये सर्वजन्मोपात्ता शरीरस्य चेष्टा नासीत्। अथैवमावि
र्भूतसकलान्यजन्मवृत्तान्तः समुत्सुकान्तरात्मा किं मातापित्रोः किं तारापीडस्य किमम्बया विला
सवत्याः किं वयस्यस्य चन्द्रापीडस्योत प्रथमसुहृदः कपिञ्जलस्याहोस्विन्महाश्वेताया इति ना
नाविधमेव कस्य कस्य कष्टमस्ततवानस्मीति। तथा चोत्ककान्तरात्मा महीतलविनिवेशितशि
रास्थिरमिव स्थित्वा भगवन्तं जाबालिं निजानयनश्रवणलज्जया विलीयमान इव विमान्निव चयानाल

ग्रे॰
२९

तत्तेकं पृच्छकथयमपि प्रसादेन विज्ञापयं । भगवंस्त्वत्प्रसादादाविर्भूतज्ञानोऽस्मि संवृत्तः स्मृताः खलु म
या सर्व एव स्वे बान्धवाः स्मृतिभाजश्च मे तथैव स्मरणेनैवोत्तानमासीत् यथा विरहपीडयाऽधुना तु न
स्तान्स्मृत्वा स्फुटतीव मे हृदयं तथा चन्द्रापीडं च स्मृत्वा तत्रस्यापि जन्मान्तरेऽनेन प्रसादं कोऽपि ह
भगवान्येनायं तिर्यग्योनिवासोऽपि मे तेन सहैकत्र वसतो न पीडाकरः सञ्जायत इत्येवं च विज्ञा
पितो मया सास्मितमिव मामालोक्य भगवाञ्जाबालिः सस्नेहकोपगर्भं मामवादीत् । दुरात्म
न्नेनैतावतीं दशां प्रापयितोऽसि कथं तामेव तरलतां हृदयस्याद्य भस्मायायापि पतावेवत्तेनोद्वि
येते तत्सञ्चरणात्वमस्तात्सञ्चरणात्वमस्तावद्भवतो मां प्रेत्य सोत्येवं पृष्टः स्मृतेन भगवान्
जाबालिरमलाभिः पापमलमिव प्रक्षालयन्दशनदीधितिसलिलधाराभिः प्रत्यवादीत् वत्स
विस्पष्टमेवाश्रुकारणं हि कामरागमिश्रमयाद्दल्पसारात्स्त्रीवीर्यादेव जन्तुः संभवति स खल्वभा
वात्सारभूतस्य स्थैर्यहेतोः प्रजीवतीति तदयमत्यन्तमेव हि पौ येनास्य ताहशी कामपरता जाता
मरणं च मदनवेगासञ्ज्वरासहिष्णोस्तत्तु पतनं ते ग्रथितायितां हि पाप्वायमल्पायुः शापावसाने
तत्कालं च यस्याद्यं येनायुषा योगो भविष्यतीत्येतच्च श्रुत्वा पुनरप्यवनितलनिवेशितशिराः
प्रणम्य भगवन्तं व्यज्ञापयम् । भगवन् त्वत्प्रसादेन स्मृतास्तिर्यग्जातौ वर्तमानः स्वयं सर्वे स्व

वाहमोक्षागामि मे भगवतः प्रसादात्सम्प्रत्येवानेन संभूतानाभूतपूर्वं च ज्ञानमत्रैवात्मनि शरीरं प्रतनवायुः
संवर्तकमेघोरगं भगवतः प्रसादादन्यस्मिञ्जन्मनि यदि भवेत्केन चित्प्रकारेणानयेत्तन्मे महाकर्मसा
ध्यमाविर्भविष्यतीत्येनदाज्ञापयतु भगवानित्येवं विज्ञापितस्तमयादेव विनिर्दिशमवदत्स भगवानाज्ञा र
पितवान् । एतदपि यथा तथाज्ञास्यस्येवेति एतावती चेयं कथा रसात्तेपादचेति तेवास्माभिः प्रभा
तप्रायायां रजनी प्रभाविरहादनुरक्तहृष्टर्जनदर्पणाभामिदमपराम्बरान्तरावलम्बि वर्तते रजनिकरबिं
म्बमेषा यथोक्तमेन विस्तारिणीजरन्नाम्रसमप्रवालकणापाण्डुच्छविरकल्पत सीमन्तयन्तीनमः केश
मकुन्तलमिव पूर्वस्याः ककुभो कणाग्रकरावलोकवर्तिनि समोषतिमिरतया मध्ये काण्डकल्पसंभाव्य
त्प्रभालोके ग्राववाः क्रमेण यथास्थं दमनारकाः प्रवेष्टुं । पञ्चपञ्चमासरशायिनां प्रबोधयामी समुच्च
रतिकोलाहलः श्रोत्रहारी विहङ्गमानाम् एतेचरति शीथिनी परिमलतनथीनलाम्बुलितवनक्षम
मपरिमलग्राहिणो वातप्रवृत्ताः प्रभातपिशुना वायवः प्रत्यासन्नान्निविहरणवेलेत्यभिदधानप
व गोष्ठीभङ्गो दतिष्ठत ॥ प्रथोदिते भगवति ज्ञाबालो वीनरागापि निष्क्रान्तकापि मोक्षमार्गाविस्थ
ता समस्ते वसानपाश्विपक्षेत्कथारसाद्धिस्मृतनग्रहा चिन्तप्रतिपत्तिः स्मरणवन्तीवोत्कण्ठितकाया
विस्मयोत्फुल्लमखीफगपदागलितपोकानन्दजन्मनयनसलिलाहाकष्टपाहाञ्जबन्धिनीपराधी

नीपराधीनेव तस्मिन्नेव चिरमिव स्थित्वा यथास्थानं जगाम । हारीतस्तु मां सन्निहितेऽपि मुनिकुमा
रकजने निजकरेणैवोत्क्षिप्यातपवर्णशालां नीत्वा शनैः स्वशयनीयैकदेशे स्थापयित्वा प्राभातिक
क्रियाकरणाय निर्ययौ । निर्गते च तस्मिन्नहमेनेन सर्वकार्याक्षमेन तिर्यग्जातिपतितेन पीडितान्त
रात्मा चिन्तामाविशम् अस्तु तावदनेकसुकृतशतसहस्राधिगम्यं मानुष्यमेव दुर्लभं तत्रापि प
रं सकलजातिविशिष्टं ब्राह्मण्यं ततोऽपि विशिष्टमासन्नामरपदं मुनित्वं तस्यापि विशेषान्तरं दि
व्यलोकनिवासित्वमिति एतावतः स्थानात्स्वदोषैरात्मा पातितः तेन कथमधुना सर्वक्रियाविही
नेनास्मात्तिर्यग्जातेः समुद्धृतः कथं वा पूर्वजन्माहितस्नेहैः सह समागमसुखमनुभूतम् ।
अत्रभवतस्तु तन्निष्प्रयोजनेनामुना जीवितेनैव किं मया परिरक्षितेनेति ॥ इति श्रीमत्पण्डितबा
णकविना विरचिता कादम्बर्यां द्वितीयः खण्डः समाप्त ॥ १ ॥ समाप्तेयं कादम्बरी नमः शिवायास्तु ॥
श्रीविक्रमादित्यभूपसंवत् १९०२ मार्गशुक्लत्रयोदश्यां संपूर्णं समाप्तीकृतमोंतत्सत् ॥ ॥ ओं ॥

कादंबरी काव्य